कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



५३ ५२

ह्वरणानां॥ ॥यथाह मनुः॥ ॥अदंड्यान्दंडयन्राजा दंड्यांश्चैवाप्यदंडयन्। अयशो महदाप्नोति नरकं चैव गच्छतीति॥ धर्म्मि
शास्त्रानुसारेणानार्थशास्त्रानुसारेणादेशादिसमयधर्मस्यापि धर्म्मशास्त्राविरुद्धस्य धर्म्मशास्त्रविषयत्वान्न पृथगुपादानं यथा वक्ष्य
ति निजधर्म्माविरोधेन यस्तु सामयिको भवेत्। सोपि यत्नेन संरक्ष्यो धर्मो राज्ञा कृतश्च यः इति क्रोध [illegible] लोभविवर्जित इति वचनमादर्शार्थं अम
र्षः क्रोधः लोभो लिप्सातिशयः॥ ॥किंच॥ श्रुताध्ययनसंपन्ना धर्म्मज्ञाः सत्यवादिनः। राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः॥ श्रुते
न मीमांसाव्याकरणादिश्रवणेन वेदाध्ययनेन च संपन्नाः धर्म्मज्ञाः धर्म्मशास्त्रज्ञाः सत्यवादिनः सत्यवादनशीलाः रिपौ मित्रे च ये
समाः द्वेषरागादिरहिताः एवंभूताः सभासदः सभ्याः यथोपविशंति तथा दानमानसत्कारै राज्ञा कर्त्तव्याः। यद्यपि श्रुताध्य
यनसंपन्नाद्युक्तविशेषेणोक्तं तथापि ब्राह्मणा एव यथाह कात्यायनः॥ स तु सभ्यैः स्थिरैर्युक्तः प्राज्ञैर्मौलैर्द्विजोत्तमैः॥ धर्म्मशा
स्त्रार्थकुशलैरर्थशास्त्र [illegible] विशारदैरिति॥ ते च त्रयः कर्त्तव्याः॥ बहुवचनस्यार्थवत्वाद् यस्मिन्देशे निषीदंति विप्रा वेदविदस्त्रयः
[illegible] मनुस्मरणाद्बृहस्पतिस्तु सप्त पंच त्रयो वा सभासदो भवंतीत्याह लौकिकवेदधर्म्मज्ञाः सप्त पंच त्रयोपि वा यत्रोपविष्टा

Acc. NO. - ~~4563~~ M-1669

Title - याज्ञवल्क्य स्मृतिटीका.

टी. :- मिताक्षरा - अध्याय - 1

Author - टी. :- विज्ञानेश्वर

Date - ?

Subject - स्मृति, धर्मशास्त्र

folio - 80 avalible (1 to 6 Nos. folio are missing)

Xerox - 158.

K K S U LIBRARY
RAMTEK
441 106
M-1669
Dist. Nagpur

Checked 2012



न कृकावा ४

भावा २ हु २

मिता विप्राश्रुस्साधयत्तसदृशी समेति। न्नब्राह्मणैः सह ति पूर्वश्लोकोक्तानां ब्राह्मणानां श्रुताध्ययनसंपन्ना इत्यादि विशेषण मि
२ तिमंतव्यं तृतीयाप्रथमांतनिर्दिष्टानां विशेषणविशेष्यभावाद्वे द्विरूपनेनपुनरुक्तिप्रसंगाच्च तथा कात्यायनेन ब्राह्मणानां सभास
दां च स्पष्टं भेदो दर्शितः। सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः। सभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मत इति। तत्र ब्राह्मणा
अनियुक्ताः। सभासदस्तु नियुक्ता इति भेदः। अत एवोक्तं। नियुक्तो वाऽधर्म्मज्ञो वक्तुमर्हतीति। तत्र नियुक्तानां यथावस्थितार्थक
थमनेपि यदि राजा अन्यथा करोति तदा सो निवारणीयोन्यथा दोषः। उक्तं च कात्यायनेन। अन्यायेनापि यांतिसभासदः। ते पि तं यांतं ये
त द्भागिनस्तस्माद्बोधनीयः स तैर्नृप इति। अनियुक्तानां पुनरन्यथाभिधाने अनभिधाने च दोषो न तु राज्ञो निवारणे। सभां वा
न प्रवेष्टव्या वक्तव्यं वा समंजसं अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषीति मनुवचनात्। रिपौ मित्रे चेति च शब्दात्। लोकरंजनार्थं
कतिपयैर्वणिग्भिरप्यधिष्ठितं सदः कर्तव्यं यथाह कात्यायनः। कुलशीलवयोवृत्तवित्तवद्भिरमत्सरैः। वणिग्भिः स्यात्कतिपयैः कु राम
लभूतैरधिष्ठितमिति। ।। व्यवहारान्नृपः पश्येदित्युक्तं तत्रानुकल्पमाह। अपश्यता कार्यवशाद्व्यवहारान्नृपेन तु। सभ्यैः स २

2



सक्तोकें । १
लो ४

हनियोक्तव्यो ब्राह्मणः सर्वधर्मविद्रा कार्यांतरव्याकुलतया व्यवहारान्न पश्यतान्नृपेन स्वस्थैः सह सर्वधर्मवित्रा सवर्णौ ध
र्म्मिणः स्त्रोक्तार । सामयिकांश्च [illegible] विज्ञे विचारयनीति सर्वधर्मविद्वांसश्चैन दावित्रियादिर्नियोक्तव्यो व्यवहारदर्शने
। स च कात्यायनोक्तगुणाविशिष्टं कुर्यान् । यथा ॥ दांतं कुलीनं मध्यस्थमनुद्वेगकरं स्थिरं । परत्रभीरुं धर्मिष्टं युक्तं क्रोधवर्जितं मि
ति । एवं भूतब्राह्मणसंभवे क्षत्रियं वैश्यं वाभियुंजीत न शूद्रं यथाह कात्यायनः । ब्राह्मणो यत्र न स्यात् क्षत्रियं तत्र योजयेत् । वैश्यं वा
धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेदिति ॥ नारदेन त्रयमेव मुख्यो दर्शितः धर्म्मसास्त्रंपुक्तोदिनाकमते स्थितः ॥ समाहितमतिः पश्येद्व्य
व्हारानन्नुक्रमादिति प्राड्विवाकमते स्थितः ॥ रजावा रवद्रुषाप रसैनंयपरपतीमिवव । न स्पवे यंयोगिकी संज्ञाम्रोर्थि प्रत्यर्थिनौ
पृच्छतीति प्राड् । तयोर्वचनं विरुद्धमविरुद्धं च सभ्यैः सह विविनक्ति विवनक्तीति वा विवाकः । प्राड्सौ विवाकश्चेति प्राड्विवाकः । अ
न्यं वा विवान्नुगतं इच्छा स सभ्यस्तास्त्रयन्नतः । विचारयन्ति येना सौ प्राड्विवाकस्ततः इति ॥ ॥ अपि च ॥ रागाल्लोभाद्भयाद्वापि स्मृत्यपे
तादिकारिणः । सभ्याः पृथक्पृथग्दंड्या विवादाद्द्विगुणं दमं ॥ पूर्वोक्ता सभ्या राजसो निरंकुशत्वेन नैरभिभूताः रागाद्यास्त्वेहातिशाय ।

मि ३

६

पृथक् ।

सम । त

3

ऽा २

मिता ३

न्यालोमाहात्म्यालिप्साति सयावन्मयाद्दासत्रासाव स्मृत्यपेतं स्मृतिविरुद्धं आदिशब्दादाचारापेतं कुर्वतः ष्टकृष्टथ गेकैकसोविवाद
द्विवादपराजयनिमित्ताद्दं [illegible] हिगुणं दमं दंड्याः॥ न पुनर्विवादास्पदीभूताद्द्रव्यात्॥ तथा सति स्त्रीसंग्रहणादिषु दंडाभावप्रसंगः॥ राग
लोभभयानानुपादानं रागाद्विषेवद्विगुणोद्दमेन मोहादिष्विति नियमार्थं न च राजा सर्वे स्येष्टेव्याहारण मितिवर्ज्जेत मवचनाभ्रवाह्म
णादंड्याः॥ इति मंतव्यं तत्स्वधर्मसंसार्थीत्वाच्चायत्नुषड्गिः परिहार्यो राज्ञा स्ववध्यघावं घक्ताद्दंडस्थावहिः कार्यस्थापरिहार्यश्चेतित दपिस
एषवहुश्रुतो भवति लोकवेदवेदांगविद्वाकोवाक्येतिहासपुराणकुशलस्तदपेक्षस्तद्वृत्तिः श्वाष्टाश्चत्वारिंशता संस्कारैः संस्कृत
स्त्री पकर्मस्वभिरतः षट्सु समयाचारिकेष्वभिविनीत इति प्रतिपादित वहुश्रुत विषयं न ब्राह्मणमात्रविषयं। ॥व्यवह
र विषयमाह॥ स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः॥ आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्॥ धर्मशास्त्रसमाचारविरुद्धे
न मार्गेन परैराधर्षितो विभूतोयदृष्टेषाड्विवाकायवा आवेदयति विज्ञापयति चेत्। यदि तदावेद्यमानं व्यवहारपदं प्रतिते
न्नरसंशयहेतुपरामर्शप्रमाणनिर्णयप्रयोजनात्मको व्यवहारस्यपदं विषयः॥ तस्यवेदं सामान्यलक्षणं॥ सचहि

रा ३

4



विघ्नः। संकाभियोगस्तत्त्वाभियोगश्चेति॥ यथा नारदः॥ अभियोगस्तु विज्ञेयः शंकातत्त्वाभियोगतः। शंका सतां तु संसर्गात्तत्त्वं होढाभि-
दर्शनादिति। होढा लोप्त्रलिंगमिति यावत्। नैतद्दर्शनं साक्षाद्दर्शनं होढाधिदर्शनं तस्मात्। तत्त्वाभियोगोपि द्विधा प्रतिषेधात्मको विध्यात्मकश्चे-
ति। यथा मन्त्री हिरण्यादिकं गृहीत्वा न प्रयच्छतीति क्षेत्रादिकं ममापहरतीति वा। उक्तं च कात्यायनेन॥ न्याय्यं स्वं नेच्छते कर्तुमन्याय्यं वा करोति
य इति। पुनश्चाष्टादशधाभिधीयते। यथाह मनुः॥ तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः। संभूय च समुत्थानं दत्तस्यानपकर्म च॥ वेतनस्यैव
चादानं संविदश्च व्यतिक्रमः। क्रयविक्रयानुशयो विवादः स्वामिपालयोः। सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके। स्तेयं च साहसं चैव स्त्री-
संग्रहणमेव च। स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च। पदान्यष्टादशैतानि व्यवहारस्थिताविह इति। एतान्यपि साध्यभेदेन पुनर्बहुत्वं ग-
तानि। यथाह नारदः॥ एषामेव प्रभेदोन्यः शतमष्टोत्तरं स्मृतं। क्रियाभेदान्मनुष्याणां शतशाखो निगद्यत इति। आवेदयातीयं त्वयं नेन स्वयमेवा-
मत्यावेदयति न राजप्रेरितः स्यात्पुरुष वेश्ये रितो वेति दर्शयति॥ ॥ यथा मनुः॥ नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पूरुषः। न च प्रापितमन्ये-
न ग्रसेतार्थकथं चनेति। परैरितिपरेणापराभ्यां परैरित्येकस्यै [illegible] केन द्वाभ्यां बहुभिर्वा व्यवहारो भवतीति दर्शयति। यत्पुनरेकस्य

स्व: सम्यङ्न्यास ४

नाह्वान २

मिता वहुभिः साधं स्त्रीणांप्रेष्यजनस्यवास्मनादेयोभवेद्यादोषधर्म्मविद्भिस्तुदाहृतइतिनारदवचनातद्विन्न साध्यविषयं आवेदयति यत्पुनरेक
४ राजदूतस्तेनैवराज्ञाप्रेष्टो विनीतवेषा आवेदयेदा वेदितंवयुक्तं स्वेन्मुद्रादिनाप्रत्यर्थी आह्वानमकल्यादीनांवैमित्याद्यर्थसिद्धमितिनोन
स्मरत्यंतरे तु स्पष्टार्थमुक्तं ।। यथा ।। कालेकार्यार्थिनं पृष्ठेत्प्रणतंपुरतःस्थितं किंकार्यं कावेतपीडामेषार्थी ब्रूहि मानव केन कस्मिन्क कस्मात्
केदेवं सभागतोऽर्थं सभ्यैर्ब्रह्मा सरोस्मह । विमृश्य कार्यन्याय्यं वेदाह्वानार्थमतःपरं मुद्रां स्वां निक्षिपेत्तस्मिन्पुरुषं वा समादिशेत् ॥ अ
कल्यवालस्थविरविषमस्थक्रियाकुला च । कार्यातिपारिख्यसनिस्थपकार्यो सवाकुलाश्च । मत्तोन्मत्तप्रमत्तार्तभृत्या नाह्वानयेन्नृ
पः । न हीनपक्षां युवतिं कुले जातां प्रसूतिकां सर्व्ववर्णोत्तमां कन्यां ता ज्ञातिपिथ [illegible] भुक्ताः स्मृताः ।। तदधीनकुटुंबिन्यः स्वैरिण्यो गणि
का स्त्रियाः । निष्कुला याश्च पतितास्तासामाह्वानमिष्यते ॥ कालं देशं च विज्ञाय कार्याणां च बलाबलं । अकल्यादीनपि शनैर्यानैराह्वानयेन्नृ
पः । ज्ञात्वाभियोगं येपि स्युर्वनेगोप्रव्रजिता दयः । तानप्याह्वानयेद्राजा गुरुकार्येष्वकोपयन्निति ॥ आसेधव्यवा [illegible] रम
स्याप्यर्थसिद्धेर्वा ॥ नारदेनोक्तं ॥ वक्तव्येऽर्थे ह्यतिष्ठन्तमुत्क्रामंतं वतद्वचः ॥ आसेधयेद्विवादार्थी यावदाह्वानदर्शनं स्थानायेवेका ४

6



लक्षतीप्रवासात्कर्मणस्तथा। चातुर्विधिस्यादासेधो ना। सिद्धपविलंवयेत्। आसेधकालआसिद्धाआसिधंजोनिवर्त्तते। सविनेयो
न्यथा कुर्वन्नासेद्धा दंडभाक्भवेत्। नदीसंतारकांतारदुर्देशोपप्लवादिषु। आसिद्धस्तंपरासेधमुत्क्रामन्नापराध्नुयात्। निर्वेष्टुकामोरोगा
र्त्तोयियक्षुर्व्यसनेस्थितः। अभियुक्तस्तथान्येनराज्यकार्योद्यतस्तथा। गवांप्रचारेगोपालाःसस्यवापेकृषीवलाः। शिल्पिनश्चापि
तत्कालमायुधीयाश्चविग्रहे इति। आसेधोराजाज्ञयावरोधः। अकल्पाद्यः पुत्रादिकमन्यंवासुहृत्प्रेषयेत्तैर्वितेपरार्थवादि
न॥ योनभ्रातानचपितानपुत्रोननियोगकृत्। परार्थवादीदंड्यःस्याद्व्यवहारेषुविब्रुवन्॥ ॥ इतिनारदवचनात्। प्रत्यर्थिनिमुद्र
ले। ष्यपुरुषाणामन्यतमेनानीतेकिंकुर्यादित्यतआह। प्रत्यर्थिनोयतोलेख्यंयथावेदितमर्थिना। समामासतदर्धाहर्नामजात्यादि
चिह्नितं। अर्थ्यतइत्यर्थःसाध्यःसोस्यास्तीत्यर्थः। नप्रतिपन्नःप्रत्यर्थी। तस्याग्रतःपुरतोलेख्यंलेखनीयंयथायेनप्रकारेण
पूर्वमावेदनकालआवेदितंतथा॥ नपुनरन्यथावादित्वेनभाप्रसंगात्। अन्यवादीक्रियाद्वेषीनोपस्थायीनिरुत्तरः॥ आ
हूतःप्रपलायीचहीनःपंचविधःस्मृतः। आवेदनकालएवार्थिवचनस्यलिखितत्वात्पुनर्लेखनमनर्थकमित्यतआह। समा

न५



मिता ५

मींमासेत्यादि संवत्सरमासपक्षतिथिवारादिर्थः॥ प्रत्यर्थिनामब्राह्मणादिजात्यादिस्चिह्नतं॥ आदिशब्देन द्रव्यतत्संख्यास्थानवेला
लिंगादीनि गृह्यंते। यथोक्तं॥ अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलं। साध्यवद्वाचकपदं प्रक्रांतार्थानुबंधि च। प्रसिद्धमविरुद्धं च निश्चित
साधनक्षमं। संक्षिप्तं निखिलार्थं च देशकालाविरोधि च। वर्षर्तुमासपक्षाहोवेलादेशप्रदेशवान्। स्थानावसथसाध्याख्याजात्या
काख्वयोयुतं साध्यमानसंख्या च दात्मप्रत्यर्थिनामवत्। परात्मपूर्वजातीकराजनामाभिरंकितं। क्षमालिंगात्मपीडावत्कथिताह
र्तृदायकं। यदावेदयते राज्ञे तद्भाषेत्यभिधीयत॥ इति॥ भाषाप्रतिज्ञापक्ष इत्यनर्थांतरं॥ आवेदनसमये कार्यमात्रं लिखितं प्रत्यर्थि
तोग्रतः॥ समामासादि विशिष्टं लिख्यंत इति विशेषः। संवत्सरविशेषणाय यद्यपि सर्वव्यवहारेषु नोपयुज्यते। तथाप्याधिप्रतिग्रहक्रये
ज्प३ षु निर्णयार्थमुपयुज्यंते। आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरेति वचनात्। अर्थव्यवहारेपि। एकस्मिन्वत्सरे यत्संख्याकं यद्द्रव्यं य
तोयेन गृहीतं प्रत्यर्पितं च पुनरन्यस्मिन्वत्सरे तद्द्रव्यं तत्संख्याकं ततस्तेन गृहीतयाव्यमानो यदि ब्रूयात्सत्यं गृहीतं प्रत्यर्पितं
चेति वत्सरांतरे गृहीतं प्रत्यर्पितं न तस्मिन्वत्सर इत्युपयुज्यते। एवं मासाद्यपि योज्यं देशस्थानादयः॥ पुनः स्थावरेष्वेवोपयुज्यं

एम
५

8

जौमूलस्वामिनोरव। एतत्तद्भूमौ फलके वा पांडुलेखेनालिखित्वा आवापोद्धारेण शोधितं पश्चात्पत्रे निवेशयेत्। पूर्वपक्षं स्वभावोक्तं प्रा
ड्विवाकोऽभिलेषयेत्॥ पांडुलेखेन फलके ततः पत्रे विशोधितमिति कात्यायनस्मरणात्। शोधनं च यावदुत्तरदर्शनं कर्त्तव्यं नातः परमनावस्क
प्रसंगात्॥ अत एव नारदेनोक्तं॥ ॥ सोधयेत्पूर्ववादं तु यावन्नोत्तरदर्शनं। अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेदिति। पूर्वपक्षमशोध
यित्वैव यदुत्तरं दापयंति सभ्यास्तदा रागाल्लोभादिप्रयुक्तदंडेन सभ्यान्दंडयित्वा पुनः प्रतिज्ञापूर्वकं व्यवहारं प्रवर्त्तनीयो राज्ञेति॥ ॥
एवं शोधिते पत्रारूढे पूर्वपक्षे किं कर्त्तव्यमित्यत आह॥ श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसंनिधौ। अतो भाषार्थो येन प्रत्यर्थिना सो श्रु
तार्थस्तस्योत्तरं पूर्वपक्षादुत्तरत्र भवतीत्युत्तरं। लेख्यं लेषनीयं पूर्वावेदकस्यार्थिनः संनिधौ समीपे उत्तरं च यत्पूर्वोक्तस्य निराकरणं
तदुच्यते। यथाह। पक्षस्य व्यापकं सारमसंदिग्धमनाकुलं। अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुरिति। पक्षस्य व्यापकं निराकर
णासमर्थं। सारं न्याय्यं न्यायादनपेतं। असंदिग्धं संदेहरहितं अनाकुलं। अर्वापराविरुद्धं। अव्याख्यागम्यं अप्रसिद्धपदयोगेन।
क्लिष्टविभक्तिसमासाध्याहाराभिधानेन वा अदेशभाषाभिधानेन वा यद्व्याख्येयाय तत्सदुत्तरं तद्वद्विध्वंसप्रतिपत्ति भि

मिता· थ्याप्रत्यवस्कंदनंपूर्वन्यायश्चेति।। यथाहकात्यायनः।। ।।सत्यंमिथ्योत्तरंचैवप्रत्यवस्कंदनंतथा। पूर्वन्यायविधिश्चैवमुत्तरंस्याच्चतुर्वि-
७ धमिति। तत्रसत्योत्तरंयथा। रूपकशतंमह्यंधारयसीति पृष्टेसत्यंधारयामीति। यथाह। साध्यस्यसत्यवचनंप्रतिपत्तिरुदाहृतेति। मिथ्योत्त-
रंनाहंधारयामीति।। ।।तथाचकात्यायनः।। ।।अभियुक्तोभियोगस्ययदिकुर्यादपह्नवं। मिथ्यातंतुविजानीयादुत्तरंव्यवहारवि-
त्।तच्चमिथ्योत्तरंचतुर्विधं। मिथ्यैतन्नाभिजानामितदातत्रनसंनिधिरजातश्चास्मितत्कालइतिथ्याचतुर्विधमिति। प्रत्यवस्कंदनंनाम
सत्यंगृहीतंप्रतिदत्तंप्रतिग्रहेणलब्धमितिवा।। ।।यथाहनारदः।। ।।अर्थिनालेखितोयोर्थःप्रत्यर्थीयदितंतथा। प्रपद्यकारणंब्रूयात्प्र-
त्यवस्कंदनंस्मृतमिति। प्राङ्न्यायोत्तरंनयुक्ताभियुक्तःस्वंब्रूयादस्मिन्नर्थेअनेनाहमभियुक्तस्तत्रचायंव्यवहारमार्गेणपराजितइति।।
।।उक्तंचकात्यायनेन।। ।।आचारेणावसन्नोपिपुनर्लेखयतेयदि। सोभिधेयोजितःपूर्वंप्राङ्न्यायःसउच्यतइति। एवमुत्तरलक्षणेस्थि- उ॰
तेउत्तरलक्षणरहितानामुत्तरवदवभासमानानामुत्तराभासत्वमर्थात्प्रसिद्धं।। ।।स्पष्टमाक्रांतंस्मृत्यंतरे।। ।।सं- रा
दिग्धमन्यत्प्रकृतादत्यल्पमतिभूरिवापक्षैकदेशव्याप्यत्पर्थोत्तरयान्नैवोत्तरंभवेत्। यदप्यत्रपदमव्यापिनिगूढार्थंतथाकुलं।व्याख्या-

10



गम्यमसारं च नोत्तरस्यार्थसिद्धय इति। तत्रसंदिग्धं सुवर्णसंतमतेन गृहीतमित्युक्ते सत्यं गृहीतं सुवर्णशतं माषशतं त्वेति। प्रकृता
दन्यत। यथा सुवर्णशताद्यभियोगे पणशते धारयामीति। अत्यल्पं सुवर्णशताभियोगे पंचाशते धारयामीति। अतिभूरि द्विशतं धार
यामीति। पक्षैकदेशव्यापि हिरण्यपवस्त्राद्यभियोगे हिरण्यं गृहीतं नान्यदिति। व्यस्तपदं ऋणादानाभियोगे पदांतरेणोत्तरं। यथा सु
वर्णशताभियोगे अनेनाहृतान्निवित इति। अथापदेशस्थानादिविशेषणाव्यापि। यथा मध्यदेशे वाराणस्यां पूर्वस्यां दिशि क्षे
त्रमनेनापहृतमिति। पूर्वपक्षेत्रेमपहृतमिति निगूढार्थं सुवर्णशताभियोगे किमहमेव धारयामीत्यत्रवनिना। प्राड्विपाकः सभ्यो वा
र्थी वाऽन्यस्मै धारयतीति सूचयतीति निगूढार्थं। आकुलं पूर्वपरविरुद्धं यथा। सुवर्णशताभियोगे सत्यं गृहीतं न धारयामीति।
व्याख्यागम्यं दुश्लिष्टविभक्तिसमाससाध्याहाराभिधानेन अदेशभाषाभिधानेन वा। यथा सुवर्णशतविषये पितृऋणाभियोगे गृ
हीतशतवचनात्। सुवर्णानां पितुर्न जानामीति अत्र गृहीतशतस्य पितुर्वचनात्सुववनान्सुवर्णानां शतं गृहीतं न जानामी
ति। असारं न्यायविरुद्धं यथा सुवर्णशतमनेन वृध्या गृहीतं वृद्धिरेव दत्ता न मूलमित्यभियोगे सत्यं वृद्धिर्दत्तैन मूलं गृही

मिता त्तमितिउत्तरमित्येकवचननिर्देशादुत्तराणांशंकरेणनिरस्तः॥ यथाहकात्यायनः॥ पक्षैकदेशेयत्सत्यमेकदेशेचकारणं

८ ~~शंकरोनिरस्तः॥ मि~~ मिथ्याचैवैकदेशेचशंकरात्तदनुत्तरमिति। अनुत्तरत्वेचकारणंतेनैवोक्तं। नचैकस्मिन्विवादेतुक्रि

यास्याद्वादिनोर्द्वयोः॥ नचार्थसिद्धिरुभयोर्नचैकत्रक्रियाद्वयमिति। मिथ्याकारणोत्तरयोःसंकरेर्थिप्रत्यर्थिनोर्द्वयोरपि

क्रियाप्राप्नोति। मिथ्याक्रियापूर्ववादेकारणेप्रतिवादिनीतिस्मरणात्तदुभयमेकस्मिन्व्यवहारेविरुद्धंयथासुवर्णंरूपकश

तंवानेनगृहीतमित्यभियोगेसुवर्णंनगृहीतंरूपकशतंगृहीतंप्रतिदत्तंचेतिकारणप्राङ्न्यायशंकरेतुप्रत्यर्थिनएवक्रिया

द्वयंकारणेकौतुप्रत्यार्थीनिर्दिशेत्क्रियामिति। यथासुवर्णंगृहीतंप्रतिदत्तंरूपकेव्यवहारमार्गेणपराजितइति।

अत्रचप्राङ्न्यायेजयपत्रेणवाप्राङ्न्यायदर्शिभिर्वाभावयितव्यंकारणोत्तरेतुसाक्षिलेख्यादिभिर्भावयितव्यमितिविरोधः॥ एवमु

त्तरत्रयसंकरेपिद्रष्टव्यं। यथानेनसुवर्णंरूपकशतंवस्त्राणिचगृहीतानीत्यभियोगेसत्यंसुवर्णंगृहीतंप्रतिदत्तंचरूपकशतं

तुगृहीतंवस्त्रविषयेपूर्वन्यायेनपराजितइति। एवंचतुःसंकरेपि। एतेषांचानुत्तरत्वंयौगपद्येनातस्यतस्यासस्यत। नतेनवि

12



नाऽसिद्धः क्रमेरोत्तरत्वमेव क्रमश्चार्थिनां सभ्यानां चेच्छया। भवाद्वीति। यत्र पुनरुभयोः संकरेयस्य प्रभूतार्थविषयं च तत्क्रियो
पादानेन पूर्वं व्यवहारः प्रवर्त्तयितव्यः। पश्चादल्पविषयोत्तरोपादानेन। यत्र च संप्रतिपक्षेतूत्तरोत्तरस्य संकरस्तत्रोत्तरोत्तरोपादा
नेन व्यवहारो द्रष्टव्यः। संप्रतिपत्तौ क्रियाभावान्नाय यथाहारीतेन मिथ्योत्तरकारणे च स्यातामेकत्र चेदुभयोः सत्यं वापि सहा
न्येन [illegible] क्रमो भवतीत्यर्थः। तत्र प्रभूतार्थं यथाऽनेन सुवर्णरूपकशतं च [illegible] तत्र ग्राह्यं किमुत्तरमित्यु [illegible] क्तं। यत्र प्रभूतार्थविषये
यत्र वाऽस्य क्रियाफलं। उत्तरं तत्र तज्ज्ञेयमसंकीर्णमतोऽन्यथा। संकीर्णं भवती विशेष॥ ऐहिकक्रमो भवतीत्यर्थः। तत्र प्रभूता
र्थं यथाऽनेन सुवर्णरूपकशतं वस्त्राणि च गृहीतानि इत्यभियोगे सुवर्णरूपकशतं च न गृहीतं वस्त्राणि तु गृहीतानि प्रतिद
त्तानि चेति। अत्र मिथ्योत्तरस्य प्रभूतविषयत्वादर्थिनां क्रियामादाय प्रथमं व्यवहारः प्रवर्त्तयितव्यः पश्चादल्पविषयो व्यवहा
रः। एवं मिथ्याप्राङ्न्यायकं संकरे कारणप्राङ्न्यायसंकरेव योजनीयं। तथा तस्मिन्नेवाभियोगे सत्यं सुवर्णरूपकशतं च गृ
हीतं दास्यामि वस्त्राणि तु न गृहीतानि प्रतिदत्तानीति चाव स्वविषये पूर्वं पराजित इति चोत्तरे संप्रतिपत्तेर्भूरिविषयत्वेऽपि।

13

मित. ९

तत्र क्रियाभावान्मिथ्याद्युत्तरक्रियामादाय व्यवहारः प्रवर्त्तयितव्यः। यत्र तु मिथ्याकारणोत्तरयोः कृत्स्नपक्षव्यापित्वं यथा
अंगग्राहिकतया कश्चिद्वदति। इयं गौर्मदीयामुकस्मिन्कालेन नष्टा अद्यास्य गृहे दृष्टेति। अन्योस्य मिथ्येति। तत्प्रदर्शितकालात्पूर्वमेवा
स्मा गृहे स्थिता मम गृहे जाता चेति वदति। इदं तावत्पक्षनिराकरणसमर्थत्वान्नानुत्तरं। नापि मिथ्यैव कारणोपन्यासान्नापि कारणं।
एकदेशस्याभ्युपगमाभावात्। तस्मात्सकारणं मिथ्योत्तरमिवाय अत्र च प्रतिवादिनीति वचनात्। ननु मिथ्या क्रिया पूर्ववादे इति
पूर्ववादिनः। कस्मात्क्रिया न भवति। तस्य शुद्धमिथ्याविषयत्वात्। कारणे प्रतिवादिनीत्येतदपि कस्माच्छुद्धकारणविषयं न भवति। नै
तत्। सर्वस्यापि कारणोत्तरस्य मिथ्यासहचरितरूपत्वात् शुद्धकारणोत्तराभावात्। प्रसिद्धकारणोत्तरे प्रतिज्ञातार्थैकदेशस्याभ्यु
पगमे नैकदेशस्य मिथ्यात्वं यथा सत्यं रूपकशतं गृहीतं न धारयामि दत्तत्वात्। इति प्रकृतोदाहरणे तु प्रतिज्ञातार्थैकदेशस्याभ्युप
गमो नास्तीति विशेषः। एतच्च हारीतेन स्पष्टमुक्तं मिथ्याकारणयोर्वापि ग्राह्यं कारणमुत्तरं इति। यत्र मिथ्याप्राङ्न्याययोः पक्षव्यापित्वं
यथा रूपकशतं धारयतीत्यभियोगे मिथ्यैतदस्मिन्नर्थे पूर्वमयं मया पराजित इति। अत्रापि प्रतिवादिन एव क्रिया प्राङ्न्यायकारणोक्तौ

तुप्रत्यर्थिनि दिष्टे शेक्रियामितिवचनाच्छुद्धस्य प्रत्याम्नायस्याभावादनुत्तरत्वप्रसंगान्नासंप्रतिपत्तेरपि साध्यत्वेनोपदिष्टस्य पक्षस
सिद्धत्वेनोपपन्नासेन साध्यत्वनिराकरणादेवोत्तरत्वं यदा तु कारणप्रत्याम्नायसंकरः॥ यथा शतमेतेन गृहीतमित्यभियुक्तः प्रतिवद
ति सत्यं गृहीतं प्रतिदत्तं चेतस्मिन्नेवार्थे प्रा ङ्न्यायेनायं पराजित इति। तत्र प्रतिवादिनो यथात्रवीति नाक विहादिप्रतिवादिनोरेक
स्मिंश्च व्यवहारे क्रियाप्रसंग इति निर्णयः॥ ॥ एवमुत्तरे यत्रेति विवसिते साध्यसिद्धेः साधनायत्तत्वात्साधननिर्देशं कः कुर्यादित्य
पेक्षित आह। ततोऽर्थी लिखयेत्सद्यः प्रति ज्ञातार्थसाधनं। ततः उत्तरानंतरमर्थी साध्यवान्सद्य एवानंतरमेव लेखयेत्। प्रतिज्ञातः सा
ध्यः स चासावर्थश्च प्रतिज्ञातार्थस्तस्य साधनं साध्यतेऽनेनेति साधनं प्रमाणं। अत्र सद्यो लेखयेदिति वदतोत्तराभिधाने कालविल
म्बनमप्यंगीकृतमिति गम्यते। तच्चोत्तरत्र विवेचयिष्यते। अर्थी प्रतिज्ञातार्थसाधनं लेखयेदिति वदता चयस्य साध्यमस्ति [illegible]
[illegible] सप्रतिज्ञातार्थसाधनं लेखयेदित्युक्तमतश्च प्रत्याम्नायोत्तरे प्रत्याम्नायस्यैव साध्यत्वात्प्रत्यर्थ्येवार्थी जात इति। स एव साधनं निर्दिशे
[illegible] तथार्थी [illegible] कारणोत्तरेऽपि कारणस्यैव साध्यत्वात्कारणवाद्येवार्थीति स एव लेखयेत्। प्राङ्न्यायोत्तरे तु पूर्ववार्थीति स एव

मिता·
१·

साधनंनिर्दिशेत्।तथार्थीलेखयेदिति वदताग्रर्थ्येवलेखयेन्नान्यइत्युक्तं।अतश्चसंप्रतिपत्त्युत्तरेसाध्याभावेनभावोत्तरवादिनोर्द्व
योरप्यर्थित्वाभावात्साधननिर्देशश्चनास्तीतितावतैवव्यवहारःपरिसमाप्यतइतिगम्यते।एतदेवहारीतेनस्पष्टमुक्तं॥ प्राङ्न्यायका
रणोक्तौतुप्रत्यर्थीनिर्दिशेत्क्रियां।मिथ्योक्तौपूर्ववादीतुप्रतिपत्तौनसाभवेदिति॥ततःकिमित्यतआह॥ ॥तत्सिद्धौसिद्धिमाप्नोतिविप
रीतमतोन्यथा।तस्यसाधनस्यप्रमाणस्यवक्ष्यमाणलिखितसाक्ष्यादिलक्षणस्यसिद्धौनिर्वृत्तौसिद्धिंसाध्यस्यजयलक्षणांप्रा
प्नोति॥अतोस्मात्प्रकारादन्यथाप्रकारांतरेसाधनासिद्धौविपरीतंसाध्यस्यासिद्धिंपराजयलक्षणमाप्नोतीतिसंबंधः॥ ॥एवंव्य
वहारस्वरूपमभिधायोपसंहरति॥ ॥चतुष्पाद्व्यवहारोयंविवादेषूपदर्शितः॥व्यवहारस्वरूपःपशोदित्युक्तं।व्यवहारंसोयमित्थंचतुष्पा
च्चतुरंशकल्पनयाविवादेष्वृणादानादिषूपदर्शितोवारीति।तत्रप्रत्यर्थिनोग्रतोलेख्यमितिभाषापादःप्रथमः।तार्थस्योत्तरंलेख्यमि
त्युत्तरपादोद्वितीयः।ततोर्थीलेखयेत्सद्यइतिक्रियापादस्तृतीयः।तत्सिद्धौसिद्धिमाप्नोतीतिसाध्यसिद्धिपादश्चतुर्थः॥यथोक्तं॥ १
परस्परंमनुष्याणांस्वार्थविप्रतिपत्तिषु।वाक्यान्न्यायाद्व्यवस्थानंव्यवहारउदाहृतः॥भाषोत्तरक्रियासाध्यसिद्धिपादश्च

६३-६३ श्री

र्वः ॥ यथोक्तं ॥ परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु । वाक्यान्यायाद्यवस्थानं व्यवहार[illegible]र्विवक्षिभिः ॥ आक्षिप्तचतुरंश
स्तु चतुष्पादभिधीयत इति ॥ संप्रतिपत्पुनरेतुसाधना निर्देशाज्ञाषार्थस्यासाध्यत्वाद्वनसाध्यसिद्धिभिः कर्मवृत्तिभिः ॥ आक्षिप्तलक्षण
पादो स्तीति द्विपौस्त्विमेवाउत्तराभिधानाद्यनंतरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रियास्यादितिपरामर्शनाथिलक्षणस्यप्रत्याकलि
तस्ययोगीश्वरेणाव्यवहारपादत्वेनानभिधानाव्यवहर्तृसंवंधाभावाद्यनपवहारपादत्वमितिस्थितं ॥ ॥ एवं सर्वव्यवहारोपयोगि
नां व्यवहारमात्रकाममभिधायाधुनाक्वचिद्व्यवहारविशेषेकंचिद्विशेषंदर्शयितुमाह ॥ अभियोगमनस्तीर्यनैनंप्रत्यभियोज
येत् । अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत् । अभियुक्तौ तद् इत्यभियोगोऽपराधस्तमभियोगमनिस्तीर्यापरिहृत्यबेनमभियो
क्तारं न प्रत्ययोजयेदपराधेनन संयोजयेत् । यद्यपि प्रत्यवस्कंदप्रत्यभियोगत्रूपं तत्वापि स्वपराधपरिहारात्माकत्वान्नास्य प्र
तिषेधस्य प्रतिषेधस्याविषयः । अतः स्वाभियोगानुपमर्दन रूपस्य प्रत्यभियोगस्यायं निषेधः ॥ इदं प्रत्यर्थिनमधिकृत्योक्तमथा
र्थिनं प्रत्याह च अभियुक्तं च नान्येनेति अन्येनाभियुक्तमनिस्तीर्णाभियोगमन्यार्थी नाभियोजयेत् । किंच उक्तमावेदनस
मये यदुक्तं तद्विप्रकृतिं विकृतिं दस्य भावं न नयेत्त्वापयेत् ॥ एतदुक्तं भवति ॥ यद्वस्तु येन रूपेणावेदनसमये निरूपितं तद

मिता
११

स्तुतथैव भाषाकाले पि लेखनीयं॥ नान्यथेति॥ ननु प्रत्यर्थिनो लेख्यं यथावेदितमर्थिनेत्यत्रैवेदं युक्तं किमर्थं पुनरुच्यते नोक्तं वि
प्रकृतिं नयेदिति॥ उच्यते॥ यथावेदितमर्थिनेत्यनेनावेदनसमये यद्रूपितं तद्वस्तु तथैव भाषाकाले पि लेखनीयं। एकस्मिन्नपि पदे न वस्त्वं
तरमित्युक्तं यथानेन रूपकशतं वृध्या गृहीतमित्यावेदनसमये प्रतिपाद्य प्रत्यर्थिसंनिधौ भाषासमये एव सुवर्णशतं वृध्या गृहीतमि
ति। न वक्तव्यं तथा सत्यपि पदांतरगमने पि वस्त्वंतरगमनाद्धीनवादी दंड्याः स्यादिति नोक्तं विप्रकृतिं नयेदित्यनेनैकवस्तुत्वे पि पदां
तरगमनं निषिध्यते। यथा रूपकशतं वृध्या गृहीत्वा यन्न प्रयच्छतीत्यावेदनकालो भिधाय भाषाकाले रूपकशतं वलादपहृतवा
निति वदतीति तत्र वस्त्वंतरगमनं निषिद्धमिह तु पदांतरगमनं निषिध्यत इति न पौनरुक्त्यं। एतदेव स्पष्टीकृतं नारदेन पूर्ववादं परि
त्यज्य यो न्यमालंबते पुनः॥ पादसंक्रमाणात्ज्ञेयो हीनवादी स वै नर इति। हीनवादी दंड्यो भवति न प्रकृतादर्थाद्धीयते। अतः प्रत्य
र्थिनो ऽर्थिनश्च प्रमादपरिहारार्थ एवायमभियोगमनिस्तीर्येत्याद्युपदेशो न प्रकृतार्थसिद्धिविषयः। अत एव दर्पाच्छलं नि
रस्य भूतेन व्यवहारान्नयेन्नृप इति। एतच्चार्थव्यवहारद्रष्टव्यं। मन्युकृते तु व्यवहारे प्रमादाभिधाने ऽप्रकृतादपि व्यवहारा
दीयत एव यथाह नारदः॥ ॥ सर्वेष्वर्थविवादेषु वाक्छलेनावसीदति। परद्रष्टव्यं। मन्यु परस्त्रीभूम्यृणादाने सास्योप्यर्थान हीं

रा
११

18



यतइति ॥ अस्यार्थः ॥ सर्वेष्वर्थविवादेषुनमन्युक्तेषुवाक्छलेप्रमादाभिधानेपितावसीदतिनपराजीयते । नप्रकृतादर्थाद्धीयत
इत्यर्थः । अत्रोदाहरणंपरस्त्रीत्यादि । परस्त्रीभूम्यृणादानेप्रमादाभिधानेनदंड्योपियथाप्रकृतादर्थान्नहीयते । एवंसर्वेष्वर्थविवा
देष्विति अर्थविवादग्रहणान्मन्युकृतविवादेननप्रकृताभिधानेनप्रकृतादेननप्रकृताभिधानेनप्रकृतादप्यर्थाद्धीयतइतिगम्य
ते । यथाहमेतेनसिरसिपादेनताडितइत्यावेदनेऽसमयेभिधायभाषाकालेहस्तेनपादेताडितइति । वदन्नकेवलंदंड्यःपराजीय
तेच ॥ ॥ अभियोगमनस्तीर्यनैनंप्रत्यभियोजयेदित्यस्यापवादमाह ॥ ॥ कुर्यात्प्रत्यभियोगंचकलहेसाहसेषुच । कलहेवाग्दंडपा
रुष्यात्मकेसाहसेषुविषशस्त्रादिनिमित्तप्राणव्यापादनादिषुप्रत्यभियोगेसंभवेस्वाभियोगमनस्तीर्याप्यनियोक्तारंभ
प्रत्याभियोग्योदंडाल्पत्वं ॥ ॥ यथाहनारदः ॥ जपेत । नात्वचापिपूर्वपक्षात्उपमर्दनरूपत्वेनाउत्तरत्वात्प्रत्यभियोगस्यप्रतिज्ञा
तरत्वेयुगपद्व्यवहारासंभवःसमानः सत्यंनात्रयुगपद्व्यवहारायप्रत्यभियोगोपदेशः अपितुन्यूनदंडप्राप्त्यर्थेअधिकदंडनिवृत्त
येवा । तथाहि अनेनाहंताडितः सन्नोयेत्प्रत्यभियोगोपूर्वमहमनेनताडितः संप्रोवेतिप्रत्यभियोगेदंडाल्पत्वं ॥ ॥ यथाह

मिता नारदः॥ ॥ पूर्वमाक्षारयेद्यस्तु नियतं स्यात्सद्दोषभाक् पश्चाद्यः सोऽप्यसत्कारी पूर्वे तु विनये गुरुरिति॥ यदा पुनर्युगप
२२ द्द्वयोस्ताडनादिप्रवृत्तिस्तत्राधिकदंडनिवृत्तिः॥ पारुष्ये साहसे चापि युगपत्संप्रवृत्तयोः॥ विशेषश्चेन्न लभ्येत विनयः स्यात्समस्त
योरिति॥ एवं युगपद्व्यवहारप्रवृत्त्यसंभवोऽपि कलहादौ प्रत्यभियोगोऽर्थवान् ऋणादिषु तु निरर्थक एव॥ ॥ अर्थिप्रत्यर्थिनो
र्विधिमुक्त्वा सभ्यस्य सभापतेः कर्त्तव्यमाह॥ ॥ उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये॥ उभयोरर्थिप्रत्यर्थिनोः सर्वेषु विवा
देषु निर्णयस्य कार्यं कार्यनिर्णयः॥ आहिताग्न्यादिषु पाठात्कार्यशब्दस्य पूर्वनिपातः॥ निर्णयस्य च कार्यं साधितधनदानं दंडदानं
च तस्मिन्प्रतिभूः प्रतिभवति तत्र तत्कार्ये तद्दद्यतीति प्रतिभूर्ग्राह्यः सभ्येन सभापतिना॥ तस्यासंभवेऽर्थिप्रत्यर्थिनो रक्षणे पु
रुषा नियोक्तव्याः तेभ्यश्च ताभ्यां प्रतिदिनं वेतनं देयं॥ ॥ यथाह कात्यायनः॥ ॥ अथ चेत्प्रतिभूर्नास्ति कार्ययोग्यस्तु वादिनः॥ स
रक्षितो दिनस्यांते दद्याद्भृत्याय वेतनमिति॥ ॥ अर्थिप्रत्यर्थिनोर्निर्णयकार्ये सभ्येन सभापतिना प्रतिभूर्ग्राह्य इत्युक्तं राम
किं तन्निर्णेयं कार्यं यस्मिन्प्रतिभूर्ग्राह्य इत्यपेक्षित आह॥ ॥ निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समं॥ मिथ्याभियोगी द्वि १२

20

गुणंम नियोगाद्धनं च हेतेरा ऽर्थिना निवेदितस्याभियोगस्य प्रत्यर्थिनापह्नवे कृते यदार्थिना साक्ष्यादिभिर्भावितोंगीकारितः प्रत्य
र्थ्यंत दा दद्याद्धनं प्रकृतमर्थिने राज्ञे च तत्सममपलापदंडं। अथार्थी भावयितुं न शक्नोति तदा मिथ्याभियोगी जात इत्यभियोगा
दभियुक्तधनाद्द्विगुणं धनं दद्याद्राज्ञे। आध्याये प्रत्यवस्कंदने चैतनमेव योजनीयं। तत्रार्थ्येवापह्नववादीति प्रत्यर्थिना भाषितो रा
ज्ञे प्रकृतात् धनात् समं दंडं दद्यात्। अथ प्रत्यर्थी प्राङ्न्याय कारणं वा भावयितुं न शक्नोति। तदासौ मिथ्याभियोगी राज्ञे द्विगुणं
धनं दद्यादर्थिने च प्रकृतं धनं। संप्रति प्रस्तुतेषु तु दंडाभाव एव। एतच्च ऋणादानविषयमेवापदांतरेषु तत्र तत्र दंडाभिधानाद्ध
नादधनव्यवहारेष्वसंभवाच्च न सर्वविषयत्वा राज्ञा धमर्णिकोदाप्य इत्यस्य ऋणादानविषयत्वेपि तत्रैव विशेषवचनस्य मा
एतदेवसर्वव्यवहारविषयत्वेनापि योजनीयं। कथं। अभियोगस्य निह्नवे अभियुक्तेन कृते यद्यभियोक्ता साक्ष्यादिभिर्भावि
तोभियुक्तस्तदा तत्समं। तत्र तत्र प्रतिपदोक्तमेव च शब्दोवधारणे धनं दंडं च दद्याद्राज्ञ इत्यनुवादः। अथाभियोक्ता अभियोगमभा
वयितुं न शक्नोति तदा मिथ्याभियोगीति प्रतिपदोक्तं धनं दंडं द्विगुणं दद्यादिति विधीयते। अत्रापि प्राङ्न्याये प्रत्यवस्कंदने च

भिता पूर्वदेवयोजनीयं।ततोर्थीलेखयेत्सद्यःप्रतिज्ञातार्थसाधनमितिवदतोत्तरस्यादलेखनेकालप्रतीक्षणंदर्शितं तत्रापवाद
१३ माह॥ ॥साहसस्तेयपारुष्यगोभिसापतपेस्त्रियांविवादयेत्सद्यएवकालोन्यत्रेछया स्मृतः।साहसेविषशस्त्रादिनिमित्तेप्र
राव्यापादनादिः।स्तेयंचौर्यंपारुष्यंवाग्दंडपारुष्यंवत्समारणलक्षणोगौर्यास्त्री॥।अभिशापःपातकाभियोगःअत्पयःस्व
राधनानिपातः।तस्मिंद्वंद्वैकवद्भावादेकवचनं।स्त्रियांकुलस्त्रियांदास्यांवाकु।स्त्रियांवारिक्थविवादोदास्यांस्वत्रविवादे
विवादयेत्सद्यएवनकालप्रतीक्षणंकुर्यात्।अन्यत्रविवादांतरेषुकालःइछयार्थिप्रत्यर्थिसभ्यसभापतीनास्मृतउक्तः॥
दुष्टलक्षणमाह॥ ॥देशाद्देशांतरंयातिसृक्किणीपरिलेढिवाललाटंस्विद्यतेवास्यमुखंवैवर्ण्यमेतिच।परिशुष्यत्स्खलद्वा
क्योविरुद्धंबहुभाषते।वाक्चक्षुःपूजयतिनोननौष्ठौनिर्भुज्यजत्यपिस्वभावाद्विकृतिंगच्छेन्मनोवाक्कायकर्मभिः॥अभियो
गेष्वसाक्षेवादुष्टःसपरिकीर्तितः।मनोवाक्कायकर्मभिर्यःस्वभावादेवनभयादिनिमित्ताद्विकृतिंविकारंपातिगच्छसा १३
वभियोगेसाक्षेवाडष्टःपरिकीर्तितः।तांश्चकृतिविभ्रमद्दर्शयति।देशाद्देशांतरंयातिनक्षविद्रवतिष्ठते।सृक्किणीतुष्ठपर्यंतौ

22



परिलेढि जिह्वाग्रेणयद्वृत्वातीति। कर्मणोविक्रतिंग्रस्खलता रंस्विद्यतेस्वेदविंदुवितंभवति मुखंचवैवर्ण्यंविपरांतिंपांडुत्वं
कृष्णत्वंवायातिगच्छतीतिकायस्यविकृतिः॥ परिस्खलद्वाक्यः परिस्खलत्सगद्गदंसवलद्यत्यस्तंवाक्यंयस्यसतथोक्तः॥ वि
रुद्धंपूर्वापरविरुद्धंपूर्वापरविरुद्धंवहुवचनंभाषतइतिवाचोविकृतिः परोक्तांवाचंप्रतिवचनादानेननपूजयतेवक्तुर्वीक्षतिवीक्षणेनेन
पूजयतीतिमनसोपिविकृतेर्लिंगां। तथाओष्ठौनिर्भुजनिवज्जयतीत्यपिकायस्यविकृतिः एतच्चदोषसंभावनामात्रमुच्यते। नदो
षनिश्चायंयश्चाभादिकंनैमित्तिकारयोविविकस्यदुर्ज्ञानत्वान्नाथकश्चिन्निपुनमतिविवेकंप्रतिपद्येततथापिनपराजय
निमित्तंकार्यंभवति। नहिमरिष्यतेलिंगदर्शनेनमृतकार्यंकुर्वंत्येवमस्यपराजयोभविष्यतीतिलिंगादवगतेपिनपराजय
मित्तकार्यप्रसंगः॥ ॥किंच॥ ॥संदिग्धार्थंस्वतंत्रोयःसाधयेद्यश्चनिष्पतेत्। नचाहूतोवदेत्किंचिद्धीनोदंड्यश्चसस्मृ
तः॥ संदिग्धमर्थमधमर्णेनानंगीकृतमेवयास्वतंत्रःसाधननिरपेक्षःसाधयत्यासेधादिनासहितोदंड्यश्चभवतियश्च
स्वयंप्रसप्रतिपन्नंसाधितंयाच्यमानोनिष्पतेत्पलायते। पश्चाभियुक्तोराज्ञावाहूतःसदसिनकिंचिद्वदतिसोपिहीनोदंड्य।

मिता
१४

स्वसस्मरतइतिसंबध्यते।अभियोगेऽर्थसाक्ष्येवाऽदुष्टःसपरिकीर्त्तितइतिप्रकृतत्वाद्धीनपरिज्ञानमात्रमेवमाभूदितिदंडग्रहणं
दंडस्यापिसास्योप्यर्थादहीतत्वदर्शनादत्रतन्मात्रमाभूदितिहीनग्रहणं॥ ॥अथयत्रद्वावपियुगपद्धर्माधिकरणंप्राप्तौभा
षावादिनौतद्यथा।कश्चित्प्रतिग्रहेणक्षेत्रंलब्ध्वाकिंचित्कालमुपभुज्यकार्यवशात्सकुटुंबोदेशांतरंगतः।अन्योपितदेवक्षे
त्रंप्रतिग्रहेणलब्ध्वाकंचित्कालमुपभुज्यदेशांतरगतस्ततोद्वावपियुगपदागत्यमदीयमिदंक्षेत्रंमदीयमिदंक्षेत्रमितिपरस्प
रंविवादमारोहद्धर्माधिकरणंप्राप्तौ॥तत्रतस्यक्रियेत्याकांक्षितआह॥साक्षिषूभयतःसत्सुसाक्षिणःपूर्ववादिनः॥पूर्व
पक्षेऽधरीभूतेभवंत्युत्तरवादिनः।उभयतउभयोरपिवादिनोःसाक्षिषुसंभवत्सुसाक्षिणःपूर्ववादिनः॥पूर्वस्मिन्कालेम
याप्रतिगृहीतमुपभुक्तंचेतियोवदत्यसौपूर्ववादीनपुनर्यःपूर्वंनिवेदयतितस्यसाक्षिणः।प्रष्टव्याः यदात्वनास्त्ववदतिस
त्यमनेनपूर्वंप्रतिगृहीतमुपभुक्तंचकिंतुरोज्ञदनेवक्षेत्रमस्मादेवक्रयेणलब्धामह्यंदत्तमन्येनवाप्रतिग्रहेणलब्धामह्यंदत्त
मितितत्रपूर्वपक्षोरसाध्यानतयाधरीभूतस्तस्मिन्पूर्वपक्षेधरीभूतेभवत्युत्तरवादिनः॥उत्तरकालंप्रतिगृहीतमुपभुक्तंचेति

राम
१४



वादिनः साक्षिणः प्रष्टव्या भवन्ति । इदमेवं व्याख्यानं युक्ततरं मिथ्योत्तरे पूर्ववादिनः साक्षिणो भवन्ति । प्राङ्न्याय कारणोक्तौ पूर्वप
क्षे धरीभूते उत्तरव्याख्यानेमेव स्पष्टीकृतं नारदेन । मिथ्याक्रियापूर्ववाद वादिनः साक्षिणो भवतीति व्याख्यानमयुक्तं । अत्र स्यार्थस्य
ततोर्थालेखये न्सद्यः प्रतिज्ञातार्थसाधनामित्यनेनोक्तत्वात् पुनरुक्तिप्रसंगात् । पूर्वव्याख्यानेमेव स्पष्टीकृतं नारदेन । मिथ्या
क्रियापूर्ववादे कारणे प्रतिवादिनि । प्राङ्न्याय विधिसिद्धौ तु जयपत्रं क्रिया भवेदित्युक्ताद्वयोर्विवदतोरर्थद्वयोः सत्सु च साक्षिषु
पूर्वपक्षो भवेद्यस्य भवेयुस्तस्य साक्षिण इति वदता ॥ एतस्यैव सर्वव्यवहारविलक्षणत्वाद्भेदेनोपन्यासः ॥ ॥ अपि च ॥ ॥ स
पणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत् । दंडं च स्वपणं चैव धनिने धनमेव च ॥ यदि विवादो व्यवहारः सपणः पणनं पणस्तेन स
ह वर्त्तत इति । सपणः स्यात्तत्र हीनं तु दापयेत् । दंडं च स्वपणं चैव धावि दात्तत्र तस्मिन्सपणे व्यवहारे हीनं पराजितं पूर्वोक्तं दंडं स्व
कृतं च पणं च राज्ञे अर्थिने च विवादास्पदीभूतं धनं दापयेद्राजा । अत्र पुनरेकः कोपावेशवशाद्यद्यहमत्र पराजितो भवामि तदा
पणशतं दास्यामीति प्रतिजानीते अन्यस्तु न किंचित्प्रतिजानीते तत्रापि व्यवहारः प्रवर्त्तते ॥ तस्मिंश्च प्रवृत्ते पणप्रतिज्ञा वा

निता
१५

दीयदि हीयते तदा स एव सपणं दंडं दाप्यः। अन्यस्तु पराजितो दंडं दाप्यो न पणं। स्वपणं चेति विशेषोपादानात्। यत्र त्वेकः श-
तमन्यस्तु पंचाशतं प्रतिजानाति तत्रापि पराजये स्वकृतमेव पणं दाप्ये। सपणश्चेद्विवादः स्यादिति वदता पणरहितोऽपि विवादो दर्शि-
त इति॥ ॥किंच॥ ॥छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः। भूतमप्यनुपन्यस्तं हीयते व्यवहारतः॥ छलं प्रमादाभिहितं निर-
स्य परित्यज्य भूतेन वस्तुतत्त्वानुसारिणा व्यवहारान्नयेदंतं नृपः। यस्माद्भूतमपि वस्तुतत्त्वमप्यनुपन्यस्तमनभिहितं ही-
यते हानिमुपगच्छति व्यवहारतो व्यवहारेण साक्ष्यादिभिस्तस्माद्भूतानुसारणं कर्त्तव्यापथार्थिप्रत्यर्थिनो सत्यमेव
वदन्तस्तथा सभ्येन सभापतिना यतितव्यं सामादिभिरुपायैस्तथा सति साक्ष्यादिनैरपेक्ष्येणैव निर्णयो भवति। अथ
सर्वथापि भूतानुसरणं न शक्यते कर्तुं तथा सति साक्ष्यादिभिर्निर्णयं कार्य इत्यनुकल्पः। यथोक्तं॥ भूतच्छलानुसा-
रित्वाद्द्विगतिं समुदाहृतः॥ भूतं तत्त्वार्थसंयुक्तं प्रमादाभिहितं छलमिति तत्र भूतानुसारी व्यवहारो मुख्यश्छलानु-
सारी त्वनुसारी त्वनुकल्पः। साक्षिलेखादिभिर्व्यवहारनिर्णये कदाचिद्भूतानुसरणं भवति। कदाचिन्न भव

राम
१५

ति। साक्ष्यादीनां व्यभिचारस्यापि संभवात्॥ ॥स्मृतेमेवानुपन्यस्तं यतेव्यवहारस्तत्र इत्यत्रोदाहरणमाह। निह्नुते लिखितं नैकमेकदेश
विभावितः॥ दाप्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः॥ नैकमनेकं स्वर्णरजतवस्त्रादि लिखितमभियुक्तमभियुक्तोर्थिना प्रत्य
र्थी यदि सर्वमेव निह्नुतेऽपजानीते तदार्थिनैकदेशो हिरण्ये साक्ष्यादिभिः निगप्रत्यर्थी भावितो गाकारितः सर्वं रजताद्यर्थं पूर्वलि
खितं तद्दाप्योऽर्थिने नृपेण। न ग्राह्यस्त्वनिवेदितः पूर्वं भाषाकालेऽनिवेदितः पश्चादर्थिना पूर्वमपाविस्मृतमिति निवेद्यमानो न ग्रा
ह्यनादर्त्तव्यो नृपेण। एतद्वचनकेवलं वा नैकमेकदेशे प्रत्यर्थिनो मिथ्यावादित्वनिश्चयादेकदेशान्तरेपि मिथ्यावादित्वसं
भवात्। अर्थिनस्त्वैकदेशे सत्यवादित्वनिश्चयादेकदेशान्तरेपि सत्यवादित्वसंभवादेवं तर्कापरनामसंभवानाप्रत्ययानु
गृहीतादस्मादेव योगीश्वरवचनात्सर्वदापनीयं नृपेणेति निर्णयः। एवं च तर्कवाक्यानुसारेण निर्णये क्रियमाणे वस्तु
तोऽन्यथात्वेपि व्यवहारदर्शिनां न दोषः॥ ॥तथा च गौतमः॥ ॥न्यायाधिगमे तर्कोऽभ्युपायस्तेनाभ्यूह्य यथास्थानं गम
येदित्युक्तात्तस्माद्राजाभार्यावनिंद्यानित्युपसंहरति। न चैकदेशविभावितोऽनुपादेयवचनः प्रत्यर्थीत्येतावदिहाभ्य

निता॰ तोएकदेशविभावितोन्यरूपेणसर्वदांप्यइतिवचनाच॥ यंतुकात्यायनेनोक्तं॥ ॥अनेकार्थाभियोगेयावत्ससाधनी॥ सक्षिभिस्ता
१६ वदेवासौलभतेसाधितंधनमितितत्पुत्राद्दिदेयंपित्राघूरणविषयं।तत्रहिबहूनर्थानभियुक्तःपुत्रादिर्निजानामीतिब्रूतिवदन्निहववा
दीनभक्तीत्येकदेशविभावितोपिनक्कविद्दसत्यवादीतिनीङ्तेलिखितंनैकमितिशास्त्रांतरंनवक्तीति।निह्नवाभावाद्देयेद्वि
तैनकीभावाच्च।अनेकार्थाभियोगेपीतिकात्यायनवचनंसामान्यविषयंविशेषशास्त्रस्यविषयंनिह्नवोत्तरंपरिहत्यात्मानोनरेश
वर्त्तते।ननुऋणादिषुविवादेषुस्थिरशायेषुनिश्चितंऊनेवाभ्यधिकेवार्थेप्रोक्तेसाध्यंनसिध्यतीतिवदताकात्यायनेनानेकार्था
भियोगेसाक्षिभिरेकदेशेवाधिकेऽग्रधिकोदाभावितेसर्वमेवनसिध्यतीत्युक्तं।तथासत्येकदेशेभावितेऽभाविनैकदेशसि
द्धिकृतेस्ता॥ ॥उच्यते॥ ॥लिखितसर्वार्थसाधनतपोपन्यस्तेः॥सार्वमेवन।साक्षिभिरेकदेशाभिधानेवाकृत्स्नमेवसाध्यंनसिध्यनसि
ध्यतीतितस्यार्थस्तत्रापिनिश्चितंनसिध्यतीतिवचनात्पूर्ववत्संशयएवेतिप्रमाणांतरस्यावसरोरत्येवछलंनिरस्येति नियमात्।सा
हसांदौतुसकलसाध्यसाध्यसाधनतयोद्दिष्टैसाक्षिभिरेकदेशेपिसाधितेकृत्स्नसध्यसिद्धिर्भवत्येवबतावतैवसाहसादेः

सिद्धत्वात्कात्यायनवचनव॥ साध्यार्थांशेपिगदितेसाक्षिभिःसकलंभवेत्॥ स्त्रीसंगेसाहसेचौर्येयत्साध्यंपरिकीर्त्तितमिति॥ ॥नतुनिह्नुतेलिखि
तेनैकमितायंस्मृतिस्तथाभियोगेपीतियमपिस्मृतिरेवातत्रानयोःस्मृत्योःपरस्परविरोधेसतीतरेतरवाधनादप्रामाण्यकस्मान्नभव
तीतिविषयव्यवस्थापनाद्वाकुकिमित्याश्रीयतइत्यत्राह॥ स्मृत्योर्विरोधेन्यायस्तुबलवान्व्यवहारतः॥ यत्रस्मृत्योःपरस्परतोविरोधस्तत्र
विरोधपरिहारायविषयव्यवस्थापनाद्वाउत्सर्गापवादाद्वालक्षणोन्यायोबलवान्समर्थः॥ सचन्यायः॥ कुतःअवगन्तव्यइत्यत्राह॥ वहा
रइति॥ व्यवहारात्वृद्धव्यवहारादन्वयव्यतिरेकलक्षणादवगम्यते॥ अतएवप्रकृतोदाहरणेविषयव्यवस्थोक्ता॥ एवमन्यत्रापिविषय
व्यवस्थाविकल्पादिर्यथासंभवयोज्यः॥ ॥एवंसर्वत्रप्रसंगेयवादमाह॥ ॥अर्थशास्त्रात्तुबलवद्धर्मशास्त्रमितिस्थितिः॥ धर्मशास्त्रा
नुसारेणोत्पनेवोशनसाद्यर्थशास्त्रस्यतिरस्तत्वाद्धर्म्मसास्त्रांतर्गतमेवराजनीतिलक्षणमर्थशास्त्रमिहविवक्षितं॥ अर्थसास्त्रधर्म
शास्त्रस्मृत्योर्विरोधेअर्थशास्त्रंबलवदितिस्थितिर्मर्यादा॥ यद्यपिसमानकर्तृकतयार्थशास्त्रधर्मशास्त्रयोःस्वरूपेनोप
पत्तौविशेषोनास्ति॥ तथापिप्रमेयस्यधर्म्मस्यप्राधान्यादर्थस्याप्राधान्यद्वाप्राधान्याधर्म्मशास्त्रंबलवदित्यभिप्रायः॥ धर्म्म

मिता
२७

स्पष्टाव्याख्यानं सा स्वादौ दर्शितं। तस्माद्धर्मशास्त्रार्थशास्त्रयोर्विरोधेऽर्थशास्त्रस्य विरोध एव न विषयव्यवस्था नापि विकल्पः। किमत्रोदा
हरणं। गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं। आततायिनमायांतं हन्यादेवाविचारयन्॥ नाततायिवधे दोषो हंतुर्भवति कश्चन। प्रक
काशं वा मन्युस्तं मन्युमृच्छति॥ तथा आततायिनमायांतमपि वेदांतगं रणे। जिघांसंतं जिघांसीयान्न तेन ब्रह्महा भवे
दित्यर्थशास्त्रं। इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजं कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते इत्यादि धर्मशास्त्रं। तयोर्विरोधे धर्म
शास्त्रं बलवदिति युक्तं। अनयोरेकविषयत्वासंभवेन विरोधाभावान्न बलाबलचिंतावसरः। तथा हि। शास्त्रं द्विजातिभिर्ग्राह्यं धर्मो य
त्रोपरुध्यते इत्युपक्रम्य आत्मनश्च परित्राणे दक्षिणानां च संगरे। स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न दुष्यति। आत्मरक्षणे दक्षिणादीनां यज्ञो
पकरणानां रक्षणे युद्धे च स्त्रीब्राह्मणहिंसायां चाततायिनमकूटशस्त्रेण घ्नन्न दंडभागित्युक्तं। तस्यार्थवादार्थमिदमुच्यते। गुरुं वा बालवृ
द्धौ वेत्यादि। गुर्वादीनत्यंतावध्यानप्याततायिनो हन्यात्किमुतान्यानिति। वाशब्दश्रवणादपि वेदांतगमित्यपिशब्दश्रवणाच्च गुर्वादीनां
वध्यत्वप्रतीतिः। नाततायिवधे दोषो ऽन्यत्र गोब्राह्मणवधादिति सुमंतवचनाच्च। आचार्यं च प्रवक्तारं पितरं मातरं गुरुं न हिंस्या

राम
५

30

नै

द्ब्राह्मणान्गाश्च सर्वांश्चैव तपस्विन इति मनुवचनाच्च॥ आचार्यादीनामाततायिनां हिंसाप्रतिषेधेनेदं वचनमर्थवन्नान्यथा।
हिंसामात्रप्रतिषेधस्य शैवे सामान्यशास्त्रेणैव सिद्धत्वात्। नाततायिवधे दोषो हंतुर्भवति कश्चेत्येतदपि ब्राह्मणादिव्यतिरिक्तवि
षयमेव। यतोऽग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारहरश्चैव षडेते आततायिनः। तथा। उद्यतासिर्विषाग्निश्च शापोद्य
तकरस्तथा। आथर्वणेन हंता च पिशुनश्चापि राजनि। भार्यातिक्रमकारी च रंध्रान्वेषणतत्परः॥ यएवेतिप्रमाणांतरस्यावसरो
स्येव छलं निरस्येति नियमात्। साहसादौ तु सकलसाध्यसाधनतयोद्दिष्टो साक्षिभिरेव देशेऽपि साक्षित्वेन स्वसाध्य
सिद्धिर्भवत्येव। तावतैव साहसादेः सिद्धत्वात्कात्यायनवचनाच्च॥ साध्यार्थे शेषिगं दिते साक्षिभिः सकलं भवेत्। स्त्रीसंगे
एवमाद्यान्विजानीयात्सर्वानेवाततायिनः॥ इति सामान्येनाततायिनो दर्शिताः॥ अतएव ब्राह्मणादयोऽप्याततायिन आत्मादित्राणा
र्थं हिंसानभिसंधिना निवार्यमाणाः प्रमादाद्यदि ते विपद्येरन् तत्र लघुप्रायश्चित्तं राजदंडाभावश्चेति निश्चयः। तस्मादन्यदि
होदाहरणं वक्तव्यम्। ॥इति तदुच्यते॥ ॥हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः॥ अतो यतेत तत्प्राप्त्या वितपर्थ शास्त्र।

31

मिता:
१८

धर्मशास्त्रानुसारेणक्रोधलोभविवर्जितः॥ ॥इतिधर्म्मशास्त्रं॥ ॥तयोःक्वचिद्विषयेविरोधोभवति॥ यथाचतुष्पाद्व्यवहारेवर्त्तमानेएका
स्यजयेवधार्यमाणो। मित्रलब्धिर्भवतिनधर्मशास्त्रमनुसृतंभवति। अन्यस्यजयेनधार्यमाणोधर्म्मशास्त्रमनुसृतंभवति। मित्रलब्धिर्वि
परीतातत्रार्थशास्त्राद्धर्म्मशास्त्रंबलवत्। अतएवधर्मार्थसंनिपातेर्थग्राहिणः। एतदेवेतिप्रायश्चित्तस्यगुरुत्वंदर्शितमापस्तंबे
न॥ एतदेवेतिद्वादशवार्षिकंप्रायश्चित्तंपरामृशति॥ ततोर्थीलेखयेत्सद्यःप्रतिज्ञातार्थसाधनमित्युक्तं॥ किंतत्साधनमित्यपेक्षि
तआहप्रमाणंलिखितंभुक्तिःसाक्षिणश्चेतिकीर्तितं। एषामन्यतमाभावेदिव्यान्यतममुच्यते। प्रमीयतेपरिच्छिद्यतेनेनेतिप्रमाणं। तच्च
द्विविधंच्चद्विविधंमानुषंदैविकंचेति॥ तत्रमानुषंप्रमाणंत्रिविधंलिखितंभुक्तिःसाक्षिणश्चेतिकीर्तितंमहर्षिभिः॥ तत्रलिखितंद्वि
विधंशासनंचीरकंचेति। शासनमुक्तलक्षणं। चीरकंतुवक्ष्यमाणलक्षणं। भुक्तिरुपभोगः। साक्षिणोवक्ष्यमाणस्वरूपप्र
काराः॥ ननुलिखितस्यसाक्षिणांचशब्दाभिव्यक्तिद्वारेणशब्दांतर्भावाद्युक्तं। प्रमाणत्वं। भुक्तेस्तुकथंप्रमाणत्वं॥ ॥उच्य
ते॥ ॥भुक्तिरपिकैश्चिद्विशेषणैर्भुक्तास्वत्वहेतुभूतक्रयादिकमव्यभिचारादनुमापयंत्युपपद्यमानावाकल्पयंती

रा
१८

32

त्पन्नमानेर्थापत्तौ वांतर्भवतीति प्रमाणमेव। एषं हि लिखितादीनां त्रयाणामन्यतमस्याप्यभावे दिव्यानां वक्ष्यमाणाग्न्यादिरूपभेदानामन्यतम
जानिर्देश्या कालद्रव्याद्यपेक्षया प्रमाणमुच्यते। मानुषाभाव एव दिव्यस्य प्रमाणमस्मादेव वचनादवगम्यते। दिव्यस्य स्वरूपप्रमाणप
योरागमावगम्यत्वात्। अतश्च यत्र परस्परविवादेन युगपद्धर्माधिकरणं प्राप्तयोरेको मानुषीं क्रियामपरस्तु दैवीमवलंते तत्र मानु
ष्येव ग्राह्या॥ ॥॥॥ तथा च कात्यायनः॥ ॥ यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीं मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृप इति॥
यत्रापि प्रधानैकदेशसाधनं मानुषं संभवति। तत्रापि न दैवमाश्रयणीयं। यथा रूपकशतमनया हस्ताद्गृहीत्वा यंन प्रयच्छतीत्यभि
योगापह्नवे ग्रहणे साक्षिणः संति नो संख्यायां वृद्धिविशेषे वा तो दिव्येन भावयामात्युक्तं तत्रैकदेशविभावितन्यायेनापि संख्यावृद्धि
विशेषसिद्धेर्न दिव्यस्यावकाशः॥ ॥उक्तं च॥ कात्यायनेन यद्येकदेशव्याप्यपि क्रिया विद्येत मानुषी। सा ग्राह्या न तु पूर्णापि दैविकी वद
तां नृणामिति। यत्र स्यात्साहसिकानां तु प्राप्तं दिव्ये परीक्षणमिति। तदपि मानुषासंभव एव नियमार्थं। यदपि नारदेनोक्तं॥
॥अरण्ये निर्जने रात्रावंतर्वेश्मनि साहसे। निक्षेपाप ह्नवे चैव दिव्या संभवति क्रियेति। तदपि मानुषासंभवति एवातस्मा

मिता न्मान्मानुषाभावस्तत्र येन निर्णय इत्यौत्सर्गिकमस्य चापवादो दृश्यते।प्रक्रान्ते साहसे वादे पारुष्ये दंडवाचिके।वलोद्भवेषु कार्येषु साक्षिणो
१८ दिव्यमेव वेति।तथा लेख्यादीनामपि क्वचिन्नियमो दृश्यते।यथा पूगश्रेणीगणादीनां या स्थितिः परिकीर्तिता।तस्यास्तु साधनं लेख्यं न दि
व्यं न च साक्षिणः।तथा द्वारमार्गक्रियाभोगजलवाहादिषु क्रियात्तु क्तिरेव तु गुर्वी स्यान्न दिव्यं न च साक्षिणः॥तथा।दत्तादत्तेष्वभृत्या
नां स्वामिनां निर्णये सति।विक्रया।दानसंबंधे क्रीत्वा धनमनिच्छति।द्यूते समाह्वये चैव विवादे समुपस्थिते।साक्षिणः साध
नं प्रोक्तं न दिव्यं न च लेख्यकमिति॥ ॥उभयत्र प्रमाणसद्भावे प्रमाणागतबला विकेवा सती पूर्वापरयोः कार्ययोः कस्य बला
यस्त्वमित्यत आह।सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया।ऋणादिषु सर्वेष्वर्थविवादेषूत्तरा क्रिया क्रियत इति क्रियाका
र्यं वलवत्।विवेके वा सति उत्तरकार्ये साधिते तद्वादी विजया भवेत्।पूर्वकार्येऽपि तद्वादी पराजीयते।तद्यथा कश्चिदृणग्रहणेन सा
धयति।कश्चित्प्रतिदानेनाधारणात् तत्र ऋणग्रहणं तत्र ऋणग्रहण।तत्र ऋणग्रहणप्रतिदानयोः॥प्रमानणसिद्धयोः प्रातीदानं वला राम
वदिति प्रतिदानवादी जयति।तथा पूर्वं धिकं शतं गृहीत्वा कालान्तरे त्रिकं शतं मंगीकृतवानित्यत्रोभयत्र प्रमाणसद्भा १८

34

वेपि त्रिकशतगृहणं वलवत्। पश्चाज्ज्ञाविन्नात्पूर्वबाधेनानुत्पत्तेः उक्तं च पूर्वबाधेन नोत्पत्तिरुत्तरस्य हि सेत्स्यतीति अस्य
पवादमाह आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा आध्यादिषु पूर्वमेव कार्यं बलवत् तद्यथा एकमेव क्षेत्रमेकस्याधिं कृत्वा
किमपि गृहीत्वा पुनरन्यस्याप्याधाय किमपि गृह्णाति। तत्र पूर्वस्यैव तद्भवति नोत्तरस्य। एवं प्रतिग्रहे क्रये वा। तन्नाहितस्य तदाना
मस्वत्वात्पुनराधानमेव न संभवति। एवं दत्तस्य विक्रीतस्य वा दानक्रयौ नोपपद्येते। तस्मादिदं वचनमनर्थकं। उच्यते अस्व
त्वेयदि मोहात्कश्चिल्लोभाद्वा पुनराधानादिकं करोति तत्र पूर्वं बलवदिति न्यायमूलमेवेदं वचनमित्यवोध्यं भुक्तोः केखि
द्विशेषरौर्युक्तायाः प्रमाणं प्रदर्शयिष्यन्नुक्तस्याधेर्द्विगुणे कार्यान्तरमाह। पश्यतो ब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी। परे
ण भुज्यमानाया धनस्य दशवार्षिकी। परेणासंबंधेन भुज्यमानां भुवं धनं वा पश्यतः अब्रुवतो मदीयेयं भूरस्वयानभोक्तव्ये
त्याप्रतिषेधतस्तु भूमेर्विंशतिवार्षिकीप्रकी अप्रतिरेव [illegible] विंशतिवर्षोपभोगनिमित्ता हानिर्भवति धनस्य तु हस्त्यश्वादेर्दशवा
र्षिकी हानिः। न [illegible]ेदं वचनमनुपपन्नं न ह्यप्रतिषेधात्स्वत्वमुपगच्छति। अप्रतिषेधस्य दानविक्रयादिवत्स्वत्वदिवृत्तिहेतुत्वस्य

मिता
२

लोकशास्त्रयोरप्रसिद्धत्वात्। नापि विंशतिवर्षोपभोगात्स्वत्वं। उपभोगस्य स्वत्वप्रमाणत्वात्प्रमाणस्य च प्रमेयं प्रत्यषेनुत्पादक
त्वात्। क्रयादिषु स्वत्वकारकहेतुपायत्वात्। तथाहि। स्वामि रिक्थक्रसंयसविभागपरिग्रहादिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रि
यस्य विजितं निर्विष्टं वैश्यशूद्रयोरित्यष्टावेव स्वत्वकारकहेतुनौतमा॥ पठति न तत्र भोगं। न चेदमेव वचनं विंशतिवर्षोपभोगस्व
स्वत्वापत्तिहेतुत्वं। प्रतिपादयतीति युक्तं। स्वत्वस्य स्वत्वहेतूनां च लोकप्रसिद्धत्वेन शास्त्रैकसमधिगम्यत्वाभावात्। एतच्च विभा
गप्रकरणे निपुणतरमुपपादयिष्यते गौत[illegible]मवचनं तु नियमार्थं अपि च अनागमं तु यो भुंक्ते बहून्यगतान्य
पि। चोरदंडेन तं पापं दंडयेत्पृथिवीपतिरित्येतदनागमोपभोगस्य स्वत्वहेतुत्वे विरुध्यते। न च विगमं तु यो भुक्तं इत्येतत्प
रोक्षभोगविषयं पश्यतो ब्रुवत इति प्रत्यक्षविषयमिति युक्तं वक्तुं। अनागमं तु यो भुक्त इत्यविशेषाभिधानात्। नोप
भोगे बलं कार्यमाहर्त्ता तत्सुतेन वा। पशुस्त्रीरुषादीनामिति धर्मो व्यवस्थित इति कात्यायनवचनाच्च। समक्षभोगे हानि
करणाभावेन हानेरहासंभवात्। न चैतन्मंतव्यं। आधिप्रतिग्रहेक्रयेषु पूर्वस्याः क्रियायां प्राबल्यापवादेन भूविषये विरा

राम
२



तिवर्षाणि भोगयुक्ताया धनविषये दशवर्षाणि भोगयुक्तायाधन विषये दशवर्षाणि भोगयुक्ताऽन्तरस्याः क्रियायाः प्राबल्यमने
नोच्यत इति। यतस्तेषूनैरवक्रियातत्वातो नोपपद्यते। स्वमेव ह्याधेयं देयं विक्रेयं च भवति। न चाहितस्यादत्तस्याविक्रीतस्य वा
स्वत्वामिति अस्वस्य दाने प्रतिग्रहवद्दंडः स्मर्यते। अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति। उभौ तौ चौरवच्छास्यौ दाप्यौ चोत्तम
साहसमिति। तथाऽऽगमाद्यादीनां त्रयाणामपवादस्यैश लोकस्यापि सामादीनामुत्तरश्लोके पचादो नोपपद्यते। तस्माद्भुम्यादीनां
हानिरनुपपन्नैव। नापि व्यवाहारहानिः यतः उपेक्षाकबंत स्वस्वत्व ह्नी भूतस्यातिष्ठत॥ काले विप्रतिपूर्वोक्ते व्यवहा
रेण सिध्यतीति। नारदेनोपेक्षा लिंगला वक्तताव्यवहारनिवृत्तानवस्वभावक्तता तथा मनुनापि। अजश्चेद्योवं गंडो
विषयश्चास्य भुज्यते। भग्नश्चेद्व्यवहारेण भोक्ता तद्धनमर्हतीति व्यवहारतो भंगो दर्शितो न वस्तुतः। व्यवहारभंगश्चैवं भोक्ता
किल वदति। अजडोऽयमपोगंडो बालो मत्सन्निधौ विंशतिवर्षाणि प्रतिखं मया भुक्तं। तत्र बहवः साक्षिणः संति। य
द्यस्य स्वमन्यायेन मया भुज्यते। तदायं किमित्येतावंतं कालमुदास्त इति। तत्र वायं निरुत्तरो भवति। एवं निरुत्तरस्या

मिता पिवास्तवोपिव्यवहारोभवत्येव।छलंनिरस्यभूतेनव्यवहारान्नयेन्नृपइतिनियमात्।अत्राथमतं।यद्यपिनवस्तुहानि
२१ र्नापिव्यवहारहानिस्तथापिपश्यतोऽप्रतिषेधतोव्यवहारहानिशंकाभवतीति।निवृत्तयेतदुक्तंनस्यात्व्यामित्युपदिश्य
तइति।।तत्वनास्मर्तकालायाभुक्तेहानिशंकाकारणाभावात्नस्यात्व्यामितीएतावन्मात्राभिवित्सायांविंशतिग्रहणमविव
क्षितंस्यात्।अथोच्यते।विंशतिग्रहणमूक्तंयत्रदोषोद्भावननिराकरणार्थंयथाहकात्यायनः।। ।।शक्तस्यसन्निधावर्थोयस्यले
ख्येनभुज्यते।विंशद्वर्षाण्यतिक्रांतंतत्पुत्रंदोषवर्जितमिति।तदपिन।आध्यादिष्वपिविंशतेरूर्ध्वंयत्रदोषोद्भावननिराकरणस्यप्र
मत्वेनापवादासंभवात्।। ।।यथाहकात्यायनः।। ।।अथविंशतिवर्षाणिआधिर्भुक्तःसुनिश्चितः।तेनलेख्येनतत्सिद्धिर्लेख्यदो
षविवर्जिता।।तथा।।सामान्यविवादेनिर्णीतिसामान्यंविधीयते।तस्यदोषाःप्रवक्तव्यायावद्वर्षाणिविंशतिरिति।।एतेनधनस्य
दशवार्षिकात्वेतदपिप्रत्युक्तं।तस्मादस्यश्लोकस्यसम्यगर्थोवक्तव्यः।। ।।उच्यते।।।भूमेर्धनस्यचफलहानिरिहविवक्षिता
नवस्तुहानिर्नापिव्यवहारहानिः।। ।।तथाहि।।निराक्रोशंविंशतिवर्षोपभोगादूर्ध्वंयद्यपिस्वामीन्यायतःक्षेत्रंलभते।तथापि राम
२१

फलानुसरणांनलभतेअप्रतिषेधलक्षणात्स्वपराधादस्मादेववचनात्परोक्षभोगेमुविंशतेरूर्ध्वमपिफलानुसरणंलभतस्वा:पश्यत इ
तिवचनात्स्वत्वप्रयुक्तभोगेवशाक्रोशे।अवदत इतिवचनात्।विंशतेःप्राक्।पश्चान्निराक्रोशेवलभते।विंशतिग्रहणाच्चानन्तरत इत्यत्रस्या
पिफलस्यस्वत्वात्तद्धानिरुपपन्नैववाटंतस्यस्वरूपोविनाशेनतथैवावस्थाने।यथातदुत्पन्नगपनसहस्राद्दीनांयत्पुनस्तदुत्पन्न
मुपभोगानष्टं।तत्रस्वरूपनाशादेवस्खलनाशेअनागमंयोभुंक्तेवहून्यब्दशो चौरदंडेनतंपापंदापयेत्पृथिवीपतिरित्यनेनव
नेननिष्कृयन्त्रूपेणाभरणायित्वाचौरवत्समस्तद्रव्यदानंप्राप्तिमिह।निर्विंशतिवार्षिकोविंशतेरूर्ध्वंनष्टंफलंनलफलंनत्वफल
इतिस्थितं।एतेनधनस्यदशवार्षिकीत्येतदपिव्याख्यातं॥ ॥अस्यापवादमाह॥ ॥आधिःसीमोपनिक्षेपाजडबालधनैर्विनात
थापानधिराजस्त्रःश्रोत्रियाणांधनैरपि।अधिसीमोपनिक्षेपाश्चजडबालधनेवआधिसीमोपनिक्षेपजडबालधनानिभोगैर्वि
ना।उपनिक्षेपोनामरूपसंख्याप्रदर्शनेनरक्षणार्थंपरस्महस्तेनिहितंद्रव्यं॥ ॥यथाहनारदः॥ ॥स्वद्रव्यंयत्रविश्रंभान्निक्षि
पत्यविशंकितः॥ निक्षेपोनामतत्प्रोक्तंव्यवहारपदंबुधैरिति।उपनिधानमुपनिधिः।आध्यादिषुषट्सुतोभुज्यमानोऽपिभूमि

39



मिता·
२२

विंशतेर्विंशतेर्धनस्यदशमोवर्षे व्यूर्ध्वमप्युपचयहानिर्नभवति।पुरुषापराधस्यतथापिधस्याभावादुपेक्षाकारणस्यतत्रत
त्रसंभवात्॥ ॥तथाहि॥ ॥आधेराधित्वोपाधिकएवभोगइत्युपेक्षायामपिनपुरुषापराधः।सीम्नाभिरक्षातन्नुषागारादि
चिह्नैःसुसाध्यत्वादुपेक्षासंभवति।उपनिक्षेपोपनिध्योर्भुक्तौप्रतिषिद्धत्वात्प्रतिषेधातिक्रमेणोपभोगेवसोदयलाभादुपेक्षोपपत्तिः।
जडबालयोर्जडत्वादुपेक्षायुक्तैव।राज्ञोबहुकार्यव्याकुलत्वात्स्त्रीणामज्ञानाद्भयाच्च।श्रोत्रियस्याध्ययनात्तदर्थविचारव्य
ग्रतयाव्याकुलत्वादुपेक्षायुक्तैव।राज्ञोबहुकार्यव्याकुलत्वादुपेक्षायुक्तैव।तस्मादाध्यादिषुसर्वत्रोपेक्षाकारणसंभवात्समृद्धो
भोगेपिराज्ञोशेषवनकाविदपिफलाहानिः॥ ॥आध्यादिषुदंडविशेषप्रतिपादनार्थमाह॥ ॥आध्यादीनांविहर्त्तारंधनिनेदाप
येद्धनं।दंडंचतत्समंराज्ञोशक्त्यपेक्षमथापिवा।यत्राध्यादीनांश्रोत्रियद्रव्यपर्यन्तानांचिरकालोपभोगबलेनापहर्त्तारंविवादास्प
दीभूतंद्रव्यंस्वामिनेदापयेदित्यनुवादः।दंडंचतत्समंविवादास्पदीभूतद्रव्यसमंराज्ञेदापयेदितिविधिः॥यद्यपिगृहक्षेत्रादि
षुतत्समोदंडोनसंभवतितथापिमर्यादायाःप्रभेदेचसीमातिक्रमणेतथेत्यादिनावक्ष्यमाणोदंडोद्रष्टव्यः।अथतत्समंदंडेनाप

40



हर्त्तुर्दमनंभवति। बहुधनत्वेनतदाशक्त्यपेक्षंधनंदापयेत्। यावतातस्यदर्प्पोपशमोभवतितावद्दापयेत्त्वंदंडोदमनादित्याहुस्तेन
दांतोदमयेत्तिद्विति दंडग्रहणस्यदमनार्थत्वाद्यस्यतुतत्सममपिद्रव्यंनास्तिसोपियावतापीड्यतेतावद्दाप्यः। यस्यपुनःकिमपिध
नंनास्तिअसौधिग्दंडादिनादमनीयः॥ ॥यथाहमनुः॥ ॥धिग्दंडंप्रथमंकुर्याद्वाग्दंडंतदनंतरं। वधदंडमतःपरमिति॥ व
धदंडोपिशारीरोब्राह्मणव्यतिरिक्तानांनचवधादर्शितः॥ ॥यथाहमनुः॥ ॥दशस्थानानिदंडस्यमनुःस्वायंभुवोब्रवी
त्। त्रिषुवर्णेषुयानिस्युरक्षतोब्राह्मणोव्रजेत्। उपस्थामुदरंजिह्वाहस्तौपादौचपंचचक्षुर्नासाचकर्णौचधनंदेहस्तथैवचेति। एते
षांचयन्निमित्तापराधस्तत्रैवोपस्थादौनिग्रहःकार्यइतिद्रष्टव्यं। कर्म्मचाकारयितव्यः॥ ॥यथोक्तंकात्यायनेन॥ ॥धन
दानासहंबुद्ध्वास्वाधीनंकर्म्मकारयेत्। अशक्तौबंधनागारंप्रवेश्योब्राह्मणोदृते। ब्राह्मणस्यपुनर्द्रव्याभावेकर्म्मनियोज्या। वियोग नि३
नि॥ ॥यथाहगौतमः॥ ॥कर्मवियोगविख्यापननिर्वासनांककरणान्यपहृत्वोवितिनारदेनाप्यवधःसर्वस्वहर
णापुनरा। निर्वासतांकनोतवंगच्छेदइत्युक्तोदंडउत्तमसाहसे। अविशेषेणसर्वेषांदंडविधिःस्मृतइत्युक्तोक्तेर्वाक्षा

निता·
२३

ऋतेब्राह्मणस्यनवधंब्राह्मणोहीतिशिरसोमुंडनंदंडस्तस्यनिर्वासनंपुरात्ललाटेवाभिशस्तांकः।प्रयाणंगर्द्दभेनचेति
अंकनेचव्यवस्थादर्शिता।गुरुतल्पेभगःकार्यःसुरापानेसुराध्वजः।स्तेयेतुश्वपदंकार्यंब्रह्महण्यशिराःपुमानिति।यत्तुच
क्षुर्निरोधोब्राह्मणस्यैतत्पापसंबंधवचनं।। ।।ब्राह्मणस्यपुरान्निर्वासनसमयेववस्त्रादिनाचक्षुर्निरोधकर्त्तव्यइति।तस्या
र्थानचाक्षुषोरुद्धरणं।अदान्तोब्राह्मणोव्रजेत्।नशारीरोब्राह्मणदंडइत्यादिमनुगौतमादिवचनविरोधादित्यलंप्र
संगेन।।स्वभावव्यभिचारित्वेनभोगस्यस्वत्वेप्रमाणमुक्तं।भोगमात्रस्यस्वत्वव्यभिचारित्वात्कीदृशोभोगःप्रमाण
मित्यतआह।आगमोभ्यधिकोभोगाद्विनापूर्वक्रमागतात्।स्वत्वहेतुप्रतिग्रहक्रयादिरागमःसभोगादभ्यधिको
बलीयान्।स्वत्वावबोधनेभोगस्यागमसापेक्षत्वात्।।।।यथाहनारदः।। ।।आगमेनविशुद्धेनभोगोयातिप्रमा
णतां।।अविशुद्धागमोभोगःप्रामाण्यंनैवगच्छतीति।नचभोगमात्रात्स्वत्वानुगमः।परकीयस्याप्यपहारादिनोपभो
गंकेवलतोयस्तुकीर्त्तयेन्नागमंक्वचित्।भोगच्छलापदेशेनविज्ञेयःसतुतस्करइतिस्मर्यतेअतएवसागमोदी

राम
२३

42



र्घकालो निरंतरो निराक्रोशः प्रत्यर्थिप्रत्यक्षश्चेति पंचविशेषणयुक्तो भोगः प्रमाणमित्युक्तं भवति। तथा च स्मर्यते सागमो दी
र्घकालश्च विच्छेदोपरिवर्जितः। प्रत्यर्थिसंनिधानश्च परिभोगोपि पंचधेति।। क्वचिद्वागमनिरपेक्षस्य भोगस्य प्रमाणमित्य
त आह।। विना पूर्वक्रमागतादिति। पूर्वेषां पित्रादीनां त्रयाणां क्रमः पूर्वक्रमस्तेनागतो यो भोगस्तस्माद्विना आगमोप्यधिक इ
ति संबंधः स पुनरागमादप्यधिकः आगमनिरपेक्षः प्रमाणमित्यर्थः। तत्राप्यागमज्ञाननिरपेक्षो न सत्तानिरपेक्षः सत्तानुमे
वागमस्य तद् इति बोद्धव्यं। विना पूर्वक्रमागतादित्येतच्चास्मानरागमादप्यधिकः र्त्तिकालप्रदर्शनार्थं आगमोप्यधिको भोगादि
ति च स्मार्त्तकालविषयं। अत एव स्मरणयोग्यकाले यो। यत्रानुपलभ्यागमाभावनिश्चयः संभवतीदागमज्ञानसापेक्षस्यैव
भोगस्य प्रमाणत्वमस्मार्त्ते तु काले योग्यानुपलब्ध्याभावनिश्चयासंभवादागमज्ञाननिरपेक्ष एव संततो भोगः प्रमाणं एत
देव स्पष्टीकृतं कात्यायनेन स्मार्त्तकाले क्रिया भूमेः सागमा भुक्तिरिष्यते। अस्मार्त्तेनुगमाभावात्क्रमात्त्रिपुरुषागतेति स्मा
र्त्तश्च कालो वर्षशतपर्यंतः।। शतायुर्वै पुरुष इति श्रुतेः।। अनुगमाभावादिति योग्यानुपलब्ध्याभावेनागमाभावनिश्चयाभाव



मिता २४

दिति। अत एव वर्षशताधिको भोगसंततोऽप्रतिरवः प्रत्यक्षस्यागमाभावे निश्चिते अ[illegible] व्यभिवारादाक्षिप्तागमं स्वत्वं गमयति। अस्मा
र्त्तेपिकालेऽनामस्मृतिपरंपरायां साभ्यांत भोगप्रमाणं। अत एवानागमंतु यो भुंक्ते बहून्यब्दशतान्यपि। चोरदंडेनतं पापं दंडयेत्पृ
थिवीपतिरित्युक्तं। न चानागमंतु यो भुंक्त इत्येक ----शतान्यपीत्यपिशब्दप्रयोगात्प्रथमस्य पुरुषस्य निरागमभोगे
विरकालोपभोगेपिदंडविधानमिति मंतव्यं। द्वितीये तृतीये वा पुरुषे निरागमस्य भोगस्य प्रसंगात्तद्वेतिदिष्यते। आदौ तु कार
णं दानं मध्ये भुक्तिस्तु सागमेति॥।नारदस्मरणात्॥।तस्मात्सर्वत्र निरागमोपभोगे: नागमंतथो भुक्त इत्येतद्दृष्टव्यं यद्यप्यन्य
येनापि यद्भुक्तं पित्रापूर्वतरैस्त्रिभिः। न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतमिति। पित्रासहपूर्वतरैस्त्रिभिरिति योध्यं। तत्रा
पिक्रमात्त्रिषुपुरुषागतमित्यस्मात्तेकालोपलक्षणं त्रिपुरुषविद्यायामेकवक्तायामेकवर्षाभ्यंतरेपिपुरुषत्रयातिक्रमसं
भवाद्वितीयेवर्षेनिरागमस्य भोगस्य प्रसंगस्तथासति स्मार्त्तकाले क्रिया भूमेः साममाभुक्तिरिष्यत इति स्मृतिविरोधः। अन्यादे
नापि यद्भुक्तमित्येतवान्यायेनापि भुक्तमपहर्तुं न शक्यं किंपुनरन्यायान्निश्चय इति व्याख्येयमपिशब्दश्रवणाचायकी

राम २४

44



क्तं ॥ यद्विनागमत्यंतं भुक्तं पूर्वैस्त्रिभिर्भवेत् । न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतमिति । तत्राप्यत्यंतमागमं विनेत्यत्यंतमुप
लभ्यमागमं विनेति व्याख्येयं । न पुनरागमस्वरूपं विनेति । आगमस्वरूपाभावे भोगशतेनापि स्वत्वं न भवतीत्युक्तं । क्रमात्त्रिपु
रुषागतमित्येतदप्यक्षार्थं न स्मरणयोग्ये काले भोगस्यागमसापेक्षस्य प्रमाणमनुपपन्नं [illegible] हि । यत्रागमप्रमाणांत
रेणावगतस्तदा तेनैव स्वत्वागमान्न भोगस्य स्वत्वेऽप्यागमस्वरूपे मो वा प्रमाणं । अथ प्रमाणांतरेणागमो नावगतः । कथं त
द्विशिष्टो भोगः प्रमाणं । प्रमाणांतरेणावगतस्तदा तेनैव स्वत्वाग[illegible]च्यते । प्रमाणं उच्यते । प्रमाणांतरेणावगतागमसहित एव नि
रंतरो भोगः कालांतरे स्वत्वं गमयति अनवगतोप्यागमो भोगरहितो न कालांतरे [illegible] स्वत्वगमयितुमलं । मध्ये दानक्रियादि
ना स्वत्वापगमसंभवादिति सर्वत्र मनवद्यं । आगमेऽपेक्षो भोगः प्रमाणमित्युक्तं । आगमस्तर्हि भोगनिरपेक्ष एव प्रमाणमि
त्यत आह । आगमेऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो । यस्मिन्नागमे स्वल्पापि भुक्तिर्नास्ति तस्मिन्नागमे बलं संपूर्णत
ता नैवास्ति अयमभिसंधिः । स्वत्वनिवृत्तिः परस्वत्वापादनं दानं परस्वत्वापादानं च परो यदि स्वीकरोति तदा संपद्यते नान्यथा

45

मिता
२५

स्वाकारस्त्वत्रिविधो मानसो वाचिकः कायिकश्चेति तत्र मानसो ममेदमिति संकल्परूपः। वाचिकस्तु ममेदमित्याद्य भि
त्याद्यभिहृपहारोल्लेखी सविकल्पकप्रत्ययः। कायिकः पुनरुपादानाभिमर्शनादिरूपोनेकविधः। तत्र च नियमं स्मर्यते त
द्यात्कृशाजिनं पुष्पं युद्धे गरियांकरे। केशरेष्वृतथैवाश्वदासां शिरसि दापयेदिति। आश्वलायनोप्याह।। ।। अनुम
त्रयेत ग्रामारण्यमिश्रं शेदशाणिकन्यां चेति तत्र हिरण्यपशवाद्यादावुदकदानानंतरमेवोपादानादिसंभवात्त्रिविधोपि स्वी
कारं संपद्यते। क्षेत्रादौ पुनः फलोपभोगव्यतिरेकेण कायिकस्वीकारासंभवात् स्वल्पेनाप्युपभोगेन भवितव्यं। अन्य
थादानक्रयादेः संपूर्णता न भवतीति फलोपभोगलक्षणकायिकस्वीकारविकल आगमो दुर्वलो भवतीति तत्सहितादा
गमात्। एतद्द्वयोः पूर्वापरकालापरिज्ञाने। पूर्वापरकालपरिज्ञाने तु विगुणोपि पूर्वकालागम एव बलीयानिति।। ।। अ
थवा लिखितं साक्षिणो भुक्तिः प्रमाणमित्युक्तं। एतेषां समवाये कुत्र कस्य प्राबल्यमित्यत्रेदमुपतिष्ठते। आगमोऽधि
को भोगाद्विना पूर्वक्रमागतात्। आगमेपि बलं नैव भुक्तिः स्तोकापि यत्र नो इति स्मर्यते। अयमर्थः। आद्येषु त्रिषु सादि

राम
२५



मिर्भाविते ऽप्यागमा भोगादभ्यधिको बलवांश्च। पूर्वक्रमागताद्भोगाद्विना। स पुनः पूर्वक्रमागतो भोगश्चतुर्थे पुरुषे लिखि
तेन भावितादागमाद्बलवान्। मध्यमे तु भोगरहितादागमात्स्तोकभोगसहितोऽप्यागमो बलवानिति। एतदेव नारदेन स्पष्टी
कृतं॥ आदौ तु कारणं दानं मध्ये भुक्तिस्तु सागमा। कारणं भुक्तिरेवैका संतता या चिरंतनी। पश्यतोऽब्रुवतो यत्र वि
शतिवर्षभोगादूर्द्धं भूमेर्धनस्यापि दशाब्दभोगादूर्द्धं फलानुसारेणान भुक्तं। तत्र फलानुसारेणावहडानुसारेणाम पि
न भविष्यतीत्याशंक्य पुरुषव्यवस्थया प्रमाणतानुव्यवस्थयापावहडव्यवस्थां दर्शयितुमाह। आगमस्तु कृतो येन सोऽभियु
क्तः समुद्धरेत्। न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी। येन पुरुषेण भूम्यादेरागमः स्वीकारः कृतः स पुरुषः कुतस्ते के
त्रादिकमित्यभियुक्तस्तमागमं प्रतिग्रहादेरिति लिखितादिभिरुद्धरेद्भावयेदनेनाद्यस्य पुरुषस्यागममनुद्ध
रतो दण्ड इत्युक्तं भवति। तत्सुतो द्वितीयोऽभियुक्तो नागममनुद्धरेत्किं तु। अविच्छिन्नपितृसमक्षभोगं। अनेन वागमम
नुद्धरतो द्वितीयस्यापि न दण्डः पितृविशिष्टभोगमनुद्धरतो दण्ड इति प्रतिपादितं। तत्सुतो यो नागमं नापि विशिष्टं भो

गमुद्धरेदापितुरक्रमागतं भोगमात्रं। अनेनापि तृतीयस्य क्रमायातभोगाद्धरणे द्वितीयस्य न दंडोऽपि विशिष्टभो
मनुद्धरणे चेत्यहितं। तत्र तयोर्द्वितीयतृतीययोर्भुक्तिरेव गरीयसी। तत्रापि द्वितीयो गरीयसीति विवेक्तव्यं। त्रिपुरुषागमादुद्धरणे
र्थहानिः सामान्येन चादंडस्तु विशेष इति तात्पर्यार्थः॥ ॥उक्तं च॥ ॥आगमस्तु कृतो येन सदंड्यस्तमनुद्धरन्। न तत्सुतस्तत्सुतो वा
सो भोगपहानिस्तयोरपीति॥ ॥अस्मार्त्तकालोपभोगस्यागमज्ञाननिरपेक्षस्य प्रमाणमुक्तं। विना पूर्वक्रमागतादित्यत्रात
स्यापवादमाह। योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत्। न तत्र कारणं भुक्तिरागमेन विना कृता। यदा पुनराहर्त्रादिरभि
युक्तोऽकृतव्यवहारनिर्णय एव परेतः परलोकं गतो भवेत्तदा तस्य रिक्थी पुत्रादिस्तमागममुद्धरेत्। यस्मात्तत्रास्मिन् व्यव
हारे भुक्तिरागमरहिता साक्ष्यादिभिः साधितापि न प्रमाणं। पूर्वाभियोगेन भोगस्य सापवादत्वात्॥ ॥नारदेनाप्युक्तं॥ ॥
तथारूढविवादस्य प्रेतस्य व्यवहारिणः। पुत्रेण सोऽर्थः संशोध्यो न तद्भोगो निवर्तयेदिति॥ ॥अनिर्णीतव्यवहारे व्यवहर्तरि प्रेते
व्यवहारेण निवर्त्तत इति स्थितं। निर्णीतेऽपि व्यवहारे स्थिते व्यवहर्तरि व्यवहाराः क्वचित्प्रवर्तन्ते क्वचिन्न प्रवर्तन्त इति व्यव

स्वासिद्धयेव्यवहारदर्शिनांवलावलमाहात्म्येनाधिकृताः॥ पूगाःश्रेणयोथकुलानिच। पूर्वंपूर्वंगुरुज्ञेयंव्यवहारविधौनृणां
नृपेणराज्ञाधिकृताःव्यवहारदर्शनेनियुक्ताः॥ राज्ञासभासदःकार्याइत्यादिनोक्ताः॥ पूगाःसमूहाःभिनजातीनांभिन्नवृत्तीयन
मेकनां। यथाग्रामनगरादय॥ श्रेणयोनानाजातीनामेकजातीनामप्येकजातीयकर्म्मोपजीविनांसंघातः॥ यथा॥ हेडाबुकानं
तांबूलिककुविंदचर्मकारादीनांच। कुलानिज्ञातिसंबंधिपूनांसमूहाः॥ एतेषांनृपाधिकृतादीनांवक्तृणांपूर्वंपूर्वंयद्यद्घातत्पू
र्वपवितंतत्तद्गुरुवलवद्वेदितव्यं। नृणांव्यवहर्तृणांव्यवहारेविधौव्यवहारदर्शनकालेर्थैएतदुक्तंभवति। नृपाधिकृतेनिर्णीते
व्यवहारेपराजितस्ययद्यप्यसंतोषःकूटबुध्याभवति। तथापिनपूगादिषुपुनर्व्यवहारोभवत्येवंपूगनिर्णीतेपिनश्रेण्यादिगम
नंतथाश्रेणिनिर्णीतेकुलगमनंनभवति। कुलनिर्णीतेतुश्रेण्यांश्रेणिनिर्णीतेपूगादिगमनपूगनिर्णीतेनृपाधिकृतगमनंभव
ति। तथापिनपूगादि॰गनिर्णीतेनृपाधिकृतगमनंभवति। तेननारदेनपुनर्नृपाधिकृतेव्यवहारेनृपादिगमनंभावतीत्यु
क्तं। कुलादिश्रेणयश्चैवगणाश्चाधिकृतानृपाः। प्रतिष्ठाव्यवहाराणांगुर्वेषामुत्तरोत्तरमिति। तत्राचनृपगमनेसेनरसमेनराज्ञो



मिता-
२७

पूर्वैःसभ्यैः।सहसभ्यैर्व्यवहारोनिर्णीयमानेयद्यसौकूटदृष्टवादीपराजितस्तदासौसभ्यैर्दंड्यः।अथासौजयतितदाधिक्कृ
तासभ्यादंड्याः॥दुर्वलैर्व्यवहारदर्शिभिर्दृष्टोव्यवहारःपरावर्त्तते।प्रवलदृष्टस्तुननिवर्त्ततइत्युक्तमिदानींप्रवलदृष्टो
पिव्यवहारः।कश्चिन्निवर्त्ततइत्याह।वलोपाधिविनिर्वृत्तान्व्यवहारान्निवर्त्तयेत्।वहिःशत्रुकृतांस्तथावलेनवलात्कारेण
उपाधिनाभयेननिर्वृत्तान्निष्पन्नान्व्यवहारान्निवर्त्तयेत्।तथास्त्रीभिर्नक्तंरात्रावस्त्रीभिरपिअंतरागारेगृहाभ्यंतरेवहिर्ग्रा
मादिभ्यः॥शत्रुभिश्चकृतान्व्यवहारान्निवर्त्तयेदितिसंवंधः॥ ॥अपिच॥ ॥मत्तोन्मत्तार्त्तव्यसनिवालभीतादियोजितः॥असंव
द्धकृतश्चैवव्यवहारोयोनसिध्यति।मत्तोमदनीयद्रव्योपयोगात्उन्मत्तउन्मादेनपंचविधेनवातपित्तश्लेष्मसंनिपातग्रहसंभ
वेनोपसृष्टः॥आर्त्तोव्याधिनाव्यसनमिष्टवियोगानिष्टप्राप्तिजनितंदुःखंतद्वान्व्यसनीवालोव्यवहारायोग्यः।भीतोर
तिभ्यः॥आदिग्रहणात्पुरराष्ट्रादिविरुद्धश्च॥पुरराष्ट्रविरुद्धश्चराज्ञाविवर्जितः।अनादेयोभवेद्वादोधर्मविद्भिरुदाहृत
इति॥ ॥मनुस्मरणात्॥ ॥एतैर्योजितःकृतोव्यवहारोनसिध्यतिअभियुक्तः।संवद्धकृतोपिव्यवहारोनासिध्यतीति

राम

50



सवंधा।यत्तुस्मरणंगुरुशिष्येपितृपुत्रेदंपत्यस्वामिभृत्ययोः॥विरोधेतुमिथस्तेषांव्यवहारोनसिध्यतीतितदपिगुरुशिष्यादीनांना
त्यंतिकव्यवहारप्रतिषेधपरंचेति।तेषामपिकथंचिद्व्यवहारस्पेष्टत्वात्तथाहि॥शिष्यशिष्टिरवधेनाशक्तौरज्जुवेणुविदलाभ्यांतनुभ्याम
न्येनघ्नन्राज्ञासास्यःशिष्योयदिराज्ञेनिवेदयेदिति।गौतमस्मरणात्तेनोत्तमांगेकथंचनेतिमनुस्मरणाच्च।यदिगुरुःकोपावेशवशान्म
हतादंडेनोत्तमांगेताडयति।तदस्मृतिव्यपेतेनमार्गेणाधर्षितः।तदाभवत्येवव्यवहारपदं।तथाभूर्यापितामहोपात्तेत्यादि
वचनात्पितामहोपात्तेभूम्यादौपितापुत्रयोःस्वाम्येसमानेयदिपिताविक्रयादिनापितामहोपात्तंभूम्यादिनाशयति
तदापुत्रोयदिधर्माधिकरणंप्रविशतितदापितापुत्रयोरपिभवत्येवव्यवहारः।तथादुर्भिक्षेधर्मकार्येचव्याधौप्रतिरोध
केगृहीतंस्त्रीधनंभर्त्तानाकामादातुमर्हतीतिस्मरणाद्दुर्भिक्षादिव्यतिरेकेणायदिस्त्रीधनंभर्त्ताव्यपीकृत्यविद्यमानाध
नोपियाच्यमानोनददातितदादंपत्योरपिभवत्येवव्यवहारः।तदासौभक्तदासस्वामिनासहव्यवहारंववदृपातिगर्भदास
स्यापिगर्भदासादीनधिकृत्यपयस्त्वेकःस्वामिनंकश्चिन्मोचयेत्प्राणसंशयात्।दासत्वास्मात्सविमुच्येतपुत्रभागंलभेतचेतिना

51

मिता॰
२८

स्वेनोक्तत्वात्तदा मोवमोनेचपुत्रभागादानेचस्वामिनासहव्यवहारः केनवार्यतेतस्माददृष्टयोऽश्रेयः कस्तुरोज भवतिगुर्वादि
भिर्व्यवहारइतिप्रथमंशिष्यादयोनिवारणीयाराज्ञासमभ्येनेतिगुरोःशिष्यन्नृपाहेःश्लोकस्यतात्पर्यार्थः॥ अत्यंतनिर्वंधव
शिष्यादीनामप्यनुकारीत्याप्रवर्त्तनीयोव्यवहारेध॥ यदप्येकस्यबहुभिः सार्द्धंस्त्रीणांप्रेष्यजनस्यच। अनादेशोभवेद्वादोधर्मविद्भि
रुदाहृतइतिनारदवचनं। तत्रैकस्यापिगणाद्द्रव्यंहरेद्यस्तुसंविदंलंघयेच्चयः। तथा एकव्रतांवहूनांचेत्यादिस्मरणादेकार्थे
र्वहुभिःसार्द्धंव्यवहारइष्यतएवेतिभिन्नार्थैर्बहुभिरेकस्ययुगसद्व्यवहारेणभवतीतिद्रष्टव्यं। स्त्रीणांभित्यपिगोपसौंडकादि
स्त्रीणांस्वातंत्र्याव्यवहारोभवत्येवेतितदन्यासांकुलस्त्रीणांपतिपितृवजीवत्सुतत्पारतंत्र्यादनादेयोव्यवहारइतिव्याख्येयं। प्रेष्य
जनस्यचेत्येतदपिप्रेष्यजनस्यस्वामिपारतंत्र्यार्थव्यवहारेपिस्वास्यनुज्ञयैवव्यवहारेणान्यथेतियोजनीयं॥ ॥परावर्त्यंव्यव
हारमुक्त्वेदानींपरावर्त्यंद्रव्यमाह। प्रनष्टाधिगतंदेयंनृपेणधनिनेधनं। विभावयेन्नचेल्लिंगैस्तत्समंदंडमर्हति॥ प्रनष्टंहि
रण्यादिशौल्किकस्थानपालादिभिरधिगतंराज्ञेसमर्पितंयत्तद्राज्ञाधनिनेदातव्यंयदिधनीरूपसंख्यादिभिर्लिंगैर्वपयति। यदि

राम
२८

नभवयतितदातत्समंऽदंडमर्हतिअधिगमस्यस्वत्वनिमित्तवात्सत्वे प्राप्तेतत्पराहृत्तिरनेनोक्ता॥ अत्रचकालावधिंद्दयति।शौल्कि
कैस्थाति।यदिनभावयतितदातत्समंदंडमर्हतितिअतिअधिगमस्यस्वत्वनिमित्तत्वात्सत्वेप्राप्तेतस्याराहृत्तिरेननोक्ता॥ अत्रचकाल
वधिंद्दयति।शौनपालैर्वानष्टायहृतमाहृतंअर्वाकसंवत्सरात्सामाहरेतपरतोनृपइति॥ मनुनाप्युनःसंवत्सरत्रयमवधित्वेननि
दिष्टंप्रनष्टस्वामिकंरिक्थंराजात्र्यद्वंनिर्वानिष्टापहृतमा॥ अर्वाकसंवत्सरात्स्वामीहरेतपरतोनृपइतिधापयेत्॥ अर्वाक्त्र्यद्वाद्ध
रेत्स्वामीपरतोनृपतिहरेदिति।तत्रत्रपपर्यंतमवश्यरक्षणीयंतत्रयदिसंवत्सरार्द्धाक्स्वाम्यागच्छेत्तदाकृत्स्नमेवदद्याद्यादापुनःसं
वत्सरार्द्धूर्ध्वला - - - - - - गृहीत्वाशेषंस्वामिनोदद्यात्॥ यथाह॥ आददाताथषड्भागंप्रणष्टाधिगतान्नृपः।दशमंद्वादशंवापि
सतांधर्म्ममनुस्मरन्निति।तत्रप्रथमेवर्षेकृत्स्नमेवर्षदद्यात्द्वितीयेद्वादशंभागंतृतीयेदशमंचतुर्थादिषुषष्ठंभागंगृहीत्वाशेषंदद्या
च्च।राजाभागस्यचतुर्थोऽशोऽधिगंत्रेदातव्यः।स्वाम्यनागमेतद्भक्तस्यधनस्यचतुर्थमंशमधिगंत्रेदत्वाशेषंराजागृहीयात्॥ ॥यथा
हगौतमः॥ ॥प्रनष्टस्वामिकमाधिगम्यसंवत्सरंराज्ञारक्ष्यमप्यूर्द्धमधिगंतुश्चतुर्थांशोराज्ञःशेषमिति।अत्रसंवत्सरमितिप

मिता
२९

काचवचनमविवक्षितं राजाप्यर्द्धं निधापयेदिति स्मरणान्नाहरेत परतोऽपरतोऽन्यप इत्येतदपि स्वामिनागतेऽपह्नवाद्द्रव्यापीकरणाभ्यनु
ज्ञानपरं। आगते तु स्वामिनि व्ययीभूते पिंड्रव्ये राजा स्वांशमवता। यतत्र मंदद्यादेतच्च हिरण्यादिविषयं गवादिविषये वक्ष्यति। पणा
नेकशफे दद्यादिति। रथ्याशुल्कशालादिनिपतितस्य सुवर्णादेर्नष्टस्याधिगमे विधिमुक्त्वाधुना इमो चिरनिखातस्य सुवर्णादे
र्निधिशब्दवाच्यस्याधिगमे विधिमाह। राजा लब्ध्वा निधिं दद्याद्द्विजेभ्योऽर्द्धं द्विजः पुनः॥ विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः॥ इतरेण नि
धौ लब्धे राजा षष्ठांशमाहरेत्। अनिवेदितविज्ञातो दाप्यस्तं दंडमेव च। उक्तलक्षणो विधिर्वा जालवार्द्धं द्विजेभ्यो दत्वा शेषं कोशे निवे
शयेत्। ब्राह्मणस्तु विद्वाञ्छ्रुताध्ययनसंपन्नः सदाचारो यदि निधिं लभेत। तदा सर्वमेव गृह्णीयात्। यस्मादसर्वस्य जगतः प्रभुः॥ इत
रेण तु राजविद्वद्ब्राह्मणव्यतिरेकेण। विद्वद्ब्राह्मणक्षत्रियादिना निधौ लब्धे राजा षष्ठांशमधिगंत्रे दत्वा शेषं निधिं स्वयमाहरेत्॥
॥यथाह वसिष्ठः॥ ॥अप्रजायमानं वित्तं योऽपि गच्छेद्राजा तद्धरेदधिगंत्रे षष्ठमंसं प्रदद्यादिति। गौतमोऽपि निध्यधिगमो राजध
नं ब्राह्मणस्याभिरूपस्य अब्राह्मणो व्याख्याता षष्ठमंशं लभेतेत्येक इति। अनिवेदित इति कर्तरि क्तः। अनिवेदितश्चासौ विज्ञात

राम
२९



स्वराज्ञेत्यनिवेदितविज्ञातयकश्चिन्निधिंलब्ध्वाराज्ञेननिवेदितवा। विज्ञातश्चतश्चन्ससर्वंनिधिंदाप्योदंडंचशक्त्यपेक्षया। अथनिधे
रपिस्वाम्यागतःस्नपकसंख्यादिभिस्स्वात्वंभावयतितदातस्मैराजानिधिंदत्त्वाषष्ठंद्वादशंवांशंस्वयमाहरेत्॥ ॥यथामनुः॥ ॥मम
यमितियोब्रूयान्निधिंसत्येनमानवः। तस्याददातषड्भागंराजाद्वादशमेववेति। अंशविकल्पस्तुवर्णकालाद्यपेक्षयावेदितव्यः॥ ॥
चौरहृतंप्रत्याह॥ ॥ देयंचौरहृतिंद्रव्यंराज्ञाजानपदायतु। अददद्धिसमवाप्नोतिकिल्बिषंयस्यतस्यतस्यतत्। चौरैर्हृतंद्रव्यंचौरेभ्योव
र्जितजानपदायस्वदेशाभिवासिनेनेयस्यतद्द्रव्यंतस्मैराज्ञादातव्यं। हियस्माददद्प्रयच्छत्तस्यतदपहृतंद्रव्यात्तस्यकिल्बिषमाप्नो
तितस्यचौरस्यवायथाहमनुः॥ दातव्यंसर्ववर्णेभ्योराज्ञाचौरैर्हृतंधनं। राजातदुपयुंजानश्चौरस्याप्नोतिकिल्बिषमिति। यदिचौरहस्ता
दादायस्वयमुपभुंक्तेतदाचौरस्याकिल्बिषमाप्नोति। अथचौरहृतमुपेक्षतेतदाजानपदस्यकिल्बिषंमथचौरहृताहरणाययतमा
नोपिनशक्नुयादाहर्त्तुंतदातावद्धनंस्वकोशाद्द्यात्। यथाहगौतमः॥ ॥ चौरहृतमवजित्ययथास्थानंगमयेत्स्वकोशाद्वादद्य
दिति। कश्चिदुपायेनोपि॥ प्रत्याहर्त्तुमशक्तस्तुधनंचौरैर्हृतंयदि। स्वकोशात्तद्धिदेयंस्यादशक्तेनमहीक्षितेति॥ ॥इतिसाधा

निता ३.

रणसाधारणव्यवहारमातृका॥ साधारणसाधारणरूपम्। व्यवहारमातृकामभिधायाधुनाष्टादशानां व्यवहारपद
नामाद्यमृणादानपदं दर्शयति। अशीतिभागो वृद्धिः स्यादित्यादिना भोग्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धन इत्येवमन्तेन तेवर्णादा
नं सप्तविधं ईदृशास्त्रेणां देयमीदृशमदेयं अनेनाधिकरणा देयं अस्मिन्समये देयमनेन प्रकारेणा देयमित्यधमर्णे पंचविधो उत्त
मर्णे दानविधिरादानविधिस्त्वेतद्द्विविधमिति। एतच्च नारदेन स्पष्टीकृतं। ऋणं देयमदेयं च येन यत्र यथा च यत्। दान
ग्रहणधर्माश्च ऋणादानमिति स्मृतम्॥ तत्र प्रथममुत्तमर्णस्य दानविधिमाह॥ तत्पूर्वकत्वादितरेषां॥ अशीतिभागो
वृद्धिः स्यान्मासि मासि सबंधके। वर्णक्रमाच्छतं द्वित्रिचतुःपंचकमन्यथा। मासि मासीति मासं बंधकं विश्वासा
र्थं यदाधीयते स आधिरिति यावत्। बंधकेन सहावर्तत इति सबंधकः। प्रयोगः तस्मिन्सबंधके प्रयोगे प्रयुक्तस्य द्रव्यस्याशीति
तमो भागो वृद्धिर्धर्म्या भवति। अन्यथा बंधकरहिते प्रयोगे वर्णानां ब्राह्मणादीनां क्रमेणा द्वित्रिचतुःपंचकं शतं धर्म्म्यं भवति।
ब्राह्मणे त्तमर्णिके द्विकं शतं। क्षत्रिये त्रिकं वैश्ये चतुष्कं शूद्रे पंचकं मासि मासीत्येवं वृद्धौ चानपोवाववत्वारो वा पंचवा द्वित्रिच

राम ३०



तुष्कंवाः द्वित्रिचतुष्कंवा। अस्मिंश्छतेवृद्धिर्दीयतइतिद्वित्रिचतुष्कंचकंशतं। तदस्मिन्वृद्धायल्लाभस्तुक्षेपदादीयतइतिक
शा। इयंचवृद्धिर्मासिमासिगृह्यतइति। कालिका। इयमेववृद्धिर्दिवसगणनयाविभज्यप्रतिदिवसंगृह्यमाणाकायिकाभवति॥
॥तथाचनारदेन॥ ॥कायिकाकालिकाचैवकारितावतथापरा। चक्रवृद्धिश्चशास्त्रेषुतस्यवृद्धिश्चतुर्विधेत्युक्तं। कायाविरो
धिनीशश्वत्पणपादादिकायिकाप्रतिमासंस्रवंतीयावृद्धिः साकालिकामतावृद्धिःसाकारिताधमर्णिकेनस्वयंकृतावृद्धेरपिपुनर्वृद्धि
चक्रवृद्धिरुदाहृतेति॥ ॥अहीनविशेषेणवृद्धेःप्रकारांतरमाह॥ ॥कांतारगास्तुदशकंसामुद्राविंशकंशतं। कांतारस्मरणात्तत्रगच्छंती
ति रगाः। येवृद्ध्याधनंगृहीत्वाधिकलाभार्थमतिगहनंधाराधनविनाशसंकास्थानंप्रविशंतितेदशकंशतंदद्युः। येचसमुद्र
गास्तेविंशतंमासिमासित्येवंकांतारगेभ्योदशकंशतंसामुद्रेभ्यस्त्वविंशकंउत्तमर्णोदद्यात्मूलविनाशस्यापिशंकितत्वादि
ति इदानींकारितावृद्धिमाह दद्युर्वास्वकृतांवृद्धिंसर्वेसर्वासुजातिषु। सर्वेब्राह्मणादयोधमर्णाअवंधकेसवंधकेवा
स्वकृतांस्वाभ्युपगमंतांवृद्धिंसर्वासुजातिषुदद्युः। क्वचिदकृतापिवृद्धिर्भवति। यथाहनारदः नवृद्धिःप्रीतिदत्तानांस्यादना

57

मिता·
३१

कारिताक्ववृद्धि।अनाकारितमप्यूर्द्ध्वंवत्सरार्द्धाद्विवर्द्धतइतियस्तुयाचितंगृहीत्वादेशांतरंगतः॥तंप्रतिकात्यायनेनोक्तं योयातिंचि
कमादायतमदत्वादिशंव्रजेत।ऊर्द्ध्वंसंवत्सरात्तस्यतद्धनंवृद्धिमाप्नुयादितियस्तुयाचितमादाययाचितोप्यदत्वादेशांतरंयातितंप्र
तितेनैवोक्तं।कृतोद्धारमदत्वायोयाचितस्तुदिशंव्रजेत।ऊर्द्ध्वंमासत्रयात्तस्यतद्धनंवृद्धिमाप्नुयादिति।यःस्वदेशेस्थितएवयाचि
तोयाचितकंनददातितंयाचनकालादारभ्यवृद्धिंदापयेन्नृपः॥यथाह।स्वदेशेपिस्थितोयस्तुदिजेतं।नदद्याद्याचितःक्वचित।
तंततोकारितांवृद्धिमनिछंतंचदापयेदिति।अनाकारितवृद्धेरपवादोनारदोक्तः॥पण्यमूल्यंभृतिर्न्यासोदंडोयश्चप्रकल्पितः
वृथादानाक्षिकपणंवर्द्धतेनाविवक्षिताः॥अविवक्षिताः॥अविवक्षितं।अनाकारिताइति।अधुनाद्रव्यविशेषेणवृद्धिविशेषमाह।सं
ततिस्तुपशुस्त्रीणां।पशूनांस्त्रीणांसंततिरेववृद्धिः।पशूनांस्त्रीणांपोषणेऽसमर्थः॥स्यातात्पुष्टिसंततिकामस्यचयोगःसंभवतिग्रह
णंचक्षारपखिर्यार्थिना॥ अधुनाप्रयुक्तस्यद्रव्यस्यवृद्धिग्रहणमंतरेणचिरकालावस्थितस्यकस्यद्रव्यस्यकियतीपरावृद्धिरि
त्यपेक्षितआहारसस्याष्टगुणापरा।वस्त्रधान्यहिरण्यानांचतुस्त्रीद्विगुणापरा।रसस्यतैलघृतादेर्वृद्धिग्रहणमंतरेणचिर

राम
३१

कालावस्थितस्य स्वकृत्यातयावृद्ध्यवर्द्धमानस्याष्टगुणादूर्द्ध्ववृद्धिः परानामन्तपरवृद्धिरेतथ्याचवस्त्रध्यां धान्यहिरण्यानां यथासं
ख्यं चतुर्गुणा त्रिगुणा द्विगुणा चावृद्धिः परा। वसिष्ठेन तु रसस्याष्टगुणमुक्तं। द्विगुणं हिरण्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः
पुष्पमूलफलानि च तुला धृतमष्टगुणमिति। मनुना तु धान्यस्यैव पुष्पमूलफलादीनां पंचगुणत्वमुक्तं। धान्ये शदे लवे वाह्ये नाति
क्रमति पंचतामिति। शदः क्षेत्रफलपुष्पमूलादि लवो मेषाणां च मरीकेशादिः। वाह्यो बलीवर्दतुरगादिः। धान्यशदलववाह्यवि
षया वृद्धिः पंचगुणत्वं नातिक्रामतीति। तत्र धमर्णप्रयोगपतावशेन दुर्भिक्षादिकालवशेन च व्यवस्था द्रष्टव्या। एतच्च वक्ष्यमाणयोगस
कृदाहरणे च वेदितव्यं। पुरुषान्तरसंक्रमतो न प्रयोगान्तरकरणेन भिन्ने वा पुरुषे ऽनेकशः प्रयोगान्तरकरणे तु वर्णादिकं द्वैगुण्यम
प्यतिक्रम्य पूर्ववद्वर्धते। सकृत्प्रयोगेऽपि प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वा हृध्याहरणे द्रव्यर्णादेयस्य द्वैगुण्यात्संभवात्पूर्वं वृ
द्ध्या सह द्वैगुण्यमतिक्रम्य वर्धत एव॥॥ यथाह मनुः॥ ॥कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहिता। सकृदाहृतेत्यपि पाठो
ऽस्ति। उपचयार्थं प्रयुक्तं धनं तस्य वृद्धिः कुसीदवृद्धिर्द्वैगुण्यं नात्येति। यदि सकृदाहिता सकृत्प्रयुक्ता पुरुषान्तरसंक्रमणादि

59

मिता
३२

नाप्रयोगान्तरकरणोद्द्वैगुण्यमत्येति। सकृदाहाद्धृतेति तु पाठे शनैः प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वाधमर्णादाहृता द्वैगुण्यमत्ये
तीति व्याख्येयं तथा गौतमेनाप्युक्तम् चिरस्थाने द्वैगुण्यं प्रयोगस्येति॥ प्रयोगस्येत्येकवचननिर्देशात्प्रयोगान्तरकरणे द्वैगुण्या
तिक्रमोभिप्रेतः चिरस्थान इति निर्देशाच्छनैः शनैर्वृद्धिग्रहणे द्वैगुण्यातिक्रमो दर्शितः॥ ॥ऋणप्रयोगधर्म्मा उक्ताः। सांप्रतं प्रयु
क्तस्य धनस्य ग्रहणधर्म्मा उच्यन्ते। प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत्। साध्यमानो नृपं गच्छन्दंड्यो दाप्यश्च तद्धनं। प्रपन्नमभ्युपग
तमधमर्णेन धनं साक्ष्यादिभिर्भावितं वा साधयन्प्रत्याहरन्। धर्म्मादिभिरुपायैरुत्तमर्णो नृपतेर्वाच्यो विचारणीयो न भवति धर्माद
यश्चोपाया मनुना दर्शिताः॥ धर्म्मेण व्यवहारेण छलेनाचरितेन वा। प्रयुक्तं साधयेदर्थं पंचमेन बलेन चेति। धर्म्मेण प्रीतियुक्तेन सन्प
वचनेन व्यवहारेण साक्षिलेख्याद्युपन्यासेन छलेनोत्सवादिव्याजेन भूषणादिग्रहणेन। आचरितेनाभोजनेन पंचमेनोपा
येन बलेन निगडबंधनादिनोपपन्नयार्थं प्रयुक्तं द्रव्यमेतैरुपायैरात्मसात्कुर्यादिति। प्रपन्नं साधयन्नर्थं न वाच्य इति वदता प्र
तिपन्नं साधयन्राज्ञा निवारणीय इति दर्शयति। एतदेव स्पष्टीकृतं कात्यायनेन॥ ॥पीडयेद्यो धनी कश्चिदृणिकं न्यायवादिनं

राम
३

60.

तस्मादर्थान्सहायेतत्समंवाप्नुयादृणमिति। यस्तु धर्मादिभिरुपायैः प्रपन्नमर्थं साध्यमानो याच्यमानो नृपं गच्छेद्राजान
मभिगम्य साधयंतमभियुक्तेपदंड्यो भवति शक्त्यनुसारेण धनिनेतद्धनं दाप्यश्च राज्ञा वापनेचप्रकारादर्शिताः॥ राजा तु स्वाभि
ने विप्रंसात्वनैव दापयेत्। देशाचारेण वान्यास्तु दुष्टान्संपीड्य दापयेत्॥ रिक्थिनं सुहृदं वापि छलेनैव प्रदापयेदिति। साध्यमाने
नृपं गच्छेदिति पत्तस्मृत्यावारव्यपेतेनेत्यस्य प्रत्युदाहरणं वोद्धव्यम्॥ ॥ बहूषूत्तमर्णिकेषु युगपत्प्राप्तेषु कोधमर्णिकः केन
क्रमेण दाप्यो राज्ञेत्यपेक्षित आह। गृहीतानुक्रमो दाप्यो धनिनामधमर्णिकः। दत्वा तु ब्राह्मणायैव नृपतेस्तदनंतरं॥ स
मानजातीयेषु धनिषु येनैव क्रमेण धनं गृहीतं तेनैव क्रमेणाधमर्णिको दाप्यो राज्ञा भिन्नजातीयेषु तु ब्राह्मणादिक्रमेण॥ य
दा पुनरुत्तमर्णो दुर्बलः प्रतिपन्नमर्थं धर्मादिभिरुपायैः साधयितुमशक्नुवन्राज्ञा साधितार्थो भवति तदाधमर्णिकस्य दंड
मुत्तमर्णस्य च भृतिमाह। राज्ञाधमर्णिको दाप्यः साधिताद्दशकं शतं। पंचकं वा शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः॥
अधमर्णिको राज्ञा प्रतिपन्नार्थात्साधिताद्दशकं शतं दाप्यः प्रतिपन्नस्य साधितस्यार्थस्य दशमंशं राजाधमर्णिकात्

मिता
३३

दंडरूपेण गृह्णीयादित्यर्थः॥ उत्तमर्णिकस्त्वाभाषार्थः पंचकं शतं प्रतिरूपेण दाप्यः साधितस्यार्थस्य विंशतितमं भागमुत्तमर्णोऽध
ना भृत्यर्थं गृह्णीयादित्यर्थः॥ अप्रतिपन्नार्थसाधने तु दंडविभागो दर्शितो निह्नवे भावितो दद्यादित्यादिना॥॥ सधनमधमर्णिकं
प्रत्युक्त्वा धनानिर्धनमधमर्णिकं प्रत्याह। हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्। ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथाद
यं॥ ब्राह्मणोत्तमर्णो हीनजातिं क्षत्रियादिनामपि परिक्षीणं निर्धनमृणार्थं ऋणनिर्हृत्यर्थं कर्म स्वजात्युचितं कारयेत् कुटुंबविरोधे
न। ब्राह्मणः पुनः परिक्षीणो निर्धनः शनैर्यथोदयं यथासंभवं ऋणं दाप्यः। अत्र हीनजातिब्राह्मणसमजातेरप्युपलक्षणं। अतश्च
समजातिमपि परिक्षीणं यथोचितं कर्म कारयेत्। ब्राह्मणग्रहणं च श्रेयोजातेरुपलक्षणं। अतश्च क्षत्रियादिरपि परिक्षीणो वैश्यादेः
शनैः शनैर्दाप्यो यथोदयम्। एतदेव मनुना स्पष्टीकृतम्॥ कर्मणापि समं कुर्याद्धनिकेनाधमर्णिकाः समोपकृष्टजातिश्च दद्या
च्छ्रेयसस्तत्तु शनैः॥ इति उत्तमेन समं निर्दिष्टो उत्तमर्णाधमर्णव्यपदेशम्। मात्मानमधमर्णः कर्मणा कुर्यादित्यर्थः॥ ॥ किंच। दीयमानं
न गृह्णाति प्रयुक्तं यः स्वकं धनं मध्यस्थस्थापितं तस्माद्वर्द्धते न ततः परम्॥ अस्य उपवयार्थं प्रयुक्तं धनं स्वधर्मर्णेन दीयमानमुत्त

राम
३३

62



मर्णो वृद्धिलोभाद्यदि न गृह्णाति तदाधमर्णेन मध्यस्थहस्ते स्थापितं यदि स्यात्तदा ततः स्थापनादूर्ध्वं न वर्द्धते । अथ स्थापितमपि याच्य
मानो न ददाति ततः पूर्ववद्वर्द्धत एव ॥ ॥ इदानीं देयमृणं यद्दायेन च देयं तदाह ॥ ॥ अविभक्तैः कुटुंबार्थे यदृणं तु कृतं भवेत् ॥ दद्युस्तद्रिक्थिनः प्रे
तेप्रोषिते वा कुटुंबिनि । अविभक्तैर्बहुभिः कुटुंबार्थमेकेन वा यदृणं कृतं तदृणं कुटुंबी दद्यात् । तस्मिन्प्रेते प्रोषिते वा तद्रिक्थिनः सर्वे दद्युः ॥ ॥ ये
न देयमित्यत्र प्रत्युदाहरणमाह ॥ न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता । दद्यादृते कुटुंबार्थान्न पतिः स्त्रीकृतं तथा ॥ पत्या कृतमृणं यो
षिद्भार्या नैव दद्यात् पुत्रेण कृतं योषिन्माता न दद्यात् । तथा पुत्रेण कृतं पिता ~~दद्यादृते कुटुंबार्थान्न पतिः स्त्रीकृतं~~ न दद्यात्तथा । भार्याकृतं
पतिः ॥ कुटुंबार्थादृत इति सर्वशेषमतः कुटुंबार्थं येन केनापि कृतं कुटुंबिना देयं तदभावे तद्रिक्थहरैर्देयमित्युक्तमेव ॥ ॥ पुत्रपौत्रैर्ऋ
णं देयमितिवद्रूपाति ॥ ॥ तस्य पुरस्तादपवादमाह ॥ सुराकामद्यूतकृतं दंडशुल्कावशिष्टकं । वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकं ।
सुरापानेन यत्कृतमृणं कामकृतं स्त्रीव्यसननिमित्तं द्यूतपराजयनिमित्तं । दंडशुल्कयोरवशिष्टं वृथादानं धूर्तवंदिमल्लादिभ्यो यत्प्रति
ज्ञातं । धूर्ते वंदिनि मल्ले च कुवैद्ये कितवे शठे चाटचारणचौरेषु दत्तं भवति निष्फलमिति स्मरणात् । एतदृणं पित्रा कृतं पुत्रादिः सोऽ

मि २ या २

कृ५

मिता॰कादिभ्योनदद्यात्। अत्रदंडस्यशुल्कावशिष्टस्यग्रहणात्सर्वंदातव्यमितिनमंतव्यंदंडंवादंडशेषंवाशुल्कंतच्छेषमेववा। नदातव्यंतुपु
३४ त्रेणायच्चनव्यावहारिकमित्युशनसःस्मरणात्॥ ॥गौतमेनाप्युक्तं॥ ॥मद्यशुल्कद्यूतदंडानपुत्रानध्याभवेयुरिति। नपुत्रैर्देया स्यो
परिभवंतीत्यर्थः। अनेनादेयमृणमुक्तं॥ ॥नपतिस्त्रीकृतंतथेत्यस्यापवादमाह॥ गोपशौंडिकशैलूषरजकव्याधयोषि
तां। ऋणंदद्यात्पतिस्तासांयस्माद्वृत्तिस्तदाश्रया। गोपोगोपालः। शौंडिकःसुराकारः। शैलूषोनटः। रजकोवस्त्राणांरंजकः। व्या
धोमृगयुः। एतेषांयोषिद्भिर्यदृणंकृतंतत्पतिभिर्देयंयस्मात्तेषांवृत्तिर्जीवनंतदाश्रयायोषिदधीना। यस्माद्वृत्तिस्तदाश्रयेतिहेतु
व्यपदेशादन्येपियेयोषिदधीनजीवनास्तेपियोषित्कृतमृणंदद्युरितिगम्यते॥ ॥पतिकृतंभार्यानाद्द्यादित्यस्यापवादमाह। प्रति
पन्नंस्त्रियादेयंपत्यावासहयत्कृतं। स्वयंकृतंवायदृणंनान्यस्त्रीदातुमर्हति। मुमूर्षुणाप्रवत्स्यतावापत्यानियुक्तंऋणंदेयंप्रतिपतत्प्रति एम
कृतमृणंदेयंयच्चपत्यासहभार्ययाऋणंकृतंतदपिभर्त्रभावेभार्ययाऽपुत्रयादेयं। यच्चस्वयमेवकृतंऋणंतदपिदेयं। ननुप्रति ३४

तथादेयं२ त२ जिव्य२

पत्रादिन्नयं स्त्रियादेयमिति न वक्तव्यं संदेहाभावात्॥ ॥उच्यते॥ ॥भार्यापुत्रश्च दास[illegible]दासश्च त्रय एवाधनाः स्मृताः॥ यत्ते समधिगच्छं
नियस्यैतेतद्धनमिति चेन्नाभिर्द्धनत्वेन प्रतिपन्नादिषु दानासंकायामिदमुच्यते। प्रतिपन्नं स्त्रियादेयमित्यादि। न वा नेन न च न नेमस्त्री
दीनां निर्धनत्वमभिधीयते। परतंत्रमात्रे प्रतिपादनपरत्वात्॥ एतत्क — — प्रकरणे स्पष्टीकरिष्यते॥ नान्येन स्त्री दातुमर्हतीत्येतन्नर्हि न व
क्तव्यं। विधानैर्नैवान्यत्र प्रतिषेधसिद्धेः॥ ॥उच्यते॥ ॥प्रतिपन्नं स्त्रीयादेयं पत्या वा सह यत्कृतमित्यनयोरपवादार्थमुच्यते॥ अन्यत्सुराकामा
द्विव्यसनोपात्तं प्रतिपन्नमपि पत्यासत्कृतमपि न देयमिति॥ ॥पुनरपि यद्ऋणं[illegible]यद्दातव्यं येन यदा च दातव्यं तत्त्रितयमाह। पितरि प्रो[illegible]
[illegible] षिते प्रेते व्यसनाभिप्लुतेपि वा। पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितं। पिता यदि दातव्यमृणमदत्वा प्रेतो दूरदेशं वा गतो। ऽ
चिकित्सनीयव्याध्याद्यभिभूतो वा तदा तत्कृतमृणमवश्यापनेयं पुत्रेण पौत्रेण वा पितृधनाभावेपि पुत्रत्वेन पौत्रत्वेन वा तत्र क्रमो
प्यमेव पित्रभावे पुत्राभावे पौत्र इति। पुत्रेण पौत्रेण वा निह्नवे कृते अर्थिना साक्ष्यादिभिर्भावितमृणं देयं पुत्रपौत्रैरित्यन्वयः। अत्र
पितरि प्रोषित इत्येतावदुक्ते कालविशेषस्तु नारदेनोक्तो द्रष्टव्यो नार्वाक्संवत्सराद्विंशात्पितरि प्रोषिते सुतः। ऋणं दद्यात्पितृ

च्य

65

म३

मिता व्योवान्येषस्मात्तर्ह्यपिपितृण्यप्राप्तव्यवहारकालेनदद्यात्प्राप्तव्यवहारकालस्तु नारदोक्तो द्रष्टव्यः स कालस्तेनैव दर्शितः।। गर्भस्थैः

३५ सदृशो ज्ञेय आष्टमाद्वत्सराच्छिशुः । बालश्चाषोडशाद्वर्षात्पोगंडश्चेति शब्द्यते परतो व्यवहारज्ञः स्वतंत्रः पितुरावृत इतीयद्यपि पितृ

मरण।। दूर्ध्वं बालोपि स्वतंत्रो जातस्तथापि नर्णभवति यथा अप्राप्तव्यवहारोसौ स्वतंत्रोपि हि नर्णभाक् । स्वातंत्र्यं हि स्मृतं ज्ये

ष्ठं गुणवयःकृतमिति।। तथा आशेशात्वाननिषेधश्च दृश्यते। अप्राप्तव्यवहारस्य कृतो दानोद्दीनो मुखोद्गता। विषयस्थस्य

नामेध्यानदैना नाद्ध्येयेन्नपति। तस्मात् अतः पुत्रेण जातेन स्वार्थमुत्सृष्टयत्नतः। ऋणात्पितामोचनीयो यथा न नरकं

व्रजेदिति। पुत्रेण व्यवहारज्ञतया जातेनानिष्पन्नेनेति व्याख्येयं। श्राद्धे तु बालस्याप्यधिकारः। न ह्यसा। भिव्याहारयेद्ब्रह्म

स्वधानिनयनादृते इति गौतमस्मरणात्।। पुत्रपौत्रैरिति बहुवचननिर्देशाद्बहवः। पुत्रा यदि विभक्ताः स्वांशानुरूपेणर्णं दद्युः

। अविभक्ताश्चेत्संभूयसमुत्थानेन। गुणप्रधानभावेन वर्तमानानां प्रधानभूत एव दद्यादिति गम्यते।। ।। यथाह ना

रदः।। ।। अतऊर्ध्वं पितुः पुत्रा ऋणं दद्युर्यथांशतः। अविभक्ता विभक्ता वा यस्तां वोद्वहते धुरमिति। अत्रचयद्यपिपुत्रपौ रम ३५

66



ऋणंदेयमित्यविशेषेणोक्तंतथापुत्रेणयथापितासवृद्धिकंददातितथैवदेयंपौत्रेणतुसमंमूलमेवदातव्यंनवृद्धिरितिविशेषोव
गंतव्यं। ऋणमात्मीयवत्पित्र्यंपुत्रैर्देयंविभावितं। पैतामहंसमंदेयंतत्सुतस्यत्विति तिद्बृहस्पतिवचनात्॥ ॥ अत्रविभावितमित्यवि
शेषोपादानात्साक्षिभावितमित्यत्रसाक्षिग्रहणात्पुत्रैर्देयंविभावितं। पौतामंदेयंतत्सुतस्यत्वितिबृहस्पतिवचनात्॥ ॥ अत्रविभा
वितमित्यविशेषोपादानाद्द्वयं प्रमाणेऽप्युपलक्षणं। समंयावद्दत्तंतावदेवदेयंनवृद्धिःतत्सुतस्यपौत्रस्यादेयमगृहीतधनस्यएतद्वोत्त
रश्लोकेस्पष्टयिष्यते॥ ॥ ऋणापाकरणेऋणिनःपुत्रःपौत्रइतित्रयःकर्त्तारोदर्शिता तेषांचसामवायेक्रमोपदिशितइदानींकर्त्तांतरसा
मवायेवक्रममाह। ऋक्थग्राहऋणंदाप्योयोषिद्ग्राह[illegible]स्तथैवच। पुत्रोऽनन्याश्रितद्रव्यःपुत्रहीनस्यऋक्थिनः॥ ऋनः॥ अन्यदी
यद्द्रव्यमन्यस्यक्रयादिव्यतिरेकेणायत्स्वीभवत्युक्तंरिक्थंविभागद्वारेणरिक्थंगृह्णातीतिरिक्थग्राहःसंऋणंदाप्यःएतदुक्तंभवतियोयदी
यद्द्रव्यंतेनरिक्थ्याद्रूपेणगृह्णातिसतत्कृतमृणंदाप्योनचौरादिरिति। योषितंभार्यांगृह्णातीतियोषिद्ग्राहःसतथैवर्णंदाप्यः॥ यदीया
योषितंयोगृह्णातिसतत्कृतमृणंदाप्यः। योषितोविभाज्यद्रव्यत्वेनरिक्थव्यपदेशानर्हत्वाद्भेदेननिर्देशः। पुत्रश्चानन्याश्रितद्रव्यत्रा

67

मिता ३६

णां दाप्यः। अन्यमाश्रितमन्याश्रितं अन्याश्रितं मानापितृसंबंधिद्रव्यं यस्यासावनाश्रितद्रव्याः। तत्र अपाश्रितद्रव्या पुत्रहीनस्य ऋणं
दाप्य इति संबंधः। एतेषां समवाये क्रमश्च पाठक्रमेण स्त्रीग्राहस्त्वृणं दाप्यस्तदभावे योषिद्ग्राहस्तदभावे पुत्र इति। नन्वेतेषां समवा
यश्च नोपपद्यते। तत्रात रोनि पितुः पुत्रा रिक्थग्रहणः पितुरिति पुत्रे सत्यन्यस्य रिक्थग्रहणासंभवाच्च। योषिद्ग्राहोपि नोपपद्यते। तद्वि
तीयस्य साध्वीनां क्वचिद्भिर्नोपदिश्यत इति। स्मरणात्। तथर्णं पुत्रो दाप्य इत्यप्ययुक्तं पुत्रपौत्रैर्ऋणं देयमित्युक्तत्वात्। अनन्याश्रि
तद्रव्य इति विशेषणमप्यनर्थकं पुत्रे सति द्रव्यस्यान्याश्रयणासंभवात्। संभवे वा रिक्थग्राहित्वेनैवागतार्थत्वात्। पुत्रहीनस्य
रिक्थिन इत्येतदपि न वक्तव्यं। पुत्रे सत्यपि रिक्थग्राहकाणां दाप्य इति स्थितम् असति पुत्रे रिक्थग्राहः स्वनरो दाप्य इति सिद्धमेवे
ति। पुत्रे सत्यप्यन्यो रिक्थग्राहः संभवति क्लीबांधबधिरादीनां पुत्रवत्त्वेपि रिक्थहरत्वाभावात्। तथा च क्लीबादांस्तु कामं भर्तव्या
स्त्वतिरणशक्ता इति वक्ष्यति। तथा च वर्णापुत्रेप्यन्यायवृत्तेनानलभेतैतेषामिति॥ ॥गोतमवचनात्॥ ॥अतस्त्वक्लीबादिपुत्रे
षु सत्स्वन्यायवृत्ते नैव सवर्णापुत्रे सति रिक्थग्राही पितृव्यतत्पुत्रादिः योषिद्ग्राहो यद्यपि शास्त्रविरोधेन न संभवति तथाप्यतिक्रा

राम ३६

68

तथा पाठीनराजीवसशल्काश्च द्विजातिभिः। सेधाश्वाविदः। गोधा रुकलास
कारिणी सरहती। कच्छपः कूर्मः। शल्लकः शललो।
श्री ३
नं३

पंचनखाः सेधागोधाकच्छपशल्लकाः। शशश्च मत्स्येष्वपि हि सिंहतुंडकरोहिताः॥ शशः प्रसिद्धः। पंचनखानां च मार्जारश्वानरादीनां म
ध्ये एते सेधादयो भक्ष्याः। चकारात् खड्गोऽपि॥ यथाह गौतमः॥ पंचनखाश्च शल्लकशशकश्वाविद्गोधाखड्गकच्छपा इति। यथा मनुरपि।
श्वाविधं शल्लकं गोधां खड्गकूर्मशशांस्तथा। भक्ष्यान्पंचनखेष्वाहुरनुष्ट्रांश्चैकतोदत इति। यत्तु वसिष्ठे खड्गे तु विवदंत इत्यत्र तद्वा
त्वमुक्तं तच्छ्राद्धाभावे खड्गमांसे भविदत्वमन्यत्र पितृकर्मणीति श्राद्धे फलश्रुति दर्शनात्। यथा मत्स्यानां मध्ये सिंहतुंडादयो भ
क्ष्याः। सिंहतुंडः सिंहमुखः। रोहितो लोहितवर्णः। पाठीनश्चंद्रकाख्यः। राजीवः पद्मवर्णः। सहशल्कैः शल्काकारैर्वर्त्तत इति सशल्काः
एते सिंहतुंडादयो नियुक्ताः सर्वभक्ष्याः। पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः। राजीवान्सिंहतुंडांश्च सशल्कांश्चैव सर्वश इ
ति मनुस्मरणात्। द्विजातिग्रहणं शूद्रस्य दासार्थं। अनर्चितं वृथामांसमित्यारभ्य द्विजातिधर्मत्वेनोदानीं चातुर्वर्ण्यं प्रत्याह। अ
तः शृणुध्वं मांसस्य विधिं तद्ब्राह्मणा वर्जनीयो मांसस्य यो निषिद्धादेर्भक्षणेन तद्व्यतिरिक्तस्य ~~[illegible]~~ वा निषिद्धस्य वर्जने यो निषिद्धादिव्यति
रेकेण मांसं न त्याज्यमित्येवं संकल्प्य तं पवित्रं विधिं मामश्रवः प्रभृतयो हे मुनयः शृणुध्वं। तत्र महर्षिर्विधिं दर्शयति। प्राणात्यये तथा श्रा
द्धे प्रोक्षितं द्विजकाम्यया। देवान्पितॄन्समभ्यर्च्य खादन्मांसं न दोषभाक्। अन्नालाभेन म्रियत इति स वेन वा मांसभक्षणमेतरेणायदा

६९

मि॰ आ॰
३७

प्राणबाधासंभवे तदा नियमेन मांसं भक्षयेत्। सर्वत एवात्मानं गोपायेदित्यात्मरक्षणविधानात्। तस्मादुह न पुरायुषः स्वःकामी प्रेया
दिति मरणनिषेधाच्च। तथा श्राद्धे मांसं नियुक्तो नियमेन भक्षयेत्। अभक्षणे दोषश्रवणात्। यथाविनियुक्तस्तु यो मांसं संयतो नात्ति मा
नवः। स प्रेत्य पशुतां याति संभवानेकविंशतिमिति। प्रोक्षणाख्यश्रौतसंस्कारसंस्कृतस्य पशोर्यागार्थस्याग्नीषोमीयादेर्हुतावशिष्टं
मांसं प्रोक्षितं तद्भक्षयेदभक्षणे यागानिष्पत्तेः। द्विजकाम्यया ब्राह्मणभोजनार्थं देवपित्रर्थं च यत्साधितं तेन तानभ्यर्च्यावशिष्टं तद्भक्षयन्न
दोषभाक् भवति। एवं भृत्यभरणादसिद्धमपि। यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः। भृत्यानां चैव वृत्त्यर्थमगस्त्यो ह्याचरत्तथे
ति। मनुस्मरणात्। न दोषभागिति दोषाभावमात्रं वदता। तिथ्याद्यर्चनावशिष्टस्याभ्यनुज्ञामात्रं न प्रोक्षितादिवन्नियम इति दर्शितं।
एवमप्रतिषिद्धानामपि शशादीनां प्राणात्ययादिव्यतिरेकेण न भक्ष्यत्वावगमाद्दृष्टस्यापि मांसप्रवृत्तसर्वनिषेधावगम्यते। इदानीं
प्रोक्षितादिव्यतिरिक्तस्य वृथा मांसमित्यनेन प्रतिषिद्धस्य भक्षणे निंदार्थवादमाह। वसेत्स नरके घोरे दिनानि पशुरोमभिः। संमि
तानि दुराचारो यो हंत्यविधिना पशून्। अविधिना देवाद्युद्देशमंतरेण यः पशून्हंतीति तस्य पशोर्यावंति रोमाणि तावंति दिनानि नर
के घोरे वसति। हंतीत्यष्टविधो घातक उपलक्ष्यते। तथा हि मनुः। अनुमंता विशसिता निहंता क्रयविक्रयी। संस्कर्ता चोपहर्ता च खादकश्चे

राम
३७

तिथ्यात्मकाः। इदानीं वर्जने विधिमाह। सर्वान्कामानवाप्नोति हयमेधफलं तथा। गृहेऽपि निवसन्विप्रो मुनिर्म्मांसविवर्जनात्। यः प्रोक्षि-
तादिव्यतिरेकेण मद्यमांसं न भोक्तव्यमिति सत्यसंकल्पो भवति स सर्वान्कामान्मांसवर्जनसाधने प्रवृत्तो निर्विघ्नं प्राप्नोति विशुद्धाशयत्वात्।
यथाह मनुः॥ यद्ध्यायते यत्कुरुते रतिं बध्नाति यत्र वा। तदवाप्नोत्यविघ्नेन यो हिनस्ति न किंचनेति। एतच्चानुषंगिकं फलं। मुख्यफ-
लमाह। हयमेधफलं लभेतेति। एतच्च सांवत्सरिकसंकल्पस्य। वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः। मांसानि च न खादेद्यस्तयोः
पुण्यफलं सममिति मनुस्मरणात्। तथा गृहेऽपि निवसन्ब्राह्मणादिश्चातुर्वर्णिको मुनिर्वन्माननीयो भवति मांसत्यागात्। एतच्चन
प्रसिद्धमांसविषयं। नापि प्रोक्षितादिविषयं। पारिशेष्यादितिथ्याद्युक्तेनावशिष्टस्य पञ्चजातविषयमिति। इति भक्ष्याभक्ष्यप्रकरणं॥
इदानीं द्रव्यशुद्धिमाह। सौवर्णराजताब्जानामूर्ध्वपात्रग्रहाश्मनां। शाकरज्जुमूलफलवासोविदलचर्मणां। पात्राणां चमसानां च वारि-
णा शुद्धिरिष्यते। सौवर्णं सुवर्णकृतं। राजतं रजतकृतं। अब्जं मुक्ताफलशंखशुक्त्यादि। ऊर्ध्वपात्रं यज्ञीयोलूखलादि। ग्रहादिसाह-
चर्यात्। ग्रहाः षोडशी प्रभृतयः। अश्मा दृषदादिः। शाकं वास्तूकादि। रज्जुर्वल्वजादिनिर्मिता। मूलमार्द्रकादि। वासो वस्त्रं। विदलं वेणु-
वादि। चर्माजिनादीनां। विदलचर्मणोर्ग्रहणं तद्विकाराणां छत्रवस्त्रादीनामुपलक्षणार्थं। पात्राणि प्रोक्षणीपात्रप्रभृतीनि। चमसा

१

71

होत्रिचमसादयः। एतेषांसौवर्णादीनांलेपरहितानामुच्छिष्टस्पर्शमात्रेवारिणैवप्रक्षालनेनशुद्धिः। चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेनवा
रिणा। चरुश्चरुस्थाली। स्रुक्स्रुवौप्रसिद्धौ। सस्नेहानिपात्राणिप्राशित्रहरणादीनि। एतानिनिर्लेपरहितानिउष्णेनावारिणाशुध्यंति।
निर्लेपंकांचनंभांडमद्भिरेवविशुध्यति। अब्जमश्ममयंचैवराजतंचानुपस्कृतमितिमनुस्मरणात्। अनुपस्कृतमखातघर्षितं। सलेपा
नांतु। तैजसानांमणीनांचसर्वस्याश्ममयस्यच। भस्मनाद्भिर्मृदाचैवशुद्धिरुक्तामनीषिभिरितिमनुस्मरणाद्द्रष्टव्या। मृद्भस्मनोरेककार्यत्वा
द्विकल्पः। आपक्वसमुद्धीयंते। काकादिमुखोपहतेषुक्षशकुनिमुखावमृष्टंपात्रंनिर्लिखेत्। श्वापदमुखावमृष्टपात्रंनभुं
जीतेतिद्रष्टव्यं। एतच्चमार्जारादन्यत्र। मार्जारश्चैवदर्वीचमारुतश्चसदाशुचिरितिमनुस्मरणात्। स्फ्यशूर्पाजिनधान्यानामुसलोलू
खलानसां॥ स्फ्योवज्रोयज्ञांगं। अनःशकटं। शेषंप्रसिद्धं। एतेषामुष्णेवारिणाशुद्धिः। पुनरजिनग्रहणंयज्ञांगाजिनप्राप्त्यर्थं। प्रोक्ष
णंसंहतानांचबहूनांधान्यवाससां। संहतानामुक्ताशुद्धिर्व्यासक्तावयविनांबहूनांवाससांवासोग्रहणमुक्तशुद्धीनामुपलक्षणार्थं।
उक्तशुद्धीनांधान्यवासःप्रभृतीनांबहूनांराशीकृतानांप्रोक्षणेनैवशुद्धिः। बहुत्वंचस्पृष्टापेक्षया। एतदुक्तंभवति। यदाधान्यानिव
स्त्रादीनिवाराशीकृतानितत्रचांडालादिस्पृष्टानिबहूनिवास्पृष्टानितदास्पृष्टानामुक्तैवशुद्धिरितरेषांप्रोक्षणमिति॥ यथाचस्मृ

स्यंतरं। वस्त्रधान्यादिराशीनामेकदेशस्पृष्टप्राप्तौ। तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हतीति यदा पुनः स्पृष्टानां बहुत्वमस्पृष्टानां
चाल्पत्वं तदा सर्वेषामेव क्षालनं।। यथाह मनुः।। अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससां। प्रक्षालनेन त्वल्पानामद्भिः शौचं वि
धीयत इति। स्पृष्टानामस्पृष्टानां च समत्वेपि प्रोक्षणमेव। बहूनां प्रोक्षणविधानेनाल्पानां प्रक्षालने सिद्धे पुनरल्पानां क्षालनव
चनस्य समे पुनःक्षालननिवृत्त्यर्थत्वात्। इयत्स्पृष्टमियदस्पृष्टमित्यविवेके तु क्षालनमेव। पाक्षिकस्यापि दोषस्य परिहर्तव्यत्वात्।
अनेकपुरुषोद्धार्याणां धान्यवासःप्रभृतीनां स्पृष्टानां प्रोक्षणमेवेति निबंधकृतः। निर्लेपानां स्पर्शमात्रदुष्टानां शुद्धिमुक्त्वेदानीं स
लेपानां शुद्धिमाह। तक्ष्णं दारुशृंगास्थ्नां गोवालैः फलसंभुवां। मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि। दारूणां मेषमहिषा
दिशृंगाणां करिवराहाद्यस्थ्नामस्थिग्रहणेन दंतानामपि ग्रहणं। उच्छिष्टस्नेहादिलिप्तानां मृज्जलोदकादिभिरनपगते लेपानां। या
वन्नापैत्यमेध्याक्ताद्गंधो लेपश्च तत्कृतः। तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु। इति सामान्यशुद्धिविधानात्। तक्ष्णं तावन्मात्र
द्रव्यापचयो वा यथाशास्त्रं कर्मांगतया मार्जनं कार्यं। एतच्चोक्तमुदाहरणमन्येषामपि सौवर्णादीनां पात्राणां स्मार्त्तलौकिककर्मसु कृतशौ
चानामेवांगत्वमिति दर्शयितुं। यज्ञांगानां पुनः कृतशोधनानामिदं दशायविज्ञादिलिप्तमार्जनं संस्कारार्थमिति शेषः। इदानीं सले

73

मि.आ.
३९

पातानामेव केषांचिल्लेपापकर्षणे विशेषहेतूनाह। सौषैरुदकगोमूत्रैः शुद्ध्यत्याविककौशिकं। सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथा। उष
रमृत्तिकासहितेन गोमूत्रेणोदकेन वा लेपापेक्षया। आविकमूर्णामयं। कौशिकं कोशजवं पट्टादि प्रक्षालितं शुद्ध्यति। उदकगोमूत्रैरिति
बहुवचनं पश्चादप्युदकप्राप्त्यर्थं। अंशुपट्टं वल्कलतंतुजातं सश्रीफलैर्विल्वफलसहितैः। कुतपः पर्वतीयच्छागरोमनिर्मितः कंबलः
। अरिष्टफलसहितैः फेनकसहितै रुदकगोमूत्रैः शुद्ध्यतीत्यनुवर्त्तते। एतच्चोच्छिष्टस्नेहादियोगे सति वेदितव्यं। अल्पोपघाते तु प्रोक्षणा
दिक्षालनासहत्वात्। सर्वद्रव्यानाशे नैव शुद्धेरिष्टत्वात्। तथा च देवलः। अर्णाकौशेयकुतपपट्टक्षौमदुकूलकाः। अल्पशौचा भवंत्ये
ते शोषणप्रोक्षणादिभिरित्यभिधायाह। तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः। धान्यकल्कैस्तु फलजै रसैः क्षारानुगैरपीति। क्षौ
मवदेव शाणस्य समानियोनित्वात्। ऊर्णादिग्रहणं तदारब्धतूलिकादिप्राप्त्यर्थं। अतश्च स्वल्पोपघाते नैव क्षालनं कार्यममेध्यलेपाद
न्यत्र। तूलिकामुपधानं च पुष्परक्तांबरं तथा। शोषयित्वातपे किंचित्करैः समार्जयेन्मुहुः। पश्चात्तु वारिणा प्रोक्ष्य विनियुंजीत कर्मणि।
तान्यप्यतिमलिष्टानि यथावत्परिशोधयेदिति देवलस्मरणात्। पुष्परक्तानि कुसुंभकुंकुमादिरक्तानि। पुष्परक्तग्रहणमन्यस्यापि हरिद्रा
दिरक्तस्य प्राप्त्यर्थं न मांजिष्ठादेः। तस्य क्षालनसहत्वात्। शंखेनाप्युक्तं। रागद्रव्याणि प्रोक्षितानि शुचीनीति। सगौरसर्षपैः क्षौमं पुनःप

राम
३९



कान्महीमयं। गौरसर्षपसहितैरुदकैर्गोमूत्रैः क्षौमं क्षुमाऽतसी तत्सूत्रनिर्मितं क्षौमं शुद्ध्यति। पुनः पाकेन च मृन्मयं चरादि। एतच्चोच्छिष्टस्नेह
लिप्ते वेदितव्यं। चांडालाद्युपघाते तु त्याग एव॥ यथाह पराशरः॥ चांडालाद्यैः स्पृष्टं धान्यं वस्त्रमथापि वा। प्रक्षालनेन शुद्ध्येत परित्यागा
न्महीमयमिति॥ कारुहस्तः शुचिः पण्यं भैक्ष्यं योषिन्मुखं तथा। कारवो रजकचैलधावकसूपकाराद्यास्तेषां हस्तः शुचिः। शुचित्वं च तत्साध्ये
कर्मणि। वक्ष्यमाणनोदोसूतकादिसत्त्वेऽपि। तथा च स्मृत्यंतरे। कारवः शिल्पिनो वैद्या दासीदासास्तथैव च। राजानो राज
भृत्याश्च सद्यः शौचाः प्रकीर्तिता इति। पण्यं पणार्हं हट्टे विक्रेयं यवव्रीह्यादि अनेकक्रेतृजनकरपरिवर्तितमप्यप्रयतं नतव
ति। सूतकादिनिमित्तेनैव निंद्यं। भिक्षाणां समूहो भैक्ष्यं तद्भूस्वार्यादिगतमनाचांतस्त्रीप्रदानाच्च विरथ्यादिक्रमणादिनापि
न दुष्यति। तथा योषिन्मुखं संभोगकाले शुचि। स्त्रियः स्वरतिसंसर्गे इति स्मरणात्। इदानीं भूशुद्धिमाह॥ भूशुद्धिर्मार्जनाद्दाहा
त्कालाद्गोक्रमणादपि। सेकादुल्लेखनाल्लेपाद्गृहं मार्जनलेपनात्॥ मार्जिनी पांसुतृणादीनां शोधनं सारणं मार्जनं। दाहस्तृणकाष्ठ
द्यैः। कालो यावता कालेन लेपादिक्षयो भवति तावान्। गोक्रमणं गवां पादयविहरणं सेकः क्षीरगोमूत्रगोमयवारिभिः। प्रव
र्षणं वा। उल्लेखनं तक्षणं खननं वा। लेपो गोमयादिभिः। एतैर्मार्जनादिभिः समस्तैर्व्यस्तैर्वा। मेध्याद्युपहता मलिना च भूमिः शुद्ध्य



·आ·
५०

ति। तथाच देवलः। यत्र प्रसूयते नारी म्रियते दह्यतेपि वा। चांडालाद्युषितायां च यत्र विष्ठादिसंगतिः। एवं कश्मलभूयिष्ठाभूयिष्ठाभू
रमेध्या प्रकीर्तिता। श्वसूकरखरोष्ट्रादिसंस्पृष्टा दुष्टतां व्रजेत्। अंगारतुषकेशास्थिभस्माद्यैर्मलिना भवेदिति। अमेध्या दुष्टा मलिनेति
शोध्यं भूमेश्च विश्वमातिशाय शुद्धिविभागं दर्शयति। पंचधा वा चतुर्धा वा भूरमेध्या विशुध्यतीति। दुष्टा त्रिधा द्विधा वा शुध्यते मलि
नैकधेति। यत्र मनुष्या दह्यंते यत्र वा चांडालैरध्युषितं तयोः पंचभिर्दहनकालगोक्रमणासेकोल्लेखनैः शुद्धिः। यत्र च मनुष्या जायंते
यत्र वा म्रियंते यत्र चात्यंतं विष्ठादिसंगतिस्तासां दाहवर्जितैरेतैश्चतुर्भिः। श्वसूकरखरैश्चिरकालमध्युषितायां गोक्रमणासेकोल्ले
खनैस्त्रिभिः। उष्ट्रग्रामकुक्कुटादिभिश्चिरकालमधिवासितायाः सेकोल्लेखनाभ्यां शुद्धिः। अंगारतुषादिभिश्चिरकालमधिवासिता
या उल्लेखनेन शुद्धिः। मार्जनलेपने तु सर्वत्र समुच्चीयेते एव। गृहं संमार्जनोपलेपाभ्यां शुध्यति। गृहस्थं गुपादानं मार्जनलेपनयोः
प्रतिदिवसं घासार्थं। गोघ्राते ऽन्ने तथा केशमक्षिकाकीटदूषिते। सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये। गोभिः श्वासोपहते ऽन्नेऽत्र
दनीयमाडे। तथा केशमक्षिकाकीटादिदूषिते। केशग्रहणं लोमादिप्राप्त्यर्थं। कीटाः पिपीलिकादयः। उदकं तस्म मृद्वा यथा
संतवं प्रक्षेसव्यास्पृश्यार्थम्। यत्तु गौतमेनोक्तं। नित्यमतोऽन्यं केशकीटावपन्नमिति। तत्केशकीटादिभिः सह यत्पक्कं तद्विषयं। अउपसी
ध्य

राम
५०

ता।

सकताम्राणां क्षाराम्लोदकवारिभिः । भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य तु । त्रपुप्रभृतीनि प्रसिद्धानि तेषां क्षारोदकेनाम्लोदके
नाम्लोदकेन वारिणा वोपघातयेऽक्षया समञ्जस्येनैव शुद्धिः प्लावो द्रवस्य [illegible]कायां । कांस्यलोहानां भस्मोदकेन । ताम्रग्रहणं रीतिकाय
सलोहयोर्ग्रहणं । एकयोनित्वात् ॥ एतच्च ताम्रादीनामम्लोदकादिभिः शुद्ध्यतीति विधानं न नियमार्थं । मलसंयोगजं तज्जं यस्य येनोप
हन्यते । तस्य तच्छोधनं प्रोक्तं सामान्यं द्रव्यशुद्धिकृदिति विशेषस्मरणात् । अतो न ताम्रादेरुच्छिष्टादिलेपस्पर्शेनायगमसंलवेनि
यमेनाम्लादिना शुद्धिः कार्या । अत एव मनुना सामान्येनोक्तं । ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च । शौचं यथार्हं कर्तव्यं क्षा
राम्लोदकवारिभिरिति । भस्मना शुद्ध्यते कांस्यं ताम्रमम्लेन शुद्ध्यतीति । ननु । अम्लादेः शौचस्य परां काष्ठां प्रतिपादयितुं नान्यनि
षेधाय । यदा तूपघातातिशयः स्यात्तदाम्लोदकादीनामावृत्तिः । गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि तु । शुद्ध्यन्ति दश
भिः क्षारैः श्वकाकोपहतानि चेति स्मरणात् । शुद्धिः प्लावो द्रव्यस्यात्यंतद्रव्यस्य घृतादेः प्रस्थप्रमाणाधिकस्य श्वकाकाद्युप
हतस्यामेध्यसंस्पृष्टद्रव्यस्पृष्टस्य च प्लावः । प्लावनं समानजातीयेन द्रव्येण तांऽस्यातिश्रणां यावन्निःसरणं शुद्धिरित्यनुवर्तते ।
ततोऽल्पस्य त्यागः । बह्वल्पत्वं च देशकालाद्यपेक्षया वेदितव्यं । यथाह बौधायनः । देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं । उपपत्ति

77

मि॰ आ॰ ५१ मवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति। कीटाद्युपहतस्य तूत्पवनं यथाह मनुः द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतमिति। उत्पवनं
चात्र वस्त्रांतरितेमात्रे प्रक्षेपः। अन्यथा कीटाद्युपरागमस्यासंभवात्। स्नेहभांडस्थितस्य तु मक्षिकादेः पात्रांतरानयनाच्छुद्धिः। महद
के पयःप्रभृतिकाराश्च पात्रात्पात्रांतरानयनाच्छुद्धा इति बोधायनस्मरणात्। मनुस्तु तादेवाणां पसदहस्मात्त्रामस्य पात्रांतरानयनं पुनः
पवनं च कार्यं यथाह शंखः अभ्यवहार्याणां हुतेनाल्लिखारितानां पुनः पचनमेवं स्नेहानां स्नेहवद्धमानामिति। एवं सौवर्णराजतादी
नां एतत्प्रकरणप्रतिपादितानां सर्वेषां शुद्धिरुच्छिष्टाद्युपघाते शुद्धिरुक्तेदानीं तेषाममेध्योपहतानां शुद्धिमाह। अमेध्याक्तस्य मृत्तोयैः
शुद्धिर्गंधापकर्षणात्। अमेध्याः शारीरमला वसाशुक्रादयः। वसा शुक्रमसृग्मज्जा मूत्रं विट्कर्णविण्नखाः। श्लेष्माश्रुदूषि
का स्वेदो द्वादशैते नृणां मलाः। तथा मानुषास्थि शवं विष्ठा रेतो मूत्रार्तवं वसा स्वेदाश्रुदूषिका श्लेष्म मद्यं चामेध्यमुच्यत इति मनुदे
वलप्रतिपादिताः। तैर्वसादिभिरक्तं लिप्तममेध्याक्तं तस्य मृदा तोयेन च शुद्धिः कर्तव्या। गंधापकर्षणेन गंधग्रहणाल्लेपस्यापि राम
ग्रहणं। यथाह गौतमः। लेपगंधापकर्षणे शौचममेध्यलिप्तस्येति। सर्वशुद्धिष्वयं प्रथमं मृत्तोयैरेव लेपगंधापकर्षणं कार्यं। ५१

श्रा डि २

व

अथशक्तावन्येनतद्राज्ञिःपूर्वंमृदावेतिगौतमवचनात्।वसादिग्रहणंचसर्वेषाममेध्यत्वप्रतिपादयितुंनसमानोपघातयातें थामानुषामद्यैर्मूत्रपुरीषैश्चश्लेष्मपूयाश्रुशोणितैः।संस्पृष्टंनैवशुद्ध्येतपुनःपाकेनमृन्मयमित्युपघातविशेषाभिधानात्।अमेध्यत्वंचैषांदेहाद्येवमलाश्च्युताइतिवचनात्।देहतश्च्युतानामेव।नस्वस्थानावस्थितानां।ऊरुपार्श्वनाभिलिङ्गहृत्करव्यतिरिक्तानामंगानामन्यामेध्यस्पर्शेस्नानं॥यथाहदेवलः॥मानुषास्थिवसाविष्ठामार्तवंमूत्ररेतसी।मज्जानंशोणितंस्पृष्ट्वापरस्यस्नानमाचरेत्।तान्येवस्वानिसंस्पृश्यप्रक्षाल्याचम्यशुद्ध्यतीति।तथोर्ध्वंनाभेःकरौमुक्त्वायदङ्गमुपहन्यते।तत्रस्नानमधस्तात्तुप्रक्षाल्याचम्यशुद्ध्यतीति।वाक्शस्तमंबुनिर्णिक्तमज्ञातंचसदाशुचि।कृतेपियथोक्तेशौचेमनसोऽपरितोषाद्यत्रशुद्धिसंदेहोभवति।तद्वाक्शस्तमंबुनिर्णिक्तमज्ञातंचसदाशुचि।शुद्धमेतदस्त्वितिब्राह्मणवचनेनशुद्धंभवतीत्यर्थः।अंबुनिर्णिक्तंयस्यप्रतिपदोक्ताशुद्धिर्नास्तितस्यप्रक्षालनेनशुद्धिः।प्रक्षालनासहस्यप्रोक्षणेन।अज्ञातंयदायत्काकाद्युपहतमुपभुक्तंनकदाचिदपिज्ञायतेतच्छुचि।तदुपभोगाददृष्टदोषोनास्तीत्यर्थः।नचैतद्विरुद्धमुच्यते।संवत्सरस्यैकमपिचरेत्कृच्छ्रंद्विजोत्तमः।अज्ञातभुक्तशुद्ध्यर्थंज्ञातस्यतुविशेषतः।इत्यदृष्टदोषेपिप्रायश्चित्तप्रपादनात्।नैतत्प्रायश्चित्तस्यजग्धिविषयत्वात्।दोषाभवस्यचान्योपयोगविषयत्वात्।

ति १

79



मि॰ आ॰
४२

शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतं। तथा मांसं श्वचांडालक्रव्यादादिनिपातितं। महीगतं भूमिस्थमुदकं एकगवितृप्तिजननसमर्थं चां
डालादिनिरस्पृष्टं प्रकृतिरूपरसगंधस्पर्शांतरमनापन्नं शुच्याचमनादियोग्यं भवति। महीगतमिति। अशुद्धभूगतस्य शुचित्वनिषेधनार्थं नत्वं
तरिक्षोदकस्य शुद्धत्वव्यावृत्त्यर्थं नाशुद्धतस्य। उद्धृतास्वापि शुद्धा न्ति शुद्धैः पात्रैः समुद्धृताः। एकरात्रोषिता आपस्त्याज्याः शुद्धा अपि स्वय
मिति देवलवचनात्।। तथा चांडालादिकृते तडागादौ न दोषः। अंत्यैरपि कृते कूपे सेतौ वाप्यादिके तथा। तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं
न विद्यते।। इति शातातपस्मरणात्।। तथा मांसं श्वचांडालक्रव्यादादिनिपातितं शुचि। आदिग्रहणात् सुषसादेरपि ग्रहणं।। निपातितग्रहणं
भक्षितस्य निराकरणार्थं। रश्मिरग्निरजः छाया गौरश्वो वसुधानिलाः। विप्रुषो मक्षिकास्पर्शे वत्सः प्रस्रवणे शुचिः। रश्मयः सूर्यादिप्र
काशद्रव्यस्य अग्निः प्रसिद्धः रजः अजादिसंबंधव्यतिरेकेण। तत्र। श्वकाकोष्ट्रखरोलूकसूकरग्रामपक्षिणां। अजादिरेणुसंस्पर्शादि
[illegible]हीयत इति दोषश्रवणात्। तत्स्पर्शे संमार्जनादिकं कार्यं।। छाया वृक्षादेः। गौः। अश्वः। वसुधा भूमिः। अनिलो वायुः। विप्रुषो
वशपायविंदवः। मुखजानां वक्ष्यमाणत्वात्। मक्षिकाश्च। एते चांडालादिस्पृष्टा अपि स्पर्शे शुचयः। वत्सः प्रस्रवणेऽधोगतदुग्धाकर्ष
णेशुचिः। वत्सग्रहणं बालस्योपलक्षणार्थं। बालैरनुपरिक्रान्तं नित्यमेध्यमिति रितिवचनात्। अश्वं मुखतो मेध्यं न गोर्न नरजा मलाः।

रुमी

आदिग्रहणात् संमार्जनादिरजो ग्रह्यते ३

जा।

राम
४२



पंथानश्च विशुद्ध्यन्ति सोमसूर्यांशुमारुतैः। अजाश्वयोर्मुखं मेध्यं न गोर्न नरजा मलाः। नरशब्दो लक्षणाया देहमलिर्यन्नो। तज्जा मला वमाद्योऽ
मेध्या न भवंति। पंथानो मार्गाश्चांडालादिभिः स्पृष्टा अपि रात्रौ सोमांशुभिर्मारुतेन च शुध्यंति दिवा सूर्यांशुभिर्मारुतेन। मुखजा विप्रुषो
मेध्यास्तथा वमनबिंदवः। श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा ततः शुचिः। मुखजा नासुखजाः श्लेष्मविप्रुषो मेध्या नोच्छिष्टं कुर्वन्ति। आनिप
तितास्वेदंगे। न श्मश्रुपा विप्रुषोच्छिष्टं कुर्वन्ति न चेद्दंतो निपतंतीति गौतमवचनात्। तथा वमनतोऽपसर्पये बिंदवः पादौ स्पृशंतीति तेऽपि मे
ध्याः श्मश्रु चास्यप्रविष्टमुच्छिष्टं न करोति। दंतसक्तं चान्नादिकं स्वयमेव च्युतं तस्माच्छुचिर्भवति। अच्युतं तु दंतसमं॥ तथा च गौतमः। दं
तश्लिष्टेषु दंतवदन्यत्र जिह्वाभिमर्शनात्। प्राक्च्युतेरित्येके च्युतेष्वास्राववद्विद्यान्निगिरन्नेव तच्छुचिरिति निगिरणं भक्षणं तेन यास्राव
ल्लेपोऽक्नेन त्यागेन विकल्प्यते। निगिरन्नेवेत्येवकारः। चर्वणे त्वाचमेन्नित्यं मुक्त्वा तांबूलचर्वणं ओष्ठौ विलोमकौ स्पृष्ट्वा वासोऽपि परिधा
य चेति। विप्रुष्कावमननिषेधार्थः। तांबूलग्रहणं फलाद्युपलक्षणार्थं यथाह शातातपः॥ तांबूले च फले चैव भुक्तस्नेहावशिष्टके।
दंतलग्नस्य संस्पर्शे नोच्छिष्टो भवति द्विज इति। स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्यापसर्पणे। आचांतः पुनराचामेद्वासो विपरिधाय च॥
स्नानपानक्षुतस्वप्नभोजनरथ्यापसर्पणवासोविपरिधानेषु कृतेष्वाचांतः पुनराचामेत्। द्विराचमेदित्यर्थः। कारग्रहणादध्ययना
च

८१

रत्वा पर्यन्तोक्तादिषु॥ तथा च वसिष्ठः॥ सुप्त्वा क्षुत्वा भुक्त्वा स्नात्वा पीत्वा रुदित्वा चाचान्तः पुनराचामेदिति॥ मनुरपि॥ सुप्त्वा क्षुत्वा च भुक्त्वा च नि
ष्ठीव्योक्त्वानृतं वचः। पीत्वापोध्येष्यमाणश्च आचमेत प्रयतोपि सन्निति। भोजने त्वादावपि द्विराचमनं। भोक्ष्यमाणः प्रयतोपि द्विराचा
मेदित्यापस्तम्बस्मरणात्। स्नातपादयोरादौ सकृत्। अध्ययने त्वारंभे द्विः। शेषेष्वन्त एवोक्तं द्विराचमनं। रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववा
यसैः। मारुतेनैव शुद्ध्यन्ति पक्वेष्टकचितानि च। रथ्या मार्गः। कर्दमः पंकः। तोयमुदकं। रथ्यास्थितानि कर्दमोदकानि अंत्यैश्चण्डाला
दिभिः श्वभिर्वायसैश्च स्पृष्टानि मारुतेनैव शुद्धिमुपयाति। एतच्च प्रोक्षणं संहतानामिति सूक्तप्रोक्षणनिषेधार्थं। तृणकाष्ठपर्णादि भस्मा
नां तु प्रोक्षणमेव ॥ इति द्रव्यशुद्धिप्रकरणम् ॥ इदानीं दानधर्मं प्रतिपादयिष्यंस्तदंगभूतपात्रप्रतिपादनार्थं तत्प्रशंसामाह। तपस्तप्त्वा
सृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये। तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च। ब्रह्मा हिरण्यगर्भः कल्पादौ तपस्तप्त्वा सृष्टेर्ध्यानं कृत्वा कथं सुखात्सृ
जामीति पूर्वं ब्राह्मणान्सृष्टवान्। किमर्थं वेदगुप्तये वेदसंरक्षणार्थं पितॄणां देवानां च तृप्त्यर्थं। अनुष्ठानोपदेशद्वारेण धर्मरक्षणार्थं च
। अतस्तेभ्यो दत्तमक्षय्यफलं भवतीत्यतिशयः। सर्वस्य प्रभवो विप्राः श्रुताध्ययनशालिनः। तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योप्यध्यात्मवित्त
माः। सर्वस्य जगतो विप्रादेर्विप्राः प्रभवः श्रेष्ठा जात्या कर्मणा च। ब्राह्मणेष्वपि श्रुताध्ययनशालिनः। श्रुताध्ययनसंपन्ना उत्कृष्टाः। तेभ्योपि

क्रियापरा विहितानुष्ठानशीलास्तेभ्योप्यध्यात्मवित्तमाः। वक्ष्यमाणलक्षणमार्गेण शमदमादियोगेनात्मतत्वज्ञाननिरताः श्रेष्ठा इत्यनुष
ज्यते। एवं जातिविद्यानुष्ठानतपसां प्रशंसामुखेनैकैकयोगे पात्रतामभिधायाधुना तेषां समुच्चये संपूर्णपात्रतामाह। न विद्यया केवलया
तपसा वापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितं। केवलया विद्याश्रुताध्ययनसंपत्त्या नैव संपूर्णपात्रत्वं नापि केवलेन त
पसा शमदमादिना। अपि शब्दात्केवलानानुष्ठानेन केवलजात्या वा नैव संपूर्णपात्रता। कथं तर्हि यत्र पुरुषे वृत्तमनुष्ठानं इमे चोभे विद्यात
पसी स्तः। चशब्दाद्ब्राह्मण्यजातिश्च। तदेवमब्वादितिः संपूर्णपात्रं प्रकीर्तितं हि यस्मादतः परमुत्कृष्टं पात्रं नास्ति। अत्र जातिविद्या
नुष्ठानतपःसमुच्चयानामुत्तरोत्तरोत्तरप्राशस्त्येन फलतारतम्येन द्रष्टव्यं। गोभूतिलहिरण्यादिपात्रे दातव्यमर्चितं ना
पात्रे विदुषा किंचिदात्मनः श्रेय इच्छता। पूर्वोक्ते पात्रे गवादिकमर्चितं शास्त्रोदकदानादीतिकर्तव्यतासहितं देयं। अपात्रे त्ववि
द्यादौ ब्राह्मणे च पतितादौ विदुषा पात्रविशेषेण फलविशेषं जानता श्रेयः संपूर्णफलमिच्छता किंचिदल्पमपि न दातव्यं। श्रे
योग्रहणादपात्रविशेषेण फलविशेषं जानता श्रेयद्दानेपि किमपि तामसं फलमश्नातीति सूचितं। यथाह कृष्णद्वैपायनः॥ अदे
शकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमवज्ञातं तत्तामसमुदाहृतमिति। अपात्रेण दातव्यमिति वदता विशिष्टदेशकाल

क॰

मि.आ.
४४

द्रव्यसन्निधौ पात्रस्यासन्निधाने द्रव्यस्य वा तदुद्देशेन त्यागं तस्मै प्रतिश्रवणं वा कृत्वा समर्पयेत् सत्पात्रे दातव्यमिति सूचितं। तथा प्रति
श्रुतमपि पश्चात्पातकादिसंयोगे ज्ञाते न देयं। प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दिति निषेधात्। अपात्रे दातुर्निषेधमुक्त्वा प्रतीग्रहीतु
रप्याह। विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः। गृह्णन्प्रदातारमधो नयत्यात्मानमेव च। विद्यातपोभ्यां हीनेन प्रतिग्रहः सुव
र्णादिर्न ग्राह्यः। यस्माद्विद्यादिहीनः प्रतिगृह्णन् दातारमात्मानं चाधो नरकं प्रापयति। गवादि पात्रे दातव्यमित्युक्तं तत्र विशेषमाह।
दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः। याचितेनापि दातव्यं श्रद्धापूतं तु शक्तितः। प्रतिदिवसं शक्त्यनुसारेण यथोक्तविधिना पात्रे ग
वादिकं स्वकुटुंबाविरोधेन दातव्यं। निमित्तेषु चंद्रोपरागादिकं यत्नेन दातव्यं। याचितेनापि श्रद्धापूतमनसूयापवित्रीकृतं शक्त्या
दातव्यं याचितेनापि दातव्यमिति वदता यथोक्तपात्रं स्वयमेव गत्वा आहूय च। यद्दानं तत्सहस्रफलमुक्तं। यथास्मरणं गत्वा यद्दीयते दा
नं तदनंतत्फलं स्मृतं। सहस्रगुणमाहूय याचिते तु तदर्द्धमिति। गत्वा गवादिकं देयमित्युक्तं। तत्र गोदाने विशेषमाह। हेमशृंगी श
फै रौप्यैः सुशीला वस्त्रसंयुता। सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा। हेममये शृंगे यस्याः सा हेमशृंगी। शफै रौप्यै रजतैः खु
रैः संयुता। वस्त्रेण च संयुता। कांस्यपात्रसहिता। बहुक्षीरा गौर्यथाशक्ति दक्षिणासहिता दातव्या गोदानफलमाह। दातास्याः स्व

राम
४४

र्गमाप्नोति वत्सरान् स्वर्गमाप्नोति दाता। सा गौर्यदि कपिला तद्दानं केवलं दातारं तारयति किं तु कुलमपि। आसप्तमं सप्तम
मतिव्याप्य पित्रादीन्षट् पुत्रादीन्षडात्मानं च सप्तमं। अप्यर्थे भूयः शब्दः। सवत्सारोमतुल्यानि युगान्युत ततो सुखी। दातास्याः
स्वर्गमाप्नोति पूर्वेण विधिना ददत्। सवत्सरोमतुल्यानि वत्सेन सह वर्त्तत इति सवत्सा तस्या रोमतुल्यानि वत्सस्य गोश्च यावं(
ति रोमाणि तावत्संख्याकानि युगानि कृतत्रेतादीनि उभयतोमुखी ददत् स्वर्गमवाप्नोति प्रसूतवती। पूर्वेण विधिना ये ह्याता
।काधुनरुभयतोमुखी कथं वा तद्दानं महाफलमित्यत आह। यावत्ससस्य पादौ मुखं योन्यां प्रदृश्यते। तावद्गौः पृथिवी ज्ञे
या यावद्गर्भं न मुंचति। गर्त्तात्रिर्गच्छतो वत्सस्य द्वौ पादौ मुखं योन्यां प्रदृश्यते तावत्कालमुभयतोमुखमस्याश्चास्तीति उभयतो
मुखी यावत्कालं गर्भं न मुंचति तावत्सा गौः पृथिवी समा ज्ञेया ऽतः फलातिशयो मुक्तः। यथाकथंचिद्धृत्वा गां धेनुं वा धेनुं दो
ग्ध्रीमधेनुं वा ऽवंध्यामरोगां रोगरहितां। अपरिक्लिष्टां नित्यं तदुर्बलां गां दत्वा दाता स्वर्गे महीयते पूज्यते। गोदानसमान्याह।
श्रांतसंवाहनं रोगिपरिचर्या सुरार्चनं। पादशौचं द्विजोच्छिष्टमार्जनं गोप्रदानवत्। श्रांतस्यासनशयनादिदानेन श्रमापनयनं
श्रांतसंवाहनं। रोगिणां परिचर्या यथाशक्त्यौषधादिदानेन। सुरार्चनं हरिहरहिरण्यगर्भादीनां गंधमाल्यादिनाराधनं। पा

85

२१२

मि॰ आ॰
४५

दशौचं द्विजानां समानामधिकानां च । तेषामेवोच्छिष्टस्य संमार्जनं । एतान्यनंतरोक्तेन गोदानेन समानीति । भूदीपाश्चान्नवस्त्रां
म्भस्तिलसर्पिः प्रतिश्रयान् । नैवेशिकस्वर्णधुर्याणि दत्वा स्वर्गे महीयते । भूः फलप्रदा । दीपो देवायतनादिषु । प्रतिश्रयः प्रवासिना
माश्रयः । निवेशार्थं गार्हस्थ्यार्थं यत्कन्यादि दीयते तन्नैवेशिकं । स्वर्णं सुवर्णं । धुर्यो भारसहो बलीवर्दः । शेषं प्रसिद्धं । एतान्भूदी
पादीन्दत्वा स्वर्गलोके पूज्यते । स्वर्गफलं च भूमिदानादीनां नफलांतरव्युदासार्थं । यत्किंचित्कुरुते पापं ज्ञानतोऽज्ञानतोऽपि वा । अ
पि गोचर्ममात्रेण भूमिदानेन शुध्यति । तथा । वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः । तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरु
त्तमं । वासोदश्चंद्रसालोक्यमश्विसालोक्यमश्वदः । इत्यादिफलांतरश्रवणात् । गोचर्मलक्षणं बृहस्पतिना दर्शितं । सप्तह
स्तेन दंडेन त्रिदंडान्निवर्तनं । दश तान्येव गोचर्मदानात्स्वर्गे महीयत इति । गृहधान्याभयोपानच्छत्रमाल्यानुलेपनं । यानं वृक्षं
प्रियं शय्यां दत्वात्यंतं सुखी भवेत् । गृहधान्यानि यवशालिगोधूमादीनि । अभयं भीतेत्राणं उपानहौ छत्रं माल्यं मल्लिकादि
। अनुलेपनं कुंकुमचंदनादि । वृक्षमुपजीव्यमाम्रादिकं । शय्यां च दत्वात्यंतमतिशयेन सुखी भवति पच हिरण्यदानादिनाव
द्धसे दातुमशक्यत्वाद्धर्मस्य दानासंभवः । भूमिदानादावपि समानत्वात् । स्मृत्यंतरेपि दानधर्मणात् । देवतानां गुरूणां च मातापित्रो

राम
४५

86

यथैव च। गुणवते देयं प्रयत्नेन नागुणवते चोदितं क्वचिदिति। अगुणवद्दानेन तद्देव वर्द्धते। प्रतिग्रहीतुरपि लोभादिना प्रच्छन्नस्य यः पापमदलं ज्ञात्वा प्रतिगृह्णाति दुर्मतिः। गर्हिताचरणाद्ब्रह्मसप्तपापं तावत्समाश्रयेत्। समं द्विगुणसाहस्रमानंत्यं च प्रदातरातिसमरणात्। इह च सर्वत्र देशकालपात्रविशेषाद्देयविशेषाद्दातृविशेषात्प्रतिगृहीतृविशेषाच्च फलतारतम्यं द्रष्टव्यं। सर्वधर्ममयं ब्रह्म प्रदानेभ्योऽधिकं यतः। तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतं। यस्मात्सर्वधर्ममयं ब्रह्मस्वबोधकत्वेन तस्मात्प्रदानं सर्वदानेधिकं। अतस्तद्ददद्ध्यापनादिद्वारेण ब्रह्मलोकमवाप्नोति। अविच्युतं विच्युतिर्यथा न भवति। आभूतसंप्लवं ब्रह्मलोकेऽवतिष्ठत इत्यर्थः। अत्र च ब्रह्मदाने परस्वत्वापादनमात्रं दानं स्वत्वनिवृत्तेः कर्तुमशक्यत्वात्। दानफलमुक्त्वेदानीं दानव्यतिरेकेणापि दानफलावाप्तिहेतुमाह। प्रतिग्रहसमर्थोपि नादत्ते यः प्रतिग्रहं। ये लोका दानशीलानां स तानाप्नोति पुष्कलान्। यः पात्रभूतोपि ब्राह्मणः प्रतिग्रहं सुवर्णादिकं नादत्ते न स्वीकरोत्यसौ यत्नाश्रेनोपदत्ते तद्दानशीलानां ये लोकास्तान्समग्रानाप्नोति। इदानीं सर्वप्रतिग्रहनिवृत्तिप्रसंगे अपवादमाह। कुशाः शाकं पयो मत्स्या गंधाः पुष्पं दधि क्षितिः। मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च। धानाः भृष्टास्तंदुलाः क्षितिर्मृत्तिका। शेषं प्रसिद्धं। एतत्कुशादिकं अयाचितमुपनीतं न प्रत्याख्येयं॥ चकाराद्गृहादीति। शय्याद्य

मि॰आ॰
४६

हान्कुशानांधानपः पुष्पं मणीन्दधि। मत्स्यान्धानाः पयो मांसं शाकं चैव न निर्णुदेत्। तथा। एधोदकं मूलफलमन्नमभ्युद्दितं तथा।
सर्वतः प्रतिगृह्णीयात्मध्वथाभयदक्षिणामिति मनुस्मरणात्। किमिति न प्रत्याख्येयमित्याह। अयाचिताहृतं ग्राह्यमपि दुष्कृ
तकर्मणः। अन्यत्र कुलटाषंढपतितेभ्यस्तथा द्विषः। यस्मादयाचितमेतच्छाकाद्याहृतं दुःकृतकारिणोपि संबंधि ग्राह्यं किंतु
त्वयथोक्तकारिणः। तस्मान्न प्रत्याख्येयं। अन्यत्र कुलटाषंढपतितेभ्यः शत्रोश्च। कुलं कुलं समटतीति कुलटा स्वैरिणी पारदारिका। षं
ढस्तृतीयप्रकृतिः प्रतिग्रहनिवृत्तेरपवादान्तरमाह। देवातिथ्यर्चनकृते गुरुभृत्यार्थमेव च। सर्वतः प्रतिगृह्णीयात्।। गुरोर्माता
पित्रादयः। भृत्या भरणीया भार्यापुत्रादयः इति दानप्रकरणं॥ इदानीं श्राद्धप्रकरणमारभ्यते। श्राद्धं नामादनीयस्य तत्स्थानीयस्य
वा द्रव्यस्य प्रेतोद्देशेन त्यागः। तच्च द्विविधं पार्वणमेकोद्दिष्टं चेति। तत्र त्रिपुरुषोद्देशेन यत्क्रियते तत्पार्वणं। एकपुरुषोद्देशेन क्रिय
माणमेकोद्दिष्टं। पुनश्च त्रिविधं। नित्यं नैमित्तिकं। यथा पुत्रजन्मादिषु। फलकामनोपाधौ विहितं काम्यं। यथा स्वर्गादिकामिनां
कृत्तिकादिषु नक्षत्रेषु। पुनश्च पंचविधं। अहरहः श्राद्धं पार्वणं। वृद्धिश्राद्धमेकोद्दिष्टं सपिंडीकरणं चेति। तत्राहरहः श्राद्धमन्नं पितृ
मनुष्येभ्य इत्यादिनोक्तं। अधुना पार्वणं वृद्धिश्राद्धं च दर्शयिष्यंस्तयोः कालानाह। अमावास्याष्टका वृद्धिः कृष्णपक्षोयनद्वयम्। द्रव्यं

काम्यं च २

रा
४६



ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः।व्यतीपातोगजछायाग्रहणंचंद्रसूर्ययोः।श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्रकीर्तिताः।यत्रदिने
चंद्रमानदृश्यतेसामावास्या।तस्यामहर्द्वयव्यापित्यामपराह्णव्यापिनीग्राह्या।अपराह्णःपितॄणामितिवचनात्।अपराह्णश्चपंचधावि
भक्तेदिनेचतुर्थोभागस्त्रिमुहूर्त्तः।अष्टकाश्चतस्रः।हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकास्ताश्चलायनोक्ताः।।वृद्धिः
पुत्रजन्मादिः।कृष्णपक्षोऽपरपक्षः।अयनद्वयं।दक्षिणोत्तरसंज्ञकं।द्रव्यंकृष्णसारमांसादिकं।ब्राह्मणसंपत्तिर्वक्ष्यमाणा।विषुवद्द्वयं
मेषतुलयोः।सूर्यसंगमं।सूर्यसंक्रमः।आदित्यस्यराशेराश्यंतरगमनं।अयनविषुवतोःसंक्रांतित्वेनसिद्धेपिपृथगुपादानंफलातिशा
यप्रतिपादनार्थं।व्यतीपातोयोगविशेषः।गजछाया।यदेंदुःपितृदेवत्येहंसश्चैवकरेस्थितः।याम्यातिथिर्भवेत्साहिगजछायाप्र
कीर्तितेतिपरिभाषिता।हस्तिच्छायेतिकेचित्।सेहनगृह्यते।कालप्रकरणात्।ग्रहणंचंद्रसूर्योपरागः।यदावकर्तुःश्राद्धंप्रतिरुचि
र्भवतीतदापि।चकारायुगादिसमुच्चयः।एतेश्राद्धकालाः।यद्यपिचंद्रसूर्यग्रहेनाद्यादितिग्रहणेभोजनेदोषस्तथापिनोकर्तुर्दोषोद
तुरभ्युदयः।ग्रहरहः श्राद्धव्यतिरिक्तवक्ष्यमाणाश्चचतुर्विधश्राद्धेषुब्राह्मणलक्षणमाह।अग्र्यःसर्वेषुवेदेषुश्रोत्रियोब्रह्मविद्युवा।
विद्यार्थविज्ज्येष्ठसामात्रिमधुस्त्रिसुपर्णकिः।सर्वेषुब्राह्मणलक्षणमाह।अग्र्यःसर्वेषुवेदेषुश्रोत्रियोब्रह्मविद्युवा।वेदार्थविज्ज्येष्ठसामा

89

मि॰ आ॰
५७

त्रिमधुस्त्रिसुपर्णकः ।सर्वेषु वेदेषु अग्र्यैरादिष्वनन्यमनस्कतयाप्यस्खलिताध्ययनवाक्क्रमोऽग्र्यः ।श्रोत्रियः कृताध्ययनसंपन्नः ।ब्रह्म
माणं ब्रह्म यो वेत्त्यसौ ब्रह्मवित् ।युवा मध्यमवयस्कः सर्वस्येदं विशेषणं । मंत्रब्राह्मणयोरर्थं वेत्तीति वेदार्थवित् । ज्येष्ठसाम सामविशेषस्तद
ध्ययनांगं व्रतं च तद्व्रताचरणेन यस्तदधीते स ज्येष्ठसामा । त्रिमधुर्ऋग्वेदैकदेशस्तद्व्रतं च तद्व्रताचरणेन तदध्यायी त्रिमधुः । त्रिसुपर्णः ऋग्यजु
र्षोरेकदेशस्तद्व्रतं च तदाचरणेन तदध्यायी स त्रिसुपर्णकः । एते ब्राह्मणाः श्राद्धसंपद इति वक्ष्यमाणक्रियासंबंधः । स्वस्रीयऋत्विग्जामा
ता याज्यश्वशुरमातुलाः । त्रिणाचिकेतो दौहित्रशिष्यसंबंधिबांधवाः । स्वस्रीयो भागिनेयः । ऋत्विगुक्तलक्षणः । जामाता दुहितुर्भर्ता ॥
त्रिणाचिकेतो दौहित्रशिष्यसंबंधि यजुर्वेदैकदेशस्तद्व्रतं च तद्व्रताचरणेन तदध्यायी त्रिणाचिकेतः । अन्यत्प्रसिद्धं । एते पूर्वोक्ताश्च श्रो
त्रियाद्यभावे वेदितव्याः । एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः । अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरगर्हित इत्यतिथाय मनुना
स्वस्रीयादीनामभिहितत्वात् । कर्मनिष्ठास्तपोनिष्ठाः पंचाग्निव्रतचारिणः । पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसंपदः । कर्मनिष्ठा
विहितानुष्ठानपराः । तपोनिष्ठास्तपःशीलाः । सभ्यावसथ्यौ त्रेताग्नयश्च यस्य संति स पंचाग्निः । पंचाग्निविद्याध्यायी च । ब्रह्मचा
री उपकुर्वाणको नैष्ठिकश्च । पितृमातृपराः तत्पूजापराः । चकाराज्ज्ञाननिष्ठादयः । ब्राह्मणा न क्षत्रियादयः । श्राद्धसंपदः श्रा

राम
५७

९०

द्वेषद्वृष्यफलसंपत्तिहेतवः । वर्ज्यानाह । रोगीहीनातिरिक्तांगःकाणःपौनर्भवस्तथा । अवकीर्णी कुंडगोलौकुनखीश्याव
दंतकः । रोगी महारोगोपसृष्टः । हीनमतिरिक्तं वांगं कस्याः । काणः पौनर्भवस्तथा गंधास्यामोहीनातिरिक्तांगः । एकेनाक्ष्णायोनपश्यति
असौकाणः । एतस्मादेवायवधिरखंडप्रजननखंजातिदुश्चर्मप्रभृतयोनिरस्ताः । पुनर्भूस्त्रीकलत्रलक्षणातस्यांजातः पौनर्भवः । अ
वकीर्णी ब्रह्मचारीव स्खलितब्रह्मचर्यः । कुंडगोलकौ परदारेषुजायेतेद्वौसुतौकुंडगोलकौ परदारेषुजायेतेद्वौसुतौ कुंडगोल
कौ । पत्यौजीवतिकुंडस्तु मृतेभर्तरि गोलकइत्येवंलक्षणकौ । कुनखी संकुचितनखः । श्यावदन्तः श्वेतावच्छिन्नदशनः । एतेश्रा
द्धे निंदिता इतिवक्ष्यमाणेन संबंधः । भृतकाध्यापकः क्लीवः कन्यादूष्यभिशस्तकः । मित्रध्रुक्पिशुनः सोमविक्रयी परिविंद
कः । वेतनग्रहणेन योध्यापयति सभृतकाध्यापकः । वेतनदानेन योधीते सोपि । क्लीवो नपुंसकः । असद्भिः सद्भिर्वादोषैः कन्या
दूषयिता कन्यादूषी । सताऽसतावाब्रह्महत्यादिनाभियुक्तोऽभिशस्तः । मित्रध्रुक् मित्रद्रोही । परदोषसंकीर्तनशीलः पिशु
नः । सोमविक्रयी यस्सोमस्य विक्रेता । परिविंदकः । परिवेत्ताऽज्येष्ठेऽकृतदारे । कृताग्निपरिग्रहे वा यः कनीयान्दारपरिग्रहमग्नि
परिग्रहंवाकुर्यात्सपरिवेत्ता । ज्येष्ठस्तु परिवित्तिः ॥ यथाहमनुः ॥ दाराग्निहोत्रसंयोगं यः करोत्यग्रजेस्थिते । परिवेत्तासविज्ञेयः

मि·आ·
५८

परिवित्तिस्तु पूर्वजः इति। एवं तयोर्दातृयाजकानामपि। परिवित्तिः परिवेत्ता यया च परिविद्यते। सर्वे ते नरकं यान्ति दातृयाजकपंचमाः इति वचनात्। मातापितृगुरुत्यागी कुंडाशी ष्टपरिवेत्तापपात्रवृषलात्मजः। परपूर्वापतिः स्तेनः कर्मदुष्टाश्च निंदिताः। विना कारणेन मातापितृगुरूंस्त्यजति यः स मातापितृगुरुत्यागी। एवं भार्यासुतत्यागी। वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीदिति समाननिर्देशात्। कुंडस्यान्नमश्नातीति कुंडाशी एवं गोलकस्यापि। पक्षयोरन्नमश्नाति स कुंडाशी प्रकीर्तित इति वचनात्। वृषलो निर्धर्मस्तस्य सुतो वृषलात्मजः। परपूर्वं पुनर्भूस्तस्याः पतिः परपूर्वापतिः। अदत्तादायी स्तेनः कर्मदुष्टाः शास्त्रविरुद्धकारिणः। चकारात्कितवदेवलकप्रभृतयः एते श्राद्धे निंदिताः प्रतिषिद्धाः। अग्र्याः सर्वेषु वेदेषु इत्यादिना श्राद्धोपयोगिब्राह्मणप्रतिपादनेनैव तद्व्यतिरिक्तानामयोग्यत्वे सिद्धे। पुनः केषांचित्स्तेनादीनां प्रतिषेधवचनं। उक्तलक्षणब्राह्मणासंभवे प्रतिषेधवर्जितानां प्राप्त्यर्थं एवं श्राद्धकालान्ब्राह्मणांश्चोक्त्वाधुना पार्वणप्रयोगमाह। निमंत्रयेत पूर्वेद्युर्ब्राह्मणानात्मवाञ्छुचिः। तैश्चापि संयतैर्भाव्यं मनोवाक्कायकर्मभिः। पूर्वोक्तान्ब्राह्मणान् श्राद्धे क्षणः क्रियतामिति पूर्वेद्युर्निमंत्रयेत्। प्रार्थनया ज्ञानमभ्युपगमयेदपरेद्युर्वा। पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते। निमंत्रयेत त्र्यवरान्सम्यग्विप्रान्यथोदितानीति मनु

राम
५८

स्मरणात्। आत्मवांश्चेत्तशो कौन्मादादिरहितश्चेत्। यद्वा आत्मवाइति यतेंद्रियोभवेत्। शुचिः स्नातस्तेरपि निमंत्रितैर्ब्राह्मणो मनोवाक्का
यव्यापारैः संयतैर्भवितव्यं। अपराह्णे समभ्यर्च्य स्वागतेनागतांस्तु तान्। पवित्रपाणिराचांतानासनेषूपवेशयेत्। अपराह्णे उक्तलक्षणो
तान्विप्रान्निमंत्रितानाहूय स्वागतवचनेन पूजयित्वा कृतपादधावनानाचांतानुक्तेष्वासनेषु पवित्रपाणिः पवित्रपाणिरुपवेशये
त्। यद्यपि सामान्येनापराह्णस्तूक्तं। तथापि कुतपे प्रारभ्य तदादि [illegible] पंचमुहूर्तेषु परिसमापनं श्रेयस्करं। अह्नो मुहूर्ता विख्याता
दशपंच च सर्वदा। तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः। मध्याह्ने सर्वदा यस्मान्मंदीभवति भास्करः। तस्मादनंतफलदस्तत्रारंभो
विशिष्यते। ऊर्ध्वं मुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयं। मुहूर्तपंचकं ह्येतत्स्वधाभवनमिष्यत इति वचनात्। तथान्यदपि श्राद्धोपयोगि
कुतपसप्तकमुक्तं। मध्याह्नः खड्गपात्रं च तथा नेपालकंबलं। रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः। पापं कुत्सितमित्याहुस्त
स्य संतापकारिणः। अष्टावेते यतस्तस्मात्कुतपा इति विश्रुता इति। युग्मान्दैवे यथाशक्ति पित्र्येऽयुग्मांस्तथैव च। परिश्रिते शुचौ देशे दक्षि
णाप्रवणे तथा। देवश्राद्धे दैके श्राद्धे युग्मानयुग्मान्ब्राह्मणानुपवेशयेत्कथं यथाशक्ति शक्तिमनतिक्रम्य यथाशक्ति। तत्र वैश्वदेवे द्वौ।
मात्रादीनां तिसृणामेकैकस्याः द्वौ द्वौ तिसृणां वा द्वौ। एवं पित्रादीनामेकैकस्य द्वौ द्वौ त्रयाणां वा द्वौ द्वौ। एवं मातामहादीनां च। गोभिलेऽपि

गे२

श्र२

मि॰श्रा॰
५९

वैश्वदेवं पृथक्कृतं वा। पित्र्ये पार्वणश्राद्धेऽयुग्मान्विषमान्वा उपवेशयेत्। इति संबध्यते। एतच्च परिश्रिते सर्वतः प्रच्छादिते। शुचौ गोमयादि
नोलिप्ते दक्षिणाप्रवणे दक्षिणावनते देशे कार्यं। द्वौ दैवे प्राक्त्रयः पित्र्ये उदगेकैकमेव वा। मातामहानामप्येवं तन्त्रं वा वैश्वदेविकं। अयुग्मानि
त्र इति पार्वणश्राद्धाङ्गभूते वैश्वदेवेऽप्ययुग्मप्रसंग इदमारभ्यते द्वौ दैव इति। वैश्वदेवे द्वौ ब्राह्मणौ प्राङ्मुखावुपवेश्यौ। पित्र्ये त्वयुग्मानि
ति। अविशेषप्रसंगो विशेष उच्यते। त्रयः पित्र्य इति। पित्र्ये पित्रादिस्थाने त्रय उदङ्मुखा उपवेश्याः। पक्षान्तरमाह। एकैकमेव वा। विश्वदे
वे पित्र्ये चैकैकमुपवेशयेत्। मन्त्रवतो विकल्पः। मातामहानामप्येवं श्राद्धे निमन्त्रणं द्वौ दैवे प्राक्त्रयः पित्र्य उदगेकैकमेव वेत्येवमन्तं
पितृश्राद्धवत्कर्तव्यं। पितृश्राद्धे मातामहश्राद्धे च वैश्वदेविकं पृथक्कृतं तन्त्रेण वा कर्तव्यं। तन्त्रशब्दः समुदायवाचक इति। यदा तु द्वावे
कं ब्राह्मणौ तदा वैश्वदेवे पात्रं प्रकल्प्योभयत्रैकैकं ब्राह्मणं निभुंज्यात्   यथाह वसिष्ठः   यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत्। अन्नं
पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च। देवतायतने कृत्वा ततः श्राद्धं प्रवर्तयेत्। प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिण इति। पाणिप्रक्षालनं
दत्वा विष्टरार्थं कुशानपि। आवाहयेदनुज्ञातो विश्वे देवास इत्यृचा। तदनन्तरं वैश्वदेवार्थब्राह्मणहस्ते जलं विष्टरार्थं कुशांश्च युग्मान्द्वि
गुणितान् आसने दक्षिणतो दत्वा विश्वान्देवानावाहयिष्य इति ब्राह्मणान्पृष्ट्वा तैरावाहयेत्यनुज्ञातो विश्वेदेवास आगतेत्यनया। आगच्छंतु महा
भा

राम
५९

मिं

९५

तागाविश्वेदेवामहावलाः।येयत्रविहिताःश्राद्धेसावधानाभवंतुतइतिस्मार्त्तेनमंत्रेणतानावाहयेत्।एतच्चयज्ञोपवीतिनासव्येनप्रदक्षिणं
चकार्यं।अपसव्यंततःकृत्वापितॄणामप्रदक्षिणमितिपित्र्येविशेषस्मरणात्।भूपवैरवकीर्यथताजननेसपवित्रके।शन्नोदेव्यायपयःक्षिप्त्वायवो
सीतियवांस्तथा।यादिव्याइतिमंत्रेणहस्तेषुयवान्विनिःक्षिपेत्।ततोवैश्वदेवार्थब्राह्मणसमीपभूमिंप्रादक्षिण्येनयवैरास्तीर्यानंतरंतैजसादिभा
जनेसपवित्रकेकुशयुग्मांतर्हितेशन्नोदेवीरित्यृचापस्त्वनेनायःक्षिप्त्वायवोसिधान्यराजोवेत्यादिनामंत्रेणयवांस्ततोगंधपुष्पाणिचक्षिप्त्वा
नंतरमर्घ्यपात्रपवित्रांतर्हितब्राह्मणहस्तेषुयादिव्याआपइत्यादिमंत्रेणविश्वेदेवार[illegible]वोअर्घ्यमित्यर्घोदकंविनिःक्षिपेत्।दत्त्वोदकंगंधमा
ल्यंधूपदानंसदीपकं।अथकरशौचार्थमुदकंदत्वायथाक्रमंगंधपुष्पधूपदीपदानंकुर्यात्तथाच्छादनदानंच।गंधादीनांचस्मृत्यंतरोद्रष्टव्यः।
।चंदनकुंकुमकर्पूरागरुपद्मकान्यनुलेपनार्थमितिविष्णूक्तं।पुष्पाणिच।श्राद्धेजात्यःप्रशस्ताःस्युर्मल्लिकाःश्वेतयूथिकाः।।जलोद्भवानिस
र्वाणिकुसुमानिचचंपकमित्याद्युक्तानि।वर्ज्यानिचोग्रगंधान्यगंधीनिचैत्यवृक्षोद्भवानिच।पुष्पाणिवर्जनीयानिरक्तवर्णानियानिचान
कंटकिजंकंटकिनमपिशुक्लंसुगंधियत्तद्देयाद्रक्तमपिकुंकुमंजलजंदद्यादित्यादीनिद्रष्टव्यानि।धूपेचविशेषोविष्णुनोक्तः।प्राणपंगंध
सर्वंधूपार्थेनदद्यात्।घृतमधुसंयुक्तंगुग्गुलंश्रीखंडागरुदेवदारुस[illegible]ादिदद्यादिति।दीपेचविशेषःशंखेनोक्तः।घृतेनदीपोदातव्यस्ति

मु२

मि॰ श्रा॰ ५०

लतैलेनवाप्तुनः। वसामेदोद्भवं दीपं वर्जयेत्नेन विवर्जयेदिति। आच्छादनं च शुक्लेन नवमहतं सदशं दद्यादिति। एतत्सर्वं वैश्वदेवानुष्ठा
नकांडसदस्यः कुर्यात्। पित्र्यं कांडं दक्षिणात्तिर्यक्। यथाह वृद्धशातातपः। उदङ्मुखस्सव्ये देवानां पितॄणां दक्षिणामुखः। प्रदद्या
त्पार्वणो सर्वं दैव पूर्वं विधानत इति। अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणं। द्विगुणांस्तु कुशान्दत्वा उशंतस्त्वेत्यृचा पितॄन्। आवा
ह्यस्व दनुज्ञातो जपेदायंतु नस्ततः। ततो वैश्वदेवकांडादनंतरमपसव्यं यज्ञोपवीतं प्राचीनावीतं कृत्वा। ततत इति वरता कांडा
नुशयोर्दर्शितं॥ पित्रादीनां त्रयाणामासनार्थं युग्मान्कुशान् द्विगुणभुग्नान् अप्रदक्षिणं वामतो विष्टरार्थमासनेषूदकपूर्वं दत्वा पुनरुद
कं दद्यात्। अपः प्रदाय द्विगुणभुग्नान्कुशान्दत्वा अपः प्रदापयेदित्याश्वलायनस्मरणात्। एतच्चाद्यंतयोरुदकदानं वैश्वदेवे पि
त्रे च भवतियदार्थं दृष्टव्यं। अथ पितॄन्पितामहान्प्रपितामहांश्च आवाहयिष्य इति ब्राह्मणान्पृष्ट्वा आवाहयेति तैरनुज्ञातः। उशं
तस्त्वा निधीमहीत्यनया वा पित्रादीनावाह्य आयंतु नः पितर इत्यादिमंत्रेणोपतिष्ठेत। यवार्थाः कृतिलैः कार्याः कुर्यादर्घ्यादि पूर्व
वत्। दत्वार्घं संस्रवांस्तेषां पात्रे कृत्वा विधानतः। पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः। यवार्थाः यवसाध्यानि कर्माणि
अवकिरणादीनि तिलैः कर्तव्यानि ततोर्घपात्रासादनाद्याच्छादनांतं पूर्ववत्। तत्रायं विशेषः। यवार्थाः यवसाध्यानि कर्माणि तिला

रा॰
५०

96

नपहतां असुरा रक्षांसि इत्यादिना मंत्रेण ब्राह्मणान्परितो दक्षिणामवकीर्य रजतादिपात्रेषु त्रिषु स्वग्रकुशनिर्मितकूर्चान्तर्हितेषु
शन्नोदेवीति मंत्रेणापः क्षिप्त्वा तिलोऽसि सोमदैवत्य इत्यादिना तिलान् गंधपुष्पाणि च क्षिप्त्वा स्वधार्घ्या इति ब्राह्मणानां हस्तेष्वर्घ्यं दद्यात्।
एकैकस्य तु पात्रं वेत्यस्मिन्पक्षे पात्रत्रयं कार्यमेवमर्घ्यं दत्वा तेषामर्घ्याणां संस्रवान्ब्राह्मणहस्ताद्गलितांश्चोदकानि पितृपात्रे
गृहीत्वा दक्षिणाग्रं कुशस्तंबं भूमौ निधाय तस्योपरि पितृभ्यः स्थानमसीत्यनेन मंत्रेण तत्पात्रं न्युब्जमधोमुखं कुर्यात्। तस्योप
र्यर्घ्यपात्रपवित्राणि निधायानंतरं गंधपुष्पधूपदीपाच्छादनानि पितरयं ते गंधः। पितरिदं ते पुष्पमित्यादिप्रयोगैर्दद्यात्। अग्नौकरि
ष्यन्नादाय [illegible] पृच्छत्यमंत्रं घृताक्तं। कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत् हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः। यथा
लाभोपपन्नेषु रौप्येषु तु विशेषतः। अनंतरमग्नौकरिष्य इत्युक्ते घृताक्तमन्नमादाय ब्राह्मणान्पृच्छेदग्नौकरणं करिष्य इति। हुतय
ह्णांसूपकाद्यादिनिष्टत्पर्थं। ततस्तैः कुरुष्वेत्यनुज्ञातः प्राचीनावीती अग्निमुपसमाधाय मेक्षणेनावदायावदानसंपदा जुहुयात्।
सोमाय पितृमते स्वधा नमः। अग्नये कव्यवाहनाय स्वधा नम इति पिंडपितृयज्ञकल्पेनाग्नौ हुत्वा मेक्षणमनुप्रहृत्य हुतशेषं मृण्मयवर्ज्जं
यथालाभोपपन्नेषु रौप्येषु पित्र्यादिभाजनेषु दद्यान्न वैश्वदेवभाजनेषु समाहितोऽनन्यमनस्कः। अत्र यद्यप्यग्नावित्यविशेषेणोक्तं त

का॰ १

मि॰ श्रा॰
५२

थापिआहिताग्नेः सर्वाधानपक्षेऽग्न्यपासनाग्नेरभावात्पिंडपितृयज्ञानंतरभाविनिपार्वणश्राद्धेऽग्नौकरणेहोमोविहितस्तद्दक्षिणाग्नेस
न्निधानाद्दक्षिणाग्नौ।कर्म्मस्मार्त्तंविवाहाग्नाविति।अस्यापवाददर्शनात्॥यथाहमार्कंडेयः।आहितानिस्तुजुहुयाद्दक्षिणाग्नौसमा
हितः।अनाहिताग्निस्त्वौपसनेग्न्यभावेद्विजेऽप्सुवेति।अर्द्धाधानपक्षेऽपासनाग्निसद्भावात्।आहिताग्नेरनाहिताग्नेश्चौपासनाग्नावेवा
करणहोमः।एवमन्वष्टकादिष्वपिपिंडपितृयज्ञकल्पातिदेशात्।काम्यादिषुचतुर्ब्राह्मणपाणावेवहोमः॥यथाहरत्ना
कारः।आन्वष्टक्यंचपूर्वेद्युर्मासिमास्यथपार्वणं।काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टंतथाष्टमं।चतुर्थाद्येषुसाग्नीनांवह्नौहोमोविधी
यते।पित्र्यब्राह्मणहस्तेस्यादुत्तरेषुचतुर्ष्वपीति।अस्यार्थः।हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाइत्यष्टौविहिताः।अन्व
नवम्यांयत्क्रियतेतदन्वष्टक्यंच।सप्तम्यांयत्क्रियमाणंपूर्वेद्युर्मासिमासिकृष्णपक्षेपंचमीप्रभृतिषुयस्यांकस्यांचित्तिथौआन्वष्टक्या
तिदेशेनयद्विहितममावास्यायांपिंडयज्ञानंतरंतत्पार्वणम्।स्वर्गादिकामानांकृत्तिकादिष्वनक्षत्रेषुयद्विहितंतत्काम्यमभ्युद
येषुपुत्रोत्पत्त्यादिषुतडागारामदेवताप्रतिष्ठादिषुयद्विहितं।अष्टम्यांचाष्टकाविहिता।एकोद्दिष्टं।अनेकोद्दिष्टश्राद्धेनसपिंडीक
रणंलक्षयति।नत्वेकोद्दिष्टस्यापिसद्भावात्।साक्षादेकोद्दिष्टेतरत्वाभावात्।अग्नौकरणस्याभावादित्यर्थः।अथवाएकोद्दिष्टकारमते

मा॰ ३ न्नो

राम
५२

साग्निरेकोद्दिष्टे पाणिहोमस्य सद्भावात् साग्निरेकोद्दिष्टमेव। एतेषामष्टकानामाद्येषु चतुर्षु साग्निकस्याग्नौ होमः। उत्तरेषु चतु
र्षु पित्र्यब्राह्मणहस्त एव। निरग्निकस्यापि प्रमीतपितृकस्य पार्वणे नित्यमिति तस्यापि पाणावेव होमः। न निर्वपति यः श्राद्धं प्रमी
तपितृको द्विजः। इंदुक्षये मासि मासि प्रायश्चित्तीयते तु सः इति वचनात्। एवं काम्याभ्युदयिकैकोद्दिष्टेष्वपि पाणावेव होमः।
अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेदिति॥ मनुस्मरणात्॥ पाणिदत्तस्य पृथग्ग्रासभक्षणनिषेधः बृहस्पतेः॥ यथाङ्गिरस्यका
रः। अन्नं पाणितले दत्तं पूर्वमश्नन्त्यबुद्धयः। पितरस्तेन तृप्यन्ति शेषान्नं न लभन्ति ते इति। यच्च पाणितले दत्तं यच्चान्यदुपकल्पितं।
एकीभावेन भोक्तव्यं पृथग्भावो न विद्यते इति। इदं वामं पृथिवी पात्रमिति पात्रेऽभिमंत्रणं। कृत्वेदं विष्णुरित्यन्ने द्विजाङ्गुष्ठं निवे
शयेत्। अन्नमोदनसूपपायसघृतादिकं तावन्नेव दत्त्वा पृथिवी ते पात्रमित्यादिना मंत्रेण पात्राभिमंत्रणं कृत्वा इदं विष्णुर्विचक्र
म इत्यनयर्चान्ने द्विजाङ्गुष्ठं निवेशयेत्। तत्र वैश्वदेवे यज्ञोपवीती विष्णो हव्यं रक्षस्वेति। पित्र्ये प्राचीनावीती विष्णो कव्यं रक्ष
हव्यंच
स्वेति विष्णो कव्यं रक्षस्वेति विष्णो हव्यं च कव्यं च पित्र्ये प्राचीनावी च ब्रूयादन्ते इति वैकल्पादिति मनुस्मरणात्। सव्याहृतिकां गायत्रीं मधु
वाता इति त्र्यृचं। जप्त्वा यथासुखं वाग्यं भुंजीरंस्तेपि वाग्यताः। अनन्तरं विश्वेदेवेभ्य इदमन्नं परिवेक्ष्यमाणं चान्नमसे रिति यवोदके

मि॰श्रा॰
५२

नानिवेद्य। तथा पित्रे ऽमुकगोत्रायामुकशर्मणे इदमन्नं परिविष्टं परिवेक्ष्यमाणं चातृप्तेरिति यवोदकेन निवेद्य तिलोदकप्रदाने
न पित्रे निवेद्यैवं पितामहाय प्रपितामहाय च निवेद्यानंतरमपोशानं दत्त्वा पूर्वोक्तातिर्व्याहृतिभिः सहितां गायत्रीं मधुवाता इत्यृ
चं मधु मधु मध्विति त्रिवारं जयित्वा यथासुखं जुषध्वमिति ब्रूयात्। प्रकल्प्य पितृदेवेभ्यः सावित्रीं मधुमज्जपः। श्राद्धं निवेद्यापोशा
नं त्वमेवैषोथ भोजनं तथा गायत्रीं त्रिः सकृद्वा पि जपेद्वा इति सूर्विका। मधुवाता ऋतायत इति त्र्यं मध्वित्येकं तथेति पारस्करादिवचना
त्। भुंजीरंस्ते पि वाग्यताः। ते पि ब्राह्मणा वाग्यता मौनिनो भुंजीरन्। अन्नमिष्टं हविष्यं च दद्यादक्रोधनोत्वरः। आतृप्तेस्तु पवित्रा
णि जप्त्वा पूर्ववज्जपं तथा। अन्नं तत्र भोज्यलेह्यचोष्यपेयात्मकं पंचविधमिष्टं यद्ब्राह्मणाय प्रेताय कर्त्रे वै रोचते हविष्यं श्राद्धे इह विधौ
गंध्री हि शालियवगोधूममसूरमाषमुद्गत्रकालशाकमहाशाकैलासुंठीमरीचहिंगुगुडशर्कराकर्पूरसैंधवसांभरआम्रप
नसनारिकेरकदलीबदरगव्यपयोदधिघृतपायसमधुमांसप्रभृति स्मृत्यंतरप्रसिद्धं वेदितव्यं। हविष्यमित्यनेनैवायोग्यस्त्यत्य
नरप्रति पिंडूस्यकोद्रवमसूरचणककुलित्थपुलाकनिष्पावराजमाषकूष्मांडवार्ताकिबृहतीद्वयोपोदकीवंशांकुरपिप्पली
वचाशतपुष्पोषविडलवणमाहिषचामरक्षीरदधीघृतपायसादीनां निषिद्धिः। अक्रोधनः क्रोधहेतुसंतवेपि। अत्वरो व्य

राम
५२

ग्नस्वात्प्रेद्दद्यादितिसंबंधः। तुशब्दार्थ्यथा किंचिदुच्छिष्यते तथा दद्यात्। उच्छेषणस्य दासवर्गभागधेयत्वात्। उच्छेषणं भू
मिगतमजिह्मस्याशठस्य च। दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षत इति मनुस्मरणात्। तथात्रात्रेयः पवित्राणि पुरुषसूक्तपवमा
नमधुमती निजप्यात् प्राङ्नत्वा पूर्वोक्तं च जपं च सव्याहृतिकमित्याद्युक्तं जपेत्। अन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य च। तद
न्नं विकिरेद्भूमौ दद्याच्चापः सकृत्सकृत्। तदनंतरं सर्वमन्नमादाय तृप्ताः स्थेति नान्त स्थाने प्राप्ताः स्म इति तैः प्रत्युक्तः शेषमन्नमप्यस्ति किं
क्रियतामिति पृष्ट्वा इष्टैः सहभुज्यतामिति। अत्र सुपगम्यतदनं पितृस्थानब्राह्मणस्य पुरस्तादुच्छिष्टसन्निधौ दक्षिणाग्रदर्भांतरि
तायां भूमौ तिलोदकप्रक्षेपपूर्वकं येऽग्निदग्धा इत्यनया निःक्षिप्य पुनस्तिलोदकं निःक्षिपेत्। तदनंतरं ब्राह्मणहस्ते गंडूषार्थं
५५
सकृत्सकृदपो दद्यात्। सर्वमन्नमुपादाय सतिलं दक्षिणामुखः। उच्छिष्टसन्निधौ पिंडान्दद्याद्वै पितृयज्ञवत्। पिंडपितृ
यज्ञकल्पातिदेशेन चरुश्रपणासद्भावेऽग्नौकरणशिष्टचरुशेषेण सह सर्वमन्नमुपादायाभिसन्निधौ पिंडान्दद्यात्। तद
भावे ब्राह्मणार्थे सर्वपाकिकमन्नमुपादाय तिलमिश्रं दक्षिणामुख उच्छिष्टसन्निधौ पिंडपितृयज्ञकल्पेन पिंडान्दद्यात्। माताम
हानामप्येवं दद्यादाचमनं ततः। स्वस्तिवाच्यं ततः कुर्यादक्षय्योदकमेव च। मातामहानामपि वैश्वदेवावाहनादि पिंडदानपर्य

K.K.S.U LIBRARY
RAMTEK
441 106
M. 1669
Dist. Nagpur

मि॰श्रा॰
५३

नंकर्मैवंकर्तव्यं।अनंतरंब्राह्मणानामाचमनंदद्यात्स्वस्तीतिब्रूतेतिब्राह्मणान्स्वस्तिवाचयेत्।तैःस्वस्तीत्युक्तेऽक्षय्यमस्त्वितिब्रूते
ति।ब्राह्मणहस्तेसोदकदानंकुर्यात्।तैश्चास्त्वक्षय्यमितिवक्तव्यं।दत्वाचदक्षिणांदत्वास्वधांवाचयिष्यइत्युक्तेतैर्ब्राह्मणोर्वा
च्यतामित्यनुज्ञातः।प्रकृतेभ्यःपित्रादिभ्योमातामहादिभ्यश्चस्वधोच्यतामितिस्वधाकारमुदाहरेत्।अस्तुस्वधेत्युक्तेभूमौसिं
चेत्ततोजलं।विश्वेदेवाश्चप्रीयंतां।विप्रैश्चोक्तेइदंजपेत्।तेचब्राह्मणाअस्तुस्वधेतिब्रूयुः।तैरेवमुक्तेऽनंतरंकमंडलुतउदकंभूमौ
सिंचेत्।ततोविश्वेदेवाःप्रीयंतामितिब्रूयात्।ब्राह्मणैश्चप्रीयंतांविश्वेदेवाइत्युक्तेऽदमनंतरतोवक्ष्यमाणंजपेत्।दातारोनो
ऽभिवर्द्धंतांवेदाःसंततिरेवच।श्रद्धाचनोमाव्यगमद्बहुदेयंचनोऽस्त्विति।दातारोनोऽस्माकंहिरण्यादिर्वर्द्धंतांबहवोभवंतु।वेदा
ऽभिवर्द्धंतामध्ययनाध्यापनतदर्थज्ञानानुष्ठानद्वारेण।संततिश्चपुत्रादिपरंपरया।श्रद्धाचापिअकर्मणिआस्थानोऽस्माकं
माव्यगमत्मापगच्छतु।देयंहिरण्यव्रीहिशाल्यादिबहुपर्यन्तमस्माकंभवत्वितिजपेदित्यन्वयः।इत्युक्त्वोमेप्रियावाचःप्र
णिपत्यविसर्जयेत्।वाजेवाजइतिश्रीनःपित्र्यपूर्वंविसर्जनं।एवंसर्वेक्षिंप्रार्थनामंत्रंजप्त्वोक्त्वाचप्रियावाचःप्रीतिकराणिवाक्या
निधन्यावयंतवचरणकमलरजःपवित्रीकृतमस्मन्मंदिरंशाकाद्यशनक्लेशमतिगणय्यभवद्भिरनुगृहीतावयमित्येवं
क्त्वा

राम
५३

102

रूपाः प्रणिपत्य प्रदक्षिणापूर्वकं नमस्कृत्य विसर्जयेत्। कथं विसर्जयेदित्याह। वाजे वाजे वत वाजिनो न इत्यनया ऋचा पितृपू
र्वपितामहादिविश्वेदेवांतं दर्भाग्रं भगोनोन्निष्ठत पितर इति प्रीतः स्वसीप्रीतां तर्पनाविसर्जनं कुर्यात्। यस्मिंस्ते संस्रवाः सर्व
सर्वपात्रे निवेशिताः। पितृपात्रं तदुत्तानं कृत्वा विप्रान्विसर्जयेत्। यस्मिन्पात्रे पूर्वमर्घ्यप्रदानानंतरं ते संस्रवा ब्राह्म
णहस्ताद्गलिताश्चोदकानि निवेशितानि तत्पितृपात्रं स्तुजमुत्तानमूर्ध्वमुखं कृत्वा विप्रान्विसर्जयेत् तत्राशीर्मंत्रजपादूर्ध्वं वा
जेवाज इत्यतः प्राक् द्रष्टव्यं। कृत्वा विसर्जयेदिति क्त्वाप्रत्ययस्य श्रवणात्। प्रदक्षिणमनुव्रज्य भुंजीत पितृसेवितं ब्रह्मचा
री भवेत्तां तु रजनीं ब्राह्मणैः सह। अनंतरमासीमांतं ब्राह्मणाननुव्रज्य तैरास्यतामिति अनुज्ञातः श्राम्य दांमी कृत्य प्रतिनिवृत्य दि ६
पितृसेवितं तच्छ्राद्धशिष्टमिष्टैः सह भुंजीत। नियम एवायं न परिसंख्या। मांसे तु यथा तृप्तीति द्विजकाम्यपेत्सप्रोक्तं। यस्मिन्दिने श्रा
द्धं कृतं तत्संबंधिनी रात्रिनोक्तं ब्राह्मणैः सहकर्त्ता ब्रह्मचारी भवेत्तु शब्दात् भोजनं ते जिनादिरहितो भवेत्। पुनर्भोजनमध्वानं भाराध्य
यनमैथुनं। दानं प्रतिग्रहं होमं श्राद्धभुक्त्वाष्ट वर्जयेत्। एवं पार्वणश्राद्धमुक्त्वा इदानीं वृद्धिश्राद्धमाह। एवं प्रदक्षिणावृत्को वृ
द्धौ नांदीमुखान्पितृन्। यजेत दधिकर्कंधुमिश्रान्पिंडान्यवैः क्रियाः। वृद्धौ पुत्रजन्मादिनिमित्ते वृद्धिश्राद्धे एवमुक्तेन प्रकारेण

103

३

मि॰श्रा॰
५४

पितॄंयजेत प्रजपेत्। तत्र विशेषमाह। प्रदक्षिणावृत्क इति प्रदक्षिणा आवृत् अनुष्ठानपद्धतिर्यस्यासौ प्रदक्षिणावृत्कः प्रदक्षिणप्रचार इ
ति यावत्। नांदीमुखानिति पितॄणां विशेषणं। अतश्चावाहनादौ नांदीमुखान्पितॄनावाहयिष्ये इत्यादिप्रयोगो द्रष्टव्यः। कथं यजेते
त्याह। दधिकर्कंधुमिश्रानिति। कर्कंधुर्बदरफलं। दध्ना बदरफलैश्च मिश्रा इदं त्वा यजेनेति संबध्यते। तिलसाध्याः सर्वाः क्रिया यवैः
कर्तव्याः। अत्र च ब्राह्मणसंख्या दर्शिता। युग्मान्वेदयन्नित्यत्र प्रदक्षिणावृत्कादिपरिगणनमन्येषामपि स्मृत्यंतरोक्तानां धर्मा
णां प्रदर्शनार्थं॥ यथाहाश्वलायनः॥ अथाभ्युदयिके युग्मा ब्राह्मणाश्च मूलादत्ताः प्राङ्मुखो यज्ञोपवीती स्यात्। प्रदक्षिणमुप
चारो यवैस्तिलार्थो। गंधादिदानं द्विर्द्विः ऋजुदर्भासादने दद्यात्। यवोऽसि सोमदेवत्यो गोसवो देवनिर्मितः। प्रयत्नेवद्भिः पृक्तः पु
ष्टा नांदीमुखाः पितॄनिमाल्लोकान्प्रीणयाहिनः स्वाहेति यवावपनं। विश्वेदेवा इदं वः। नांदीमुखाः पितर इदं वोऽर्घ्यं। इति
यथालिंगमर्घ्यदानं। पाणौ होमोऽग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेति। मधुवाता ऋतायत इत्यृच स्थाने उपास्मै गाय
तेति पंचमधुमतीः श्रावयेत्। अक्षन्नमीमदेति च षष्ठीमाचांतेषूच्छिष्टाशयाद्गोमयेनोपलिप्यते प्राचीनाग्रा दर्भाः संस्तीर्य तेषु
दध्याज्यमिश्रेणाक्षतशेषेणैकैकस्य द्वौ द्वौ पिंडौ दद्यादित्यादि। यद्यपि पितॄन्यजेतेति सामान्येनोक्तं तथापि श्राद्धक्रमश्च स्मृत्यंतरा

राम
५४

दर्वागंतव्यः यथाह शातातपः मातृश्राद्धं तु पूर्वं स्यात्पितृणां तदनंतरं। ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतमिति॥ एकोद्दिष्ट
विधिमाह॥ एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकं। आवाहनाग्नौकरणरहितं त्वपसव्यवत्। एकोद्दिष्टं एकमुद्दिष्टो यस्मिंश्राद्धे
तदेकोद्दिष्टमिति कर्मनामधेयं। शेषं पूर्ववदाचरेदिति। उपसंहारात्पार्वणसकलधर्मप्राप्तौ विशेषो विधीयते। दैवहीनं वैश्वदेवरहितं
। एकार्घ्यपात्रं। एकदर्भपवित्रं। आवाहनेनाग्नौकरणहोमेन च रहितमपसव्यवत्। प्राचीनावीतित्वसमुच्चयवद्धे तेनानंतरश्लोकोक्ता स्वदपि
केयज्ञोपवीतीत्वं सूचयति। किंच। उपतिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जने। अभिरम्यतामिति वदेत्। ब्रूयुस्ते ऽभिरताः स्मह। यदुक्तं॥
स्वस्तिवाच्यं ततः कुर्यादक्षय्योदकमेव चेति। तत्राक्षय्यस्थाने उपतिष्ठतामिति वदेत्। विप्रविसर्जने कर्तव्ये वाजेवाजे इति जपानंत
रं दर्भाग्रारंभणे नाभिरम्यतामिति ब्रूयात्तेवाभिरताः स्मेति वदेयुः। हयसिद्धौ। प्रसिद्धं शेषं पूर्ववदिति यावत्। एतच्च मध्याह्ने कर्तव्यं।
यथाह देवलः॥ पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पैतृकं। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति। भुंजीत पितृसेवितमित्यस्ये
कोद्दिष्टविशेषे निषेधो दृश्यते। नवश्राद्धेषु यच्छिष्टं गृहे पर्युषितं च यत्। दंपत्योर्भुक्तशिष्टं च न भुंजीत कदाचनेति। नवश्राद्धं च दर्शितं।
प्रथमेह्नि तृतीये वा पंचमे सप्तमेपि वा। नवमे चैकादशे चैव तन्नवश्राद्धमुच्यत इति॥ सपिंडीकरणमाह॥ गंधोदकतिलैर्मिश्रं कुर्यात्पा

प्रेतार्घपात्रावशिष्टोदकेन प्रेतस्थानब्राह्मणहस्ते दत्वा शेषमेकोद्दिष्टवत्समापयेत्

ये श्रुति
वैराव

ह्रिय

चचतुष्टयं। अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्। ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत्। एतत्सपिंडीकरणमेकोद्दिष्टं स्त्रिया अपि गंधो
दकतिलैर्मिश्रं पात्रचतुष्टयमर्घसिद्ध्यर्थं पूर्वोक्तविधिना कुर्यात्। तिलैर्युक्तं पात्रचतुष्टयं वदता पितृवर्गे चत्वारो ब्राह्मणा दर्शिताः। वैश्व
देवे द्वौ तावेव। तत्र प्रेतपात्रोदकं किंचिदवशेषं त्रिधा विभज्य पितृवर्गे चत्वारो ब्राह्मणा दर्शितत्रयपात्रेष्वेव सेचयेत्। ये समाना समनस इति द्वा
भ्यां मंत्राभ्यां। शेषं विश्वेदेवावाहनादिविसर्जनान्तं पूर्ववत्पार्वणवदाचरेत्। सपिंडीकरणमनंतरोक्तं। एकोद्दिष्टं च ततः प्रागुक्तं स्त्रिया अ
पि मातुरपि कर्तव्यं। एवं वदता पार्वणे मातृश्राद्धं पृथक्कृत्वा कर्तव्यमित्युक्तं भवति। अत्र प्रेतशब्दं पितुः प्रपितामह विषयं केचिद्वर्णयंति। तस्य
विष्टंतत्ताविन सपिंडीकरणोत्तरकालपिंडदानादिनिवृत्त्युपपत्तेः समनंतरमृतस्योत्तरत्र पिंडोदकदानानुवृत्तेरंतत्तावोन्मुक्तः।। अत
एवाह यमः।। यः सपिंडीकृतं प्रेतं पृथक्पिंडे नियोजयेत्। विधिघ्नस्तेन भवति। पितृहा चोपजायत इति। प्रकर्षेणेतो गतः प्रेत इति चव्यु
र्थेपि प्रेतशब्दोपपत्तेः। प्रेते त्वपवर्(गी)सुपायादिति प्रयोगदर्शनात्।। अपि च।। सपिंडीकरणश्राद्धं देवपूर्वं नियोजयेत्। पितॄनेवाशये
न्न च पुनः प्रेतं न निर्दिशेदिति सपिंडीकरणोत्तरकालं प्रेतस्य श्राद्धादिषु निषेधो दृश्यते। स चानंतरमृतस्यैव संभवति।। आमावस्यादिश्रा
द्धादिविधानात्। सपिंडता तु पुरुषे सप्तमे विनिवर्तते इत्येतदपि वचनं चतुर्थस्य तिष्ठंतत्त्वावपवदते चतुर्थस्य पिंडत्रयव्यापित्वं पंचमस

पिंडद्वयव्यापित्वं षष्ठस्यैकपिंडव्यापित्वं सप्तमे निवृत्तिरिति पितृपात्रेष्वेतेतदपि पितृत्वमुख्यत्वादस्मिन्नेव पक्षे घटते नान्यथा। पितामहस्या
च मुख्यत्वात्। तस्मात्पितृपात्रेषु प्रेतपात्रं प्रसेचयेदिति पितुः प्रपितामहमहपात्रं पित्रादिपात्रेषु सेचयेदिति॥ तदुक्तं॥ न तत्र पिं
डसंयोजनस्तत्र चापिंडदाननिवृत्तिप्रयोजनमपि तु प्रेतत्वनिवृत्त्या पितृत्वप्राप्त्यर्थं। प्रेतत्वं च स्वस्वकर्मोपजनितातृप्तं तद्दुःखाद्युत्तरावस्था
॥ यथाह मार्कंडेयः॥ प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तिता। क्षुत्तृष्णे प्रत्यहं तत्र भवेतां द्विगुणोत्तरे इति॥ पितृत्वं प्राप्तिश्च वस्वादिश्रा
द्धदेवतासंबंधः। शाकुनैकोद्दिष्टेन सपिंडीकरणेन प्रेतत्वनिवृत्त्या पितृत्वं प्राप्नोतीत्यवगम्यते। यस्यैतानि न दत्तानि प्रेतश्राद्धानि षो
डश। पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि॥ तथा॥ चतुरो निर्वपेत्पिंडान्पूर्वं तेषु समापयेत्। ततः प्रभृति वै प्रेतः पितृसामान्यमश्नु
त इत्यादिवचनात्। यः सपिंडीकृतं प्रेतं इत्यनेनापि पृथगेकोद्दिष्टविधानेनोपपद्यते। यच्चापि पुनः प्रेतैर्न निर्दिशेदिति तदपि प्रेतशब्दं नो
च्चारयेत् पितृपितृशब्दमेवेत्येवमर्थं। न च प्रकर्षगमनान्नवेव प्रेतशब्दः। यतो विशिष्टदुःखाद्युत्तरावस्था प्रेतशब्देन रूढ्याभिधीयत इ
त्युक्तं॥ योपि प्रमीतमात्रे प्रेतशब्दप्रयोगः सोपि भूतपूर्वगत्या॥ सापिंडता तु पुरुषे सप्तमे विनिवर्तते इति च प्रथमपिंडस्य चतुर्थव्या
पित्वात्। द्वितीयस्य पंचमव्यापित्वात् तृतीयस्य षष्ठव्यापित्वात् सप्तमे विनिवर्तत इत्येतदपि घटते। अपि च निर्वाप्य पिंडत्रयेण न सपिंड्य

मि॰ आ॰
५६

मव्यापकत्वात्। अपि त्वेकशरीरान्वयेन उक्तं प्राक्। पितृशब्दश्च प्रेतत्वनिवृत्त्या श्राद्धदेवतारूपमागतेषु वर्त्तत इति पितृपात्रेष्वित्यत्र वि-
रुद्धं॥ तस्मादनंतरस्मृतपात्रोदकस्य तत्पिंडस्य च पितृपात्रेषु तत्पिंडेषु संसर्जनमिति स्थितं। आचार्यस्तु परमतमेवोपन्यस्तवान्। एतदपि-
हुः सपिंडकरणं पितामहादिषु त्रिषु प्रमीतेष्वेव दातव्यं। पितरि प्रेते पितामहे प्रपितामहे जीवति सपिंडीकरणं नास्त्येव। युक्तं मातृप्रमी-
तानां नैव कार्यं सपिंडनेति वचनात्॥ यत्पुनर्मनुवचनं॥ पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः। पितुः स नाम संकीर्त्य कीर्त्तयेत्प्रपि-
तामहमिति। तदपि श्राद्धप्रयोगनियमार्थं न पिंडद्वयदानार्थं॥ कथं॥ ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत्। पिता यस्य तु वृत्तः स्याज्जी-
वेच्चापि पितामहः। सोपि पूर्वेषामेव निर्वपेदित्यन्वयः। पक्षद्वयेपि कथं निर्वपेदित्याह। पितुः स नाम संकीर्त्य कीर्त्तयेत्प्रपितामहमि-
त्यादितग्रहणेन सर्वत्र पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य इत्येवं प्रयोगो नतु नः कदाचिदपि पितामहस्य प्रपितामहस्य वा दत्तं॥
वृद्धप्रपितामहस्य तत्पितुर्वा तत्त्वमतस्त्वपित्रादिशब्दानां संबंधवचनत्वात्। ध्रियमाणेपि पितरि पितुः पितृभ्यः पितामहेभ्यः प्रपि-
तामहेभ्य इति पितामहेभ्यश्च माने पितामहस्य पितृभ्यः प्रपितामहेभ्य इति। अतश्च पिंडपितृयज्ञे अहुतं पितर इत्यादिमंत्राणामू-
होनत्वविध्यतीति॥ यदपि विष्णुवचनं॥ यस्य पिता प्रेतः स्यात्स पितृपिंडं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यादिति तस्याप्ययमर्थः।

राम
५६

पितामहे ध्रियमाणे प्रेते पितरि पितुरेकं पिंडमेकोद्दिष्टविधानं विधाय पितुर्यः पितामहस्तत्परास्त्रयोह्वासां दद्यादिति। पितामहस्यात्मनः संप्रदानभूतः स्थित एवेति। प्रपितामहाद्यस्ततः परास्त्रयोह्वास्त्यो व दद्यादिति। शब्दप्रयोगनियमस्तु पूर्वोक्त एव। एवं गोब्राह्मणादिहतस्य पितुः सपिंडीकरणाभावो वेदितव्यः॥ यथाह कात्यायनः। ब्राह्मणादिहते ताते पतिते संगवर्जिते व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसाविति। गोब्राह्मणादिहतस्य पितुः सपिंडीकरणासंभवे तं विलंघ्य पितामहादिभ्यः पार्वणविधानमनुपपन्नमिति। सपिंडीकरणासंभवोवगम्यते। विद्यते स्मृत्यंतरेपि। नराः संततिविच्छिन्ना नास्ति तेषां सपिंडता। न च तैः सह कर्तव्यान्येकोद्दिष्टानि षोडश। मातुः सपिंडदानादौ गोत्रे विप्रतिपत्तिर्भर्तृगोत्रेणवा दातव्यमिति। उभयत्र च वचनदर्शनात्। स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे। स्वामिगोत्रेण कर्तव्या तस्याः पिंडोदकक्रियेत्यादि भर्तृगोत्रविषयं वचनं। पितृगोत्रं समुत्सृज्य न कुर्याद्भर्तृगोत्रतः। जन्मन्येव विपन्नोच नारीणां पैतृकं कुलमित्यादि पितृगोत्रविषयं। एवं प्रतिपन्नौ आसुरादिविवाहेषु ऊढिकाकरणे च पितृगोत्रमेव। तत्र विशेषवचनाद्दानस्यानिर्दिष्टत्वेन। ब्राह्म्यादिषु विवाहेषु व्रीहियववद्दह इत्थं तत्र विकल्प एव॥ तत्र च॥ येनास्य पितरो याता येन याताः पितामहाः॥ तेन यायात्सतां मार्गं तेन गच्छन्न रुष्यतीति नानावंशपरंपरायातसमाचारेण व्यवस्था। एवंविधविषयव्यतिरे

मि॰ श्रा॰
५७

केणास्यवचनस्यविषयान्तराभावात्।यत्र पुनः शास्त्रतोनव्यवस्थानाप्याचारात्।तत्रात्मनस्तुष्टिरेवेतिवचनादात्मतुष्टिरेवव्य
वस्थापिका॥यथागर्त्तेष्टमेष्टमेवाब्देइति।मातुःसपिंडीकरणेविरुद्धानीववाक्यानिदृश्यंते।तत्रपितामह्यादिभिःसार्द्धंसपिंडी
करणंस्मृतं।तथासत्यत्रापिभार्यायाःश्वमातृभिःसहसपिंडीकरणंकर्त्तव्यमितिपैठीनसिराह।अपुत्रायांमृतायांतुपतिःकुर्या
त्सापिंडतां।श्वश्र्वादिभिःसहैवास्याःसपिंडीकरणंभवेदितिचपत्यासहसपिंडीकरणंयमआह।पत्याचैकेनकर्त्तव्यंसपिंडीकरणं
स्त्रियाः।सामृतापिहितेनैकत्वंगतामंत्राहुतिव्रतैरिति।उशनातुमातामहेनसपिंडीकरणंकर्त्तव्यमित्युक्तं।पितुःपितामहेयद्व
त्पूर्णेसंवत्सरेसुतैः।मातुर्मातामहेतद्वदेषाकार्यासपिंडता तथा पितापितामहेयोज्यःपूर्णेसंवत्सरेसुतैः।मातामातामहेयो
ज्यातद्वदित्याहगालवइति।एवंविधेषुवचनेषुसत्स्वपुत्रायांभार्यायांप्रमीतायांतद्भर्त्ताश्वमात्रैवसापिंड्यंकुर्यात्।अत्रारोहणेतु
पुत्रःस्वपित्रैवमातुःसापिंड्यंकुर्यात्।आसुरादिविवाहोत्पन्नःपुत्रिकासुतश्चमातामहेनैव।ब्राह्मादिविवाहोत्पन्नःपित्रामातामहे
नपितामह्यावाविकल्पेनकुर्यात्।तत्रापियदिनिजवंशेसमाचारस्तदानीतथैवकुर्यात्।वंशसमाचारोप्यनियतोयदितदात्मन
स्तुष्टिरेवेतियथारुचिकुर्यात्।येनकेनापिमातुःसापिंड्येपियत्राष्टकादिषुमातुःश्राद्धंपृथग्विहितं।अष्टकासुवृद्धौचगया

राम
५७

यांचमृतेहनि।मातुःश्राद्धंपृथक्कुर्यादन्यत्रपतिनासह॥तत्रपितामह्यादित्रिभिरेवपार्वणश्राद्धंकर्तव्यं।अन्यत्रपतिनासहेति
पतिसापिंड्येतितदंशभागित्वात्।मातामहसापिंड्येनतदंशभागित्वान्नैवसह।यथाहशातातपः।एकमूर्तित्वमायातिसपिंडी
करणेकृते।पत्नीपतिपितृणांतुतस्मादंशेषुभागिनीति।एवंचसतिमातामहेनमातुःसापिंड्येमातामहश्राद्धंपितुःश्राद्धवन्नित्य
मेवपत्न्यापितामह्यावामातुःसापिंड्येमातामहश्राद्धंननित्यंकृतेभ्युदयेकृतेनप्रत्यवायइतिनिर्णयः।अर्वाक्तुसपिंडीकरणंयस्यसं
वत्सराद्भवेत्।तस्याप्यन्नंसोदकुंभंदद्यात्संवत्सरंद्विजो।संवत्सरादर्वाक्तुसपिंडीकरणंयस्यकृतंतस्यतदुद्देशेनप्रतिदिवसंप्रतिमासं
वायावत्संवत्सरंशक्त्यनुसारेणान्नमुदकुंभसहितंब्राह्मणायदद्यात्।अर्वाक्संवत्सरादितिवदतासपिंडीकरणंपूर्णेसंवत्सरेप्राप्ते
निदर्शितं।यथाहाश्वलायनः॥अथसपिंडीकरणंसंवत्सरांतेद्वादशाहेवेति॥कात्यायनोप्याह॥ततःसंवत्सरेपूर्णेसपिं
डीकरणंभवेत्।त्रिपक्षेवायदावाथवृद्धिरापद्यतेतदेति।द्वादशाहेत्रिपक्षेवृद्धिप्राप्तौसंवत्सरेचेतिचत्वारःपक्षादर्शिताः।त
त्रद्वादशाहेपितुःसपिंडीकरणंसाग्निकेनकार्यं।सपिंडीकरणंविनापितृरितिस्मरणात्।निराग्निकस्ययदाकर्त्ताप्रेतोवाप्य
ग्निमान्भवेत्।द्वादशाहेतदाकार्यंसपिंडीकरणंविनापिंडपितृयज्ञासिद्धेः॥साग्निकस्ययदाकर्त्ताप्रेतोवाप्यग्निमान्भवेत्।द्वाद

111

मि॰श्रा॰
५८

शाहेतदा कार्यं सपिंडीकरणं पितुरिति स्मरणात्। निराग्निकस्तु विपन्ने वृद्धिप्राप्ते संवत्सरे वेति। यदा प्राक्संवत्सरात्स
पिंडीकरणं तदा षोडशश्राद्धानि कृत्वा सपिंडीकरणं कार्यं। ततः सपिंडीकरणं कृत्वा स्वस्वकाले तानि कर्त्तव्यानीति संश
यः। उभयत्रापि वचनदर्शनात्। श्राद्धानि षोडशादत्त्वा नैव कुर्यात्सपिंडनं। श्राद्धानि षोडशापाद्य विदधीत सपिंडतामिति
।षोडशश्राद्धानि च। एकादशे द्विपक्षे वा षण्मासे मासिकान्तिके। श्राद्धानि षोडशैतानि संस्मृतानि मनीषिभिरिति दर्शिता
नि। यथा। यस्यासंवत्सरादर्वाक् सपिंडीकरणं भवेत्। मासिकं चोदकुंभं च देयं तस्यापि वत्सरमिति। अत्र सपिंडीकरणं कृत्वा
स्वकाले एतानि कर्त्तव्यानीति। प्रथमः कल्पः। अत्राप्रकारत्वेन प्रागनधिकारात्। यद्यपि वचनं षोडशश्राद्धानि कृत्वैव स
पिंडीकरणं संवत्सरात्प्रागपि कर्त्तव्यमिति। सोपमापरः कल्पः। यदा त्वापत्कल्पेन प्राक्सपिंडीकरणात्तेन श्राद्धानि करोति
तदैकोद्दिष्टविधानेन कुर्यात्। यदा तु मुख्यकल्पेन स्वकाले एव करोति तदाह्निकं। श्राद्धं यो यथा करोति पार्वणमेकोद्दिष्टं वा त
था मासिकानि कुर्यात्। सपिंडीकरणादर्वाक् कुर्वन् श्राद्धानि षोडश। एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु। सपिंडीकर
णादूर्ध्वं यदा कुर्यात्तदा पुनः। प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपीति स्मरणात्। एतच्च प्रेतश्राद्धसहितं सपिंडीकरणं स

राम
५८

112



विनर्क्षघनेषु वृद्धेषु भ्रातृषु सत्स्वप्येकेनैव कृतेनालं न सर्वैः कर्त्तव्यं । नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश । एकेनैव तु कार्याणि
णि संविभक्तधनेष्वपीति वचनात् । इदं च प्रेतश्राद्धसहितं सपिंडीकरणमसन्यासिनां पुत्रादिभिर्नियमेन कर्त्तव्यं । प्रेतत्वविमोक्षार्थ
त्वात् । सन्यासिनां तु न कर्त्तव्यं पुत्रादिभिः । त्रिदंडग्रहणादेव प्रेतत्वं नैव जायत इति । पुत्राद्यसन्निधाने येन सगोत्रादिना दाहसं
स्कारः कृतस्तेनैव दशाहात् प्रेतकर्म कर्त्तव्यं । असगोत्रः सगोत्रो वा स्त्री दद्याद्यदि वा पुमान् । प्रथमेह्नि यो दद्यात्स दशाहं समापये
दिति स्मरणात् । शूद्राणामप्येतत्कर्म कर्त्तव्यममंत्रकं द्वादशेह्नि । एवं सपिंडीकरणं कर्त्तव्यं मंत्रवर्ज्जं शूद्राणां द्वादशेह्नीति विष्णु
स्मरणात् । सपिंडीकरणादूर्ध्वं सांवत्सरिकपार्वणादीनि पुत्रेण नियमेनैव कार्याणि । अन्येषामनियतानि । एकोद्दिष्टकालमाह ।
मृतेहनि तु कर्त्तव्यं प्रतिमासं तु वत्सरं । प्रतिसंवत्सरं चैवमाद्यमेकादशेहनि । मृतेहनि प्रतिमासं संवत्सरं यावदेकोद्दिष्टं कार्यं । सपिं
डीकरणादूर्ध्वं प्रतिसंवत्सरमेकोद्दिष्टमेव कर्त्तव्यं । आद्यं सर्वैकोद्दिष्टप्रकृतिभूतमेकोद्दिष्टमेकादशेहनि । मृतदिवसापरिज्ञाने तु
श्रवणदिवसे ऽमावास्यायां वा कर्त्तव्यं । अपरिज्ञाने मृतेहनि अमावास्यायां श्रवणदिवसे वेति स्मरणात् । अमावास्यायामिति गमनमा
ससंबंधिनाममावास्यायां प्रवासवासरे चेयं तन्मासेंद्वक्षये पि वेति स्मरणात् । मृतेहनि तु आहिताग्नेर्विशेषो जातूकर्ण्येनोक्तः । उ

मि॰श्रा॰
५९

ई त्रिपक्षाद्यश्राद्धं मृतेऽहन्येव तद्भवेत्। अथ मुकारयेद्दाहाहाहिताग्ने द्विजन्मनः॥ इति त्रिपक्षास्वकृत्यप्रेतकर्म तद्दाहदिवसाद
रत्याहिताग्नेः कार्यं त्रिपक्षादूर्ध्वं यच्छ्राद्धं तन्मरणदिवस इत्यर्थः। अनाहिताग्नेः सर्वं मृताह एव। आद्यमेकादशेऽहनीति श्राद्धाशौचोपलक्ष
णामिति केचित्। शुचिना कर्म कर्त्तव्यमिति शुद्धेरंगत्वात्। अथाशौचापगमे इति सामान्येनोपक्रम्य एकोद्दिष्टस्य विष्णुना विहितत्वा
त्॥ तदप्युक्तं॥ एकादशेऽह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतं। चतुर्णामपि वर्णानां सूतकं तु पृथक् पृथक्। इति पैठीनसिस्मरणविरो
धात्। आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि। कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः। इति शंखवचनविरोधाच्च। सामान्येनाप
क्रमं विष्णुवचनं दशाहाशौचविषयमपि घटत इति। प्रतिसंवत्सरं चैवमिति प्रतिसंवत्सरं मृतेऽहन्येकोद्दिष्टमुद्दिष्टं योगीश्वरेण॥ तथा
च। स्मृत्यंतरं॥ वर्षे वर्षे तु कर्त्तव्या मातापित्रोस्तु सत्क्रिया। अदैवं भोजयेच्छ्राद्धं पिंडमेकं च निर्वपेदिति। यमोप्याह। सपिंडीकरणादूर्ध्वं
प्रतिसंवत्सरं सुतैः। मातापित्रोः पृथक् कार्यमेकोद्दिष्टं मृतेऽहनीति। व्यासस्तु पार्वणं प्रतिषेधति। एकोद्दिष्टं परित्यज्य पार्वणं कुरु
ते यः। अकृतं तद्विजानीयाद्भवेच्च पितृघातकः इति। जमदग्निस्तु पार्वणमेवाह। आपाद्य सह पिंडत्वमौरसो विधिवत्सुतः। कुर्वीत दर्श
वच्छ्राद्धं मातापित्रोः क्षयेऽहनीति॥ शातातपोप्याह॥ सपिंडीकरणं कृत्वा कुर्यात्पार्वणवत्सदा। प्रतिसंवत्सरं विद्वान्छागलेयोदितो

राम
५९

112

विधिः। इत्येवंवचनविप्रतिपन्नोदाक्षिणात्याव्यवस्थामाहः।। औरसक्षेत्रजाताभ्यां मातापित्रोःक्षयाहे पार्वणमेव कर्तव्यं। दत्तकादिभिरेकोद्दिष्टमिति। जातूकर्ण्यवचनात्। प्रत्यब्दं पार्वणेनैव विधिना क्षेत्रजौरसौ। कुर्वीतामितरे कुर्युरेकोद्दिष्टं सुता दशेति।। तदसत्। न त्वत्र क्षयाहवचनमस्त्यपि तु प्रत्यब्दमिति। संति च क्षयाहव्यतिरिक्तानि प्रत्यब्दं श्राद्धानि अक्षय्यतृतीयामाघीवैशाखीप्रभृतिषु। अतो न क्षयाहविषयपार्वणैकोद्दिष्टव्यवस्थापनायालं। यत्तु पराशरवचनं। पितृवर्गगतस्य देवत्वमौरसस्य त्रिपुरुषं। सर्वत्रानेकगोत्राणामेकस्यैव मृतेऽहनीति। तदपि न व्यवस्थापकं। यस्मादस्यायमर्थः। देवत्वं गतस्य सपिंडीकृतस्य पितुः। सर्वत्र औरसस्यौरसेन त्रिपुरुषं पार्वणं कार्यं। अनेकगोत्राणां भिन्नगोत्राणां मातुलादीनां क्षयेऽहनि यच्छ्राद्धं तदेकस्यैव एकोद्दिष्टमेवेति।। किंच। सपिंडीकरणादूर्ध्वमेकोद्दिष्टमेव कर्तव्यं औरसेनापि इत्युक्तं पैठीनसिना। एकोद्दिष्टं हि कर्तव्यमौरसेन क्षयेऽहनि। सपिंडीकरणादूर्ध्वं मातापित्रोस्तु पार्वणमिति। उदीच्याः पुनरेवं व्यवस्थापयंति। अमावास्यां भाद्रपदकृष्णपक्षे वा मृताहे पार्वणमन्यत्र मृताहे एकोद्दिष्टमेवेति। अमावास्याक्षयो यस्य प्रेतपक्षेऽथवा यदि। पार्वणं तत्र कर्तव्यं नैकोद्दिष्टं कदाचनेति स्मरणात्। तदपि नाद्रियंते वृद्धाः। अमिश्छिन्नमूलेनानेन निश्चितमूलानां बहूनां क्षयाहमात्रपार्वणविषयाणां वचनानाममावास्याप्रेतपक्षमृताहविषयत्वेनातिसं

मि॰श्रा॰
६०

कोचस्याप्युक्तत्वात्। सामान्यवचनानर्थवद्यथा। सप्तदशसामिधेनीरनुब्रूयादित्यनारभ्याधीतस्यविकृतिमात्रविषयस्यसप्तद
शवाक्यस्यसामिधेनीलक्षणाद्वारसंबंधेनार्थवत्त्वोमित्रविंदादिप्रकरणपठितेनसप्तदशवाक्येनमित्रविंदाद्यधिकारापूर्वसंबंधबो
धेनार्थवता मित्रविंदादिप्रकरणेउपसंहारः। इहतूभयोर्मृताहमात्रविषयत्वान्नार्थवत्वेति। अतोत्रपाब्दिकैकोद्दिष्टनिवृत्तिफल
तयाप्यापार्वणनियमविधानंयुक्तं। नचैकोद्दिष्टवचनानीमातापित्रोः क्षयाहविषयत्वेनपार्वणवचनानांतदन्यक्षयाहविष
यत्वेनव्यवस्थायुक्ता। उभयत्रापिमातापितृसुतग्रहणस्यविद्यमानत्वात्। सपिंडीकरणादूर्द्ध्वंप्रतिसंवत्सरंसुतैः। मातापित्रोः
पृथक्कार्यमेकोद्दिष्टंमृतेहनीति। तथा॥ आपाद्यसहपिंडत्वमौरसोविधिवत्सुतः। कुर्वीतदर्शवच्छ्राद्धंमातापित्रोःक्षयेहनीति
यदपिकैश्चिदुच्यते। मातापित्रोःक्षयाहेसाग्निःपार्वणंकुर्यात्। निरग्निरेकोद्दिष्टं। वर्षेवर्षेसुतःकुर्यात्पार्वणंयोग्निमान्द्विजः। पि
त्रोरनग्निमान्धीरएकोद्दिष्टंक्षयेहनीतिसुमंतुस्मरणात्। इति। तदपिसमपन्नत्वात्उपेक्षणीयं। बह्वृचपरिशिष्टेविज्ञायेचैकाग्न्यएव
च। तेषांसपिंडनादूर्द्ध्वमेकोद्दिष्टंनपार्वणमितिस्मरणात्। तत्रैवंनिर्णयः। सन्न्यासिनांक्षयाहेसुतैःपार्वणमेवकर्त्तव्यं। एकोद्दिष्टंन
तेषांहित्रिदंडग्रहणादिह। सपिंडीकरणाभावात्पार्वणंतस्यसर्वदेतिप्रचेतःस्मरणात्। आमावास्याक्षयाहेप्रेतपक्षक्षयाहेचपा

राम
६०

116

र्णामेव। अमावास्याञ्च योयस्य प्रेतपक्षेथवाऽनरित्यादिवचनस्योक्तविषयनियमपरत्वात्। अन्यत्र त्वह्याह्येपार्वणोको द्विस्थयोः व्रीहि
यववत्विकल्प एव। तत्रापि वंशाचारव्यवस्थायां सत्यां व्यवस्थितिः। असत्यां मात्सेच्छयैवेत्यस्य मतिप्रसंगेन। नित्यश्राद्धव्यतिरिक्तसर्वश्राद्ध
सिद्धमिदमभिधीयते। पिंडांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेपि वा। प्राक्षिपेत्सत्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत्। सर्वदत्तानां पिंडानां पि
डस्य वा प्रतिपत्तिरियं। गवे अजाय ब्राह्मणाय वा तदर्थिने पिंडान्दद्यात्। अथवागाधे जले वा प्रक्षिपेत्। किंच॥ सत्सु विप्रेषु भोजनदे
शावस्थितेषु द्विजोच्छिष्टं न मार्जयेत्तन्नोद्वासयेत्। तोऽप्यविशेषेण फलविशेषमाह। हविष्यान्नेन वै मासं पायसेन तु वत्सरं। मात्स्याहा
रिणाकौरभ्रशाकुनच्छागपार्षतैः। ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमं। मासवृद्ध्याभितृप्यंति दमांसपीयन्नैरिह पितामहाः। ह
विष्यं हविर्योग्यं तिलव्रीह्यादि॥ यथाह मनुः॥ तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा। दत्तेन मासं प्रीयते विधिवत्पितरो नृणामिति।
तदन्नं हविष्यान्नं तेन मासं पितरस्तृप्यंतीत्यनागतेनान्वयः॥ पायसेन गव्यपयःसिद्धेन वत्सरं संवत्सरं तु गव्येन पयसा पायसेन चे
ति स्मरणात्। मत्स्योत्रस्यः पाठीनादिस्तस्येदं मात्स्यं हरिणश्च मृगः। एणः कृष्णमृगो रौरयस्ताम्रो हरिणाद्व्यतरति आयुर्वेदस्मरणा
त्॥ तस्येदं हारिणं॥ अविरुरभ्रस्तस्येदमौरभ्रं। शाकुनं भक्ष्यपक्षिसंबंधि। अजः छागस्तस्येदं छागं। पृषच्चित्रमृगस्तन्मांसं पा

मि॰ आ॰
६१

र्षतां एणः कृष्णमृगः तत्पिशितमैणं । रुरुः शंबरः तत्संभवं रौरवं । वाराहं आरण्यसूकरसमुत्थं वाराहं । शशस्येदं शाशं । एभिर्मांसैः पितरो
दत्तेईविष्यान्नेन मास मित्यन्वयः ततऊर्द्ध्वं यथाक्रमं एकैकं मासवृध्या पितरस्तृप्यंति । किंच । खड्गामिषं महाशल्कं मधु मुन्यन्नमेव च ।
लोहामिषं महाशाकं मासं वाध्रीणसस्य वा यद्ददाति गयास्थश्च सर्वमानंत्यमश्नुते । तथा वर्षास्त्रयोदश्यां मघासु च विशेषतः । खड्गो
गंडकः । तस्य मांसं । महाशल्को मत्स्यभेदः ॥ मधु माक्षिकं । मुन्यन्नं सर्वमारण्यं नीवारादि ॥ लोहो रक्तच्छागः ॥ तस्यामिषं लोहामिषं । म
हाशाकं कालशाकं । वाध्रीणसो वृद्धः श्वेतच्छागः । त्रिपिबं त्विंद्रियक्षीणं वृद्धं श्वेतं प्रजायतिं । वाध्रीणसं तं याज्ञपाज्ञिकाः श्राद्धक
र्मणी तियाज्ञिकप्रसिद्धः । त्रिपिबः पिबतः कर्णजिह्वा यस्य जलं स्पृशंति स त्रिभिः पिबतीति त्रिपिबः । तस्य वाध्रीणसस्य मांसं । यद्ददाति
गयास्थश्च यत्किंचिच्छाकादिकमपि गयास्थो ददाति प्रसंगात् । चकारात्तद्युगादिषु गंगाद्वारादिष्वपि । गंगाद्वारे प्रयागे च नैमिषे पुष्करे
ह्रदे । सन्निहत्यां गंगायां च श्राद्धमक्षय्यतां व्रजेदिति । आनंत्यमश्नुते । अनंतफलहेतुत्वं प्राप्नोति । आनंत्यमश्नुत इति प्रत्येकमभिसंबध्यते ।
तथा वर्षात्रयोदश्यां भाद्रपदकृष्णत्रयोदश्यां विशेषतो मघायुक्तायां यत्किंचिद्दीयते तत्सर्वमानंत्यमश्नुत इति गतेन संबध्यते च

राम
६१

यद्यपि मुन्यन्नमांसमध्वादीनि सर्ववर्णानां सामान्येन श्राद्धोपयोगानीति दर्शितानि तथापि पुलस्त्योक्तव्यवस्थादरणीया। मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः। मधुप्रधानं शूद्रस्य सर्वेषां चाविरोधि यदिति॥ अस्यार्थः॥ मुन्यन्ने नीवारादि यच्छ्राद्धयोग्यमुक्तं तद्ब्राह्मणस्य प्रधानं॥ समग्रफलदं॥ यच्च मांसं तत्क्षत्रियवैश्ययोः प्रधानं। यत्क्षौद्रमुक्तं तच्छूद्रस्य। एतद्व्यतिरिक्तं यदविरोधि यदन्नं तिलमिश्रं वास्तुकादि यच्च विहितं हविष्यकालशाकादि तत्सर्वेषां समग्रफलदमिति। तिथिविशेषात्फलविशेषमाह॥ कन्यां कन्यावेदिनश्च पशून्वै सत्सुतानपि। द्यूतं कृषिं च वाणिज्यं द्विशफैकशफं तथा। ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरूप्ये सकुप्यके। ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा। प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीं। शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते। कन्या रूपलक्षणशीलवती। कन्यावेदिनो जामातरः। बुद्धिरूपलक्षणसंपन्नाः। पशवः क्षुद्राश्छागादयः। सुताः सन्मार्गवर्त्तिनः। द्यूतं द्यूतविजयः। कृषिः कृषिफलं। वाणिज्यं वाणिज्यलाभः। द्विशफा गवादयः। एकशफा अश्वादयः। ब्रह्मवर्चस्विनः पुत्रा वेदाध्ययनतदर्थानुष्ठानजनितं तेजो ब्रह्मवर्चसं तद्वंतः। स्वर्णरूप्ये हेमरजते। तद्व्यतिरिक्तं [illegible]त्रपुसीसादि कुप्यकं ज्ञातिश्रैष्ठ्यं ज्ञातिप्रमुखत्वं। सर्वकामाः काम्यंत इति कामाः स्वर्गपुत्रपश्वादयः। एतानि कन्यादीनि चतुर्दश फलानि कृष्णप्रतिपत्प्रभृतिष्वमावास्यापर्यंतासु चतुर्दशीवर्जि

रू२

८।

मि·श्रा० तासुचतुर्दशसुतिथिषु श्राद्धदो यथाक्रममवाप्नोति येकेचन शस्त्रेणाहतास्तेभ्यः कृष्णपक्षचतुर्दश्यां एकोद्दिष्टविधानेन श्राद्धंद्या
६२ द्यद्विब्राह्मणादिहतानभवंति। समत्वमागतस्यापि पितुः शस्त्रहतस्य च। एकोद्दिष्टंसुतैः कार्यंचतुर्दश्यां महालयइतिस्मरणात्॥
समत्वमागंतस्य सपिंडीकृतस्यपितुः महालये भाद्रपदकृष्णपक्षे चतुर्दश्यां शस्त्रहतस्यैवनान्यस्येतिनियमः। नपुनः शस्त्रहतस्य
चतुर्दश्यामेवेति। अतएवक्षयाहादौ शस्त्रहतस्यापियथाप्राप्तमेवश्राद्धं। नचभाद्रपदकृष्णपक्षएवायंविधिरितिमंतव्यंप्रोष्ठप
द्यांअपरपक्षेमासिचैवमिति शौनकस्मरणात्। नक्षत्रविशेषाफलविशेषमाह। स्वर्गंह्यपत्यमोजश्चशौर्यंक्षेत्रंबलंतथा। पुत्रं
श्रैष्ठ्यंचसौभाग्यंसमृद्धिंमुख्यतांशुभं। प्रवृत्तचक्रतांचैववाणिज्यप्रभृतीस्तथा। अरोगित्वंयशोवीतशोकतांपरमांगतिं। धनंवेदा
न्भिषक्सिद्धिंकुप्यंगाअप्यजाविकं। अश्वानायुश्चव्यपेतमदमत्सरः। कृत्तिकादिभरण्यंतंप्रतिनक्षत्रंयः श्राद्धंददातिसय राम
थाक्रमंस्वर्गादीनायुःपर्यंतान्कामानाप्नोति। यद्यास्तिकः श्रद्दधानोव्यपेतमदमत्सरश्चभवति। आस्तिकोविश्वासवान्। श्रद्दधानः ६२
आदरातिशययुक्तः व्यपेतमदमत्सरः मदोगर्वः। मत्सरईर्ष्याताभ्यांरहितः। स्वर्गोनिरतिशयंसुखं। अपत्यमविशेषेण। ओजआत्म
शक्त्यतिशयः॥ शौर्यंनिर्भयत्वं क्षेत्रंफलवत्। बलंशारीरं। पुत्रोगुणवान्। श्रैष्ठ्यंख्यातिः। सौभाग्यंजनप्रियता। समृद्धिर्धनादेः॥ मुख्यता

120

आयताशुभंसामान्येनप्रवृत्तचक्रताप्रतिहताज्ञता।वाणिज्यप्रभृतीतिवाणिज्यकृषिकुसीदगोरक्षा।आरोगित्वमरामयत्वं
।यशःसख्यातिः।वीतशोकताइष्टवियोगादिजनितदुःखाभावः।परमागतिर्ब्रह्मलोकप्राप्तिः॥धनंसुवर्णादि।वेदाश्वेदा
दयः।भिषक्सिद्धिःऔषधफलावाप्तिः॥कुप्यंसुवर्णरजतव्यतिरिक्तंताम्रादिः।गावःप्रसिद्धाः।अजावयः।अश्वाश्च।आयु
दीर्घकालजीवनं।मासवृद्ध्याभिःतृप्यंतिरत्नैरिहपितामहाः।इत्यनेनपितॄणांश्राद्धेनतृप्तिर्भवतीत्युक्तंतदनुपपन्नं।स्वावि
स्विकशुभाशुभकर्मविशेषेणस्वर्गनरकादिगतानांमनुष्याणांपुत्रादितिर्दत्तैरन्नपानादिभिस्तृप्त्यसंभवात्।संभवेपिस्वय
मात्मनाप्यनीशानाःकथंस्वर्गादिफलंप्रयच्छंतीत्यतआह।वसुरुद्रादितिसुताःपितरःश्राद्धदेवताः।प्रीणयंतिमनुष्या
णांपितॄन्श्राद्धेनतर्पिताः।आयुःप्रजांधनंविद्यांस्वर्गंमोक्षंसुखानिच।प्रयच्छंतितथाराज्यंप्रीतानॄणांपितामहाः
नत्वत्रदेवदत्तायएवश्राद्धकर्मणिसंप्रदानभूताःपित्रादिशब्दैरुच्यते।किंनधिष्ठातृवस्वादिदेवतासहिताएव।य
थादेवदत्तादिशब्दैर्नशरीरमात्रंनाप्यात्ममात्रंकिंतुशरीरविशिष्टाआत्मानउच्यंते।एवमधिष्ठातृदेवतासहिताए
व।यथादेवदत्तादिदेवदत्तादयःपित्रादिशब्देनोच्यंते।एवमधिष्ठातृदेवतावस्वादयःपुत्रादिभिर्दत्तेनान्नपानादिना

नै४ फलं२

मि.आ. ६३

तस्माः संतस्मानपिदेवदत्तादीन्तर्पयंति। कर्तृंश्च पुत्रादीन्फलेन संयोजयंति। यथामाता गर्भपोषणायान्नमदन्नेनदो
हदान्नपानादिना स्वयमुपभुक्तेन तत्प्रासती स्वजठरगतमपत्यंतर्पयति। सोहंदान्नपानाद्भिप्रदायिन स्वयमप्युपकारक
रफलेनसंयोजयंति। तद्वद्वसुरुद्राश्चादितिसुताश्चादित्या एते पितरः पितृपितामहशब्देनोच्यंते। नकेवलंदेवदत्ता
एव श्राद्धदेवताः श्राद्धकर्माणि संप्रदानभूताः किंत्वेते मनुष्याणां पितृन्देवदत्तादीन्स्वयंश्राद्धेनतर्पिताः संतर्पयंतिज्ञा
नशक्त्यतिशयेन। किंच न केवलं पितृंस्तर्पयंति अपितु श्राद्धकारिणः। आयुः प्रजांधनंविद्यांस्वर्गंमोक्षंसुखानिच॥
प्रयच्छंति तथा राज्यंपितरः श्राद्धतर्पिताः। चकारात्तत्र तत्र शास्त्रोक्तमन्यदपि स्वयंप्रीताः पितामहा चस्मास्यप्रयच्छंति।
इति श्राद्धप्रकरणम्॥ दृष्टादृष्टफलसाधनानि कर्माण्यभिहितानि अभिधास्यते च तेषां स्वरूपनिष्पत्तिः फलसाध
नत्वंवाविघ्नेन भवतीत्यविघ्नार्थं कर्मविधास्यन्विघ्नस्यकारकत्वज्ञापकहेतुमाह। विनायकः कर्मविघ्नसिद्ध्यर्थमित्यादिनोभयवि
धविघ्नहेतुपरिज्ञानाद्धविघ्नच्छिन्नस्यप्रारब्धस्यापरिपालनायोपस्थितस्य प्रध्वंसार्थंचापेक्षापूर्वकारिणः प्रवर्तंते रोगस्येवो
नयविघ्नहेतुपरिज्ञानात्। विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः। गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा।

राम ६३

वि३

182



विनायकोविघ्नकरणार्थसाधनानांकर्मणां।विघ्नसिद्ध्यर्थंस्तत्तपफलसाधनत्वविधानसिद्धयेविनियोजितोनियुक्तः।रुद्रेण
ब्रह्मणाचकराद्धिकृत्नाच।गणानांपुष्पदन्तप्रभृतीनां।आधिपत्येस्वाम्येच।एवंविघ्नस्यकारकहेतुंतस्यज्ञापकहेतुंस्वप्नदर्शना
र्थमाह।तेनोपसृष्टोयस्तस्यलक्षणानिनिबोधत।स्वप्नेवगाहतेत्यर्थंजलंमुंडांश्चपश्यति।काषायवाससश्चैवक्रव्यादांश्चाधि
रोहति।अंत्यजैर्गर्दभैरुष्ट्रैःसहैकत्राधितिष्ठते।व्रजन्नपितथात्मानंमन्यतेनुगतंपरैः।तेनविनायकेनोपसृष्टोगृहीतोयस्त
लक्षणानिज्ञायकानिनिबोधतजानीध्वं।हेमुनयः।मुनर्षीणांप्रत्यवमर्शः।शान्तिप्रकरणप्रारंभतः।स्वप्नेस्वप्नावस्थायांजल
मत्यर्थमवगाहतेस्रोतसाह्रियतेनिमज्जतिवा।मुंडान्मुंडितशिरसःपुरुषान्पश्यति।काषायवाससोरक्तनीलादिवस्त्रप्राव
रणांश्च।क्रव्यादानाममांसाशिनः।पक्षिणोगृध्रादीन्।मृगांश्चव्याघ्रादीनधिरोहति।तथांत्यजैश्चांडालादिभिर्गर्दभैः।
खरैरुष्ट्रैःसहपरिवृतस्तिष्ठति।व्रजन्गच्छन्पृष्ठतःपरैःशत्रुभिरनुविद्धिरनुगतमभिभूयमानमात्मानंमन्यते।एवंस्वप्नदर्शने
मुक्त्वापत्यक्षलिंगान्याह।विमनाविफलारंभःसंसीदत्यनिमित्ततः।तेनोपसृष्टोलभतेनराज्यंराजनंदनः।कुमारीनच
भर्तारमपत्यंगर्भमंगना।आचार्यत्वंश्रोत्रियश्चनशिष्योध्ययनंतथा।वणिग्लाभंनचाप्नोतिकृषिंचापिकृषीवलः।विम

मि॰आ॰
६५

नाः विछिन्नमचित्तः। विफलारंभः विफलाआरंभायस्यसतथोक्तः। नक्वचित्फलमाप्नोति। संसीदत्यनिमित्ततः। विमनाकार
णेनदीनमनस्कोभवति। राजनंदनोराजकुलेजातः। कृतः शौर्यादिगुणयुक्तोपिराज्यंनलभते। कुमारीरूपलक्षणाभिजा
त्यादिसंपन्नापिईप्सितंभर्तारंनलभते। अंगनागर्भिणीपत्यं। अपत्यवतीगर्भं। अध्ययनतदर्थज्ञानेसत्यप्याचार्यत्वंश्रोत्रियः
। विनयाचारादियुक्तोपिशिष्योध्ययनंश्रवणंवानलभतइतिसर्वत्रसंबध्यते। वणिक्कुवाणिज्योपजीवी। तल्लाभलोपि
धान्यादिषुक्रयविक्रयादिषुलाभं। कृषीवलःकर्षकः। तत्रनियुक्तोपिकृषीफलंनवाप्नोति। एवंयोयथायस्याजीव
तिसतत्रतत्रनिःफलारंभश्चेत्तेनोपसृष्टोवेदितव्यः। एवंकारकज्ञापकहेतूनभिधायविघ्नोपशांत्यर्थंकर्मविधातु
माह। स्नपनंतस्यकर्तव्यंपुण्येह्निविधिपूर्वकं। गौरसर्षपकल्केनसाज्येनोत्सादितस्यच। सर्वौषधैःसर्वगंधैर्विलि
प्ताशिरसस्तथा। भद्रासनोपविष्टस्यस्वस्तिवाच्याद्विजाःशुभाः। तस्यविनायकोपसृष्टस्यानागतविनायकोपसर्गपरिहारा
र्थिनोवास्नपनमभिषेचनंकर्तव्यं। पुण्येह्न्यनुकूलनक्षत्रादियुक्तेह्निदिवसेनरात्रौविधिपूर्वकंशास्त्रोक्तेतिकर्तव्यतास
हितंस्नपनविधिमाह। गौरसर्षपकल्केनसाद्यार्थपिष्टेनसाज्येनघृतलोलीकृतेनोत्सादितस्योद्वर्तितांगस्यतथास

राम
६५

वौषधैः प्रियंगुनागकेसरादिभिः सर्वगंधैश्चंदनागरुकस्तूरिकादिभिर्लिप्तशिरसो वक्ष्यमाणभद्रासनोपविष्टस्य द्विजा ब्राह्मणाः शुभाः कृताध्ययनसंपन्नाः शोभनाकृतयः सदाचारा अस्य स्वस्ति भवंतो ब्रुवंत्विति वाच्याः। अस्मिन्समये रत्नोक्तमार्गेण पुण्याहवाचनं कुर्यादित्यर्थः॥ किंच। अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्। मृत्तिकां रोचनां गंधान्गुग्गुलं चाप्सु निःक्षिपेत्। याहृता ह्येकवर्णैश्च चतुर्भिः कलशैर्ह्रदात्। चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं ततः। अश्वस्थानगजस्थानवल्मीकसरित्संगमाशोध्यह्रदेभ्य आहृतां पंचविधां मृदं गोरोचनां गंधांश्चंदनागरुकुंकुमप्रभृतीन् गुग्गुलं च तास्वप्सु निःक्षिपेत्। याश्चापश्चाहृता ह्येकवर्णैः समानवर्णैश्चतुर्भिः कलशैः शुभैरव्रणास्फुटिताजलकैर्ह्रदाद्शोध्यासंगमाद्वा ततश्चानडुहे चर्मणि रक्ते लोहितवर्णे उत्तरलोम्नि प्राचीनग्रीवे तद्भद्रासनं मनोरममासनं श्रीपर्णीनिर्मितं स्थाप्यं। तत उक्तोदकमृत्तिकागंधादिसहिता अश्वत्थादिपल्लवोपशोभिता आम्रकूर्चदामवेष्टितकंठाश्चंदनानि चर्चिता नवाहतवस्त्रभूषिताश्चतस्रः पूर्वादिदिक्षु स्थापयित्वा शुचौ भूतले सस्थंडिले रचितपंचवर्णस्वस्तिके लोहितमानडुहं चर्मोत्तरलोम प्राचीनग्रीवमास्तीर्य तस्योपरि श्वेतवस्त्राच्छादितमासनं स्थापयेत्। इत्येतद्भद्रासनमभिहितं तस्मिन्नुपविष्टस्य स्वस्तिवाच्या द्विजाः शुभाः। सहस्राक्षं शतधारमृषिभिः

मि॰आ॰
६५

पावनंकृतं। तेनत्वामभिषिंचामिपावमान्यःपुनंतुते। स्वस्तिवाचनानंतरंजीवत्पतिपुत्राभिरूपगुणशालिनीभिःसुवासिनीभिःकृतमंगलःपूर्वदिग्देशावस्थितंकलशमादायानेनमंत्रेणाभिषिंचेयुः। सहस्राक्षमनेकशक्तिकंशतधारंबहुप्रवाहमृषिभिर्मन्वादिभिर्यदुदकंपावनंपवित्रंकृतमुत्पादितंतेनोदकेनत्वांविनायकोपसृष्टंविनायकोपसर्गशांतयेऽभिषिंचामि। पावमान्यश्चेताआपस्त्वापुनंतु। तदनंतरंदक्षिणदिशावस्थितंद्वितीयंकलशमादायानेनमंत्रेणाभिषिंचेत्। भगंतेवरुणोराजाभगंसूर्योबृहस्पतिः। भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददु[illegible]ः। तद्भगंकल्याणंतेवरुणोराजाभगंसूर्योभगंबृहस्पतिः। भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुरिति। ततस्तृतीयंकलशमादायानेनमंत्रेणाभिषिंचेत्। यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि। ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुसर्वदा। तत्केशेषुयद्दौर्भाग्यमकल्याणंसीमंतेमूर्द्धनिललाटेकर्णयोरक्ष्णोश्चतत्सर्वमापोदेव्योघ्नंतुउपशमयंतुसर्वदेति। ततश्चतुर्थंकलशमादायपूर्वोक्तैस्त्रिभिर्मंत्रैरभिषिंचेत्। सर्वैर्मंत्रैश्चतुर्थमिति। स्मृतिलिंगात्। स्नातस्यसार्षपंतैलंस्रुवेणौदुंबरेणच। जुहुयान्मूर्द्धनिकुशान्सव्येनपरिगृह्यच। उक्तेनप्रकारेणकृताभिषेकस्यमूर्द्धनिसव्यपाणिनागृहीतकुशांतरितेसार्षपतैलमौदुंबरेणस्रुवेणवक्ष्यमाणमंत्रैर्जुहुयादाचार्यः। मितश्चसंमितश्चै

राम
६५

वत्तथा शालकटंकटौ । कूष्मांडो राजपुत्रश्चेत्यंते स्वाहासमन्वितैः । नामभिर्बलिमंत्रैश्च नमस्कारसमन्वितैः । मितसंमितादिभिर्विनाय
कस्य नामभिः स्वाहाकारान्तैः प्रणवादिभिर्बलिमंत्रैश्च नमस्कारसमन्वितैः । मितसंमिताद्विवि ॐडूर्यादितिगतेन संबंधः । स्वाहाकारयो
गाच्चतुर्थी विभक्तिः । अत्र ॐ मिताय स्वाहा । ॐ सोमिताय स्वाहा ।। ॐ शालाय स्वाहा । ॐ कटंकटाय स्वाहा । ॐ कूष्मांडाय स्वाहा । ॐ राजपुत्रा
यस्वाहेति । एवमत्रानुवृत्ति । अनंतरं लौकिकेऽग्नौ स्थालीपाकविधिना चरुं श्रपयित्वा तैरेव षड्भिर्मंत्रैस्तस्मिन्नेवाग्नौ हुत्वा तच्छेषं बलि
मंत्रैरिंद्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानंतानां नामभिश्चतुर्थ्यंतैर्नमोन्वितैस्तेभ्यो बलिं दद्यात् । अनंतरं किं कुर्यादि
त्यत आह । दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः । कृताकृतांस्तंडुलांश्च पललौदनमेव च । मत्स्यान्पक्वांस्तथैवामान्मांसमेताव
देव तु । पुष्पं चित्रं सुगंधं च सुरां च त्रिविधामपि । मूलकं पूरिकां पूपांस्तथैवोंडेरकस्रजः । दध्यन्नं पायसं चैव गुडपिष्टं समोदकं । एतान्स
र्वानुपाहृत्य भूमौ कृत्वा ततः शिरः । विनायकस्य जननीमुपतिष्ठेत्ततोंबिकां । कृताकृताद्युपहारवस्तुजातं विनायकस्योपाहृत्य स
विधानाद्गजाननस्याम्बशिरसा भूमिं गत्वा ॐ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि । तन्नो गौरी प्रचोदयादित्यनेनांबिकां च नमस्कृत्य ।।
तत उपहारशेषमास्तीर्य कुशे शूर्पे निधाय चतुष्पथे निदध्यात् । बलिं गृह्णंत्विमं देवा आदित्या वसवस्तथा । मरुतोथाश्विनौ रुद्राःसु

मि॰आ॰
६६

पतगाःपन्नगाग्रहाः।असुरायातुधानाश्चपिशाचामातरोनगाः।शाकिन्योयक्षवेतालायोगिन्यःपूतनाःशिवाः।जृंभकाःसिद्धगंधर्वा
मालाविद्याधरानराः।दिक्पालालोकपालाश्चयेचविघ्नविनायकाः।जगतांशान्तिकर्तारोब्रह्माद्याश्चमहर्षयः।माविघ्नोमाचमेपाको
मासंतुपरिपंथिनः।सौम्याभवंतुतृप्ताश्चभूताःप्रेताःसुखावहाः।इत्येतैर्मंत्रैः।कृताकृतैः।सकृदवहतास्तंडुलाःपललंतिलपि
ष्टंतेनमिश्रओदनःपललौदनः।मत्स्याःपक्वाश्चपक्वाश्च।मांसमेतावदेवतुपक्वमपक्वंच।पुष्पंचित्रंरक्तपीतंनानावर्णंसुगंधंचंद
नादिद्रव्यं।सुरात्रिविधागौडीमाध्वीपैष्टीच।मूलकंकंदाकारोवृक्षविशेषः।पूरिकाःप्रसिद्धाः।अपूपाःस्नेहपक्वागोधूमवि
कारः।उंडेरकाःपिष्टमयाःप्रसिद्धाः।स्रजः।दध्यन्नंदधिमिश्रमन्नं।पायसंप्रसिद्धं।गुडपिष्टंगुडपिश्रशाल्यादिपिष्टं।मोदका
लड्डुकाः।अनंतरंविनायकंतज्जननींचांबिकांवक्ष्यमाणमंत्रेणोपतिष्ठेत्।किंकृत्वेत्याह।दूर्वासर्षपपुष्पाणांदत्वार्घंपूर्णमं
जलिं।सकुसुमोदकेनार्घंदत्वादूर्वासर्षपपुष्पाणांपूर्णमंजलिंचदत्वोपतिष्ठेदितिसंबंधः।उपस्थानमंत्रमाह।रूपंदेहियशोदे
हिभगंभगवतिदेहिमे।पुत्रान्देहिधनंदेहिसर्वकामांश्चदेहिमे।विनायकोपस्थानेभगवन्नित्यूहः।ततःशुक्लांबरधरःशुक्लमा
ल्यानुलेपनः।ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मंगुरोरपि।ततोभिषेकानंतरंयजमानःशुक्लमाल्यानुलेपनोब्राह्मणान्भोज

राम
६६

128

येत्। यथाशक्ति गुरवे कृताध्ययनसंपन्नाय विनायकस्नपने विधिज्ञाय वस्त्रयुग्मं दद्यादपि शक्त्य यथाशक्ति दक्षिणां विना
यकोद्देशेन दद्यात्। ब्राह्मणेभ्यश्च। तत्रायं प्रयोगक्रमः। चतुर्भिर्ब्राह्मणैः साहसुनक्ष लग्ने गुरुर्यज्ञासनस्थ स्नानानंतरं तस्मि
न्निषो विनायकं तज्जननीं चोक्तमंत्रैः सांगं संपूज्यादिति: समस्तद्रव्यं विहत्य अर्पयित्वा भद्रासनोपविष्टस्य यजमानस्य पुण्या
हवाचनं कृत्वा चतसृभिः कलशैः रात्रि पिंच्य शिरसि सिक्त्वा च रुद्रहोमं विधायापाति एक शालायां दिक्षु इंद्रादिलोकपालेभ्यो ब
लिं दद्यात्। यजमानस्नानानंतरं शुक्लमाल्यांबरधरो गुरुणा सहितो विनायकांबिकाभ्यामुपहारं दत्वा शिरसा भूमिं गत्वा
सुक्तमोदकेनार्घ्यं दत्वा दूर्वासर्षपपुष्पांजलिं च दत्वा विनायकमंबिकां चोपतिष्ठेत्। गुरुरुपहारशेषं शूर्पे कृत्वा चत्वरे निदद्या
त्। अनंतरं वस्त्रयुग्मं दक्षिणां ब्राह्मणभोजनं च दद्यादिति। इति श्री विनायकस्नपनविधिः अस्यैव विनायकस्नप
नस्योक्तोपहारेण संयोगांतरं दर्शयितुमाह। एवं विनायकं संपूज्य ग्रहांश्चैव विधानतः। कर्मणां फलमाप्नोति श्रियं चा
प्नोत्यनुत्तमां। एवमुक्तेन प्रकारेण विनायकं संपूज्य कर्मणां फलमाप्नोति इत्युपसंहारः।। संयोगांतरमाह।। श्रियं चो
त्कृष्टतमामाप्नोतीति। श्रीकामश्चानेन विधानेन विनायकं पूजयेदित्यर्थः।। आदित्यादिग्रहपीडाशांतिकामस्य चनन्नमा

129

मि॰आ॰
६७

दिकामस्य ग्रहपूजाकल्पं विधास्य ग्रहपूजामष्टपद्धिपतिग्रहांश्चैव विधानतइति। ग्रहानादित्यादीन्वक्ष्यमाणेन विधिनासं
पूज्य कर्मणां सिद्धिमाप्नोति श्रियं चाप्नोतीति॥ नित्यकामसंयोगानाह। आदित्यस्य यथा पूजां तिलकंस्वामिनस्तथा। म
हागणपतेश्चैवं कुर्वन्सिद्धिमवाप्नुयात्। आदित्यस्य भगवतः सदा प्रतिदिवसं रक्तचंदनकुसुमादिभिः। पूजांकुर्वन्तथा
स्कंदस्य महागणपतेश्च नित्यं पूजां कुर्वन्सिद्धिमोक्षमात्मना द्वारेण प्राप्नोतीति नित्यसंयोगः। आदित्यस्कंदगणपतीना
मन्यतमस्य सर्वेषां वा तिलकं स्वर्णनिर्मितं रूप्यनिर्मितं वा कुर्वन्सिद्धिमात्तिलिपितामाप्नोति। तथा चक्षुषी वेति कामसंयो
गः इति गणपतिकल्पः एवं विनायकं संपूज्य ग्रहांश्चैव विधानतः। कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्तमामिति।
अनेन ग्रहपूजायाः कर्मणामविघ्नेन फलसिद्धिः श्रीश्च फलमित्युक्तमिदानीं फलांतरमाह। श्रीकामः शांतिकामो वा
ग्रहपूजां समाचरेत्। वृष्ट्यायुः पुष्टिकामो वा तथैवाभिचरन्नपि। श्रीकाम इति पूर्वस्यानुवादः। शान्तिकाम आपदुपशा
न्तिकामः। सस्यादिवृद्ध्यर्थं प्रवर्षणं वृष्टिः। आयुरपमृत्युजयेन दीर्घकालजीवनं। पुष्टिरनवद्यशरीरत्वं। एतान्काम
यत इति वृष्ट्यायुः पुष्टिकामः। एते श्रीकामादयो ग्रहयज्ञं ग्रहपूजां समाचरेयुः। तथाभिचरन्नप्यदृष्टोपायेन परपीडाभि

रा॰
६७



चारम्भत्वाभस्थग्रहयज्ञमाचरेत्। ग्रहानाह। सूर्यः सोमो महीसुतः सोमपुत्रो बृहस्पतिः। शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः
स्मृताः। एते सूर्यादयो नवग्रहाः। ग्रहाः सुजंपट्टसुक्तीकिंकृत्वेत्याह। तांम्रकात्स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ। रजतादयसः
सीसात्कांस्यात्कार्या ग्रहाः क्रमात्। स्ववर्णैर्वा पटे लेख्या गंधैर्मंडलकेषु वा। सूर्यादीनां स्ववर्णैर्यस्मान्मादितिर्यथाक्रमं कार्याः। तद
भावे स्ववर्णैर्विधिपटे लेख्या गंधैर्मंडलवर्णकैः पटे लेख्याः। मंडले वा गंधैः रक्तचंदनादिभिर्यथावर्णं लेख्या इत्यन्वयः। द्विभु
जत्वादि विशेषस्तु मत्स्यपुराणोक्तो द्रष्टव्यः॥ यथा॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः॥ सप्ताश्वः सप्तरज्जुश्च द्विभुजः
स्यात्सदा रविः। श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः। गदापाणिर्द्विबाहुश्च कर्त्तव्यो वरदः शशी॥ रक्तमाल्यांबरधरः शक्ति
शूलगदाधरः। चतुर्भुजो मेषगमनो वरदः स्याद्धरासुतः। पीतमाल्यांबरधरः कर्णिकारसमद्युतिः। खड्गचर्मगदापाणिः सिंहस्थो
वरदो बुधः॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ। दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू। इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः
। चापबाणासनधरः कर्त्तव्योऽर्कसुतः सदा। करालवदनः खड्गचर्मशूलधरः प्रभुः। नीलसिंहासनस्थश्च राहुरत्र प्रशस्यते। धूम्रा द्वि
बाहवः सर्वे गदिनो विकृताननाः। गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः। सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः। ह्यंगुले

मि॰ग्रा॰
६०

नोच्छ्रिताः सर्वे शतमष्टोत्तरशतमिति। एवं तेषां स्थापनदेशः॥ शंखेनोक्तः॥ मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु। उत्तरे
ण गुरुं विद्याद्बुधं पूर्वोत्तरेण तु। पूर्वेतु भार्गवं विद्यात्सोमं दक्षिणपूर्वके। पश्चिमे तु शनिं विद्याद्राहुं दक्षिणपश्चिमे। पश्चिमोत्तर
तः केतून्स्थापयेच्छुक्लतंडुलैः॥ इति॥ पूजाविधिमाह। यथावर्णं प्रदेयानि वासांसि कुसुमानि च। गंधाश्च बलयश्चैव धूपो देय
श्च गुग्गुलः। कर्तव्या मंत्रवंतश्च चरवः प्रतिदैवतं। यथावर्णं यस्य ग्रहस्य यो वर्णः तद्वर्णानि वस्त्रगंधपुष्पाणि बलयश्च धूपश्च स
र्वेभ्यो गुग्गुलुर्देयश्चरवश्च प्रतिदेवतमग्निप्रतिष्ठापनाधानादि पूर्वकं चतुरश्चरुमुष्टीन्निर्वपेदमुष्मै त्वा जुष्टं निर्वपामीत्यादि वि
विना कार्याः। अनंतरं सामिद्धेध्माविध्माधानादिआघारांतं कर्म कृत्वा आदित्याद्युद्देशेन यथाक्रमं वक्ष्यमाणमंत्रैर्वक्ष्यमाणाः
समिधो वक्ष्यमाणप्रकारेण हुत्वा चरवो होतव्याः॥ मंत्रानाह। आकृष्णेन इमं देवा अग्निर्मूर्द्धा दिवः ककुत्। उद्बुध्यस्वेति च ऋचो य
थासंख्ये प्रकीर्तिताः। बृहस्पते अति यदर्यस्तथैवान्नात्परिस्रुतः। शन्नो देवीस्तथा कांडात्केतुं कृण्वन्निमास्तथा। आकृष्णेन
रजसा वर्तमान इत्यादयो नव मंत्रा यथाक्रममादित्यादीनां मे दिव्याः। [illegible]क्रमात्समिधमाह। अर्कः पालाशः खदिरस्त्वथा
अपामार्गोऽथ पिप्पलः। उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात्। अर्कपालाशादयो यथाक्रमं सूर्यादीनां समिधो भवंति। तास्व

राम
६०

132

आर्द्राः अनुग्राः सत्वचः प्रादेशमात्राः कर्त्तव्याः ॥ किंच ॥ एकैकस्याप्यष्टशतमष्टाविंशतिरेव च होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण
वा युताः । आदित्यानामेकैकस्याष्टशतसंख्याकाः ष्टाविंशतिसंख्याका वा मधुना क्षीरेण दध्ना सर्पिषा वा युता अर्का अर्कादि
समिधो होतव्याः । इदानीं भोजनान्याह । गुडोदनं पायसं च हविष्यं क्षीरषाष्ठिकं । दध्योदनं हविश्चूर्णमांसं चित्रान्नमेव च । दद्या
द्ग्रहक्रमादेतद्द्विजेभ्यो भोजनं बुधः । शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं । गुडमिश्र ओदनो गुडौदनः । पायसं क्षैरेयं ।
हविष्यं मुन्यन्नादि । षष्ठिकं क्षीरमिश्रः षाष्ठिकोदनः । दध्योदनः । दध्ना मिश्र ओदनः । हविर्भूतोदनश्चूर्णं तिलचूर्णमिश्रौद
नः । मांसं मांसमिश्रोदनः चित्रोदनो नानामिश्रोदनः । एतानि गुडोदनादीनि यथाक्रममादित्याद्युद्देशेन भोजनार्थं द्विजेभ्यो
ब्राह्मणेभ्यो दद्यात् । ब्राह्मणसंख्या यथासंभवं वित्तवे इष्टव्या । गुडोदनाद्यलाभे तु यथालाभमोदनादि पादप्रक्षाल्यादि वि
धिपूर्वकं सत्कृत्य सन्मानपुरःसरं दद्यात् । दक्षिणामाह । धेनुः शंखस्तथानड्वाङ्हेवासो यथाक्रमात् । कृष्णा गौरायसं
छाग एता वै दक्षिणाः स्मृताः । धेनुर्दोग्ध्री । शंखः प्रसिद्धः । अनड्वान् शकटवाही वलीवर्द्दः । हेम स्वर्णं । वासः पीतं । हयः
पाडुरः । कृष्णा गौः । आयसं शस्त्रादि । छागः प्रसिद्धः । एता धेन्वादयो यथाक्रममादित्यादिउद्देशेन ब्राह्मणानां दक्षिणा

मि॰आ॰
६९

स्मृताउक्तामयादिति॰।एतच्चसंततवेसमितिअर्सं तवैयथालाभं शक्तितोन्यदेवयात्किं विद्वेयं।शान्तिकामेनाविशेषेणसर्वेग्रहाः
पूजयितव्या इत्युक्तं। तत्र विशेषमाह। यस्य यश्च यदा दुष्टः सतं यत्नेन पूजयेत्। ब्रह्मणैषांवरो दत्तः पूजिताः पूजयिथा यस्यपु
रुषस्य यो ग्रहो यदा दुष्टो दुष्टमादिस्थानोस्थितः स तं ग्रहं तदा यत्नेन विशेषेण पूजयेत्। यस्मादेषां ग्रहाणां ब्रह्मणा पूर्वं वरोद
त्तः पूजितास्संतो यूयमिष्टप्रापणेनारिष्टनिरसनेनच पूजयितारं पूजयिष्यथेति। अविशेषेणातु द्विजानविकल्पशांतिकपौ
ष्टिकादीनि कर्माण्युक्तानि तत्राभिषेकादिगुणयुक्तस्य राज्ञो विशेषेणाधिकार इति दर्शयति। ग्रहाधीना नरेंद्राणां
सिद्धयः पतनानिच। भावाभावौचजगतस्तस्मात्पूज्यतमाः स्मृताः। नरेंद्राणामभिषिक्तक्षत्रियाणां ग्रहाः पूज्यतमाः। अने
नान्येषामपि पूज्या इति गम्यते। उभयत्र कारणमाह। प्राणिनामभ्युदयविनिपाता ग्रहाधीना यस्मात्तस्मादधिकारिभिः
पूज्याः॥ किंच। जगतः स्थावरजंगमात्मकस्य भावाभावौ उत्पत्तिविनाशौ ग्रहाधीनौ। तत्र पद्येते पूजितास्तदा सकाल
उत्पत्तिनिरोधौ भवतः। अन्यथोत्पत्तिसमयेनोत्पादो कालो निरोधश्च जगदीश्वरत्वाच्च नरेंद्राणां तद्योगक्षेमकारिणां
पूज्यतमा ग्रहा इति तेषां विशेषेण शांतिकादिष्वधिकारः। तथा च गौतमेन। राजा सर्वस्येष्टे ब्राह्मणवर्ज्यमिति राजानमधिकृ

राम
६९

त्यवर्णानाश्रमांश्चन्यायतोतिपथेस्खलतस्चैतान्स्वधर्मेस्थापयेत्। इत्यादीइकांश्चिह्नमान्तिक्वापानिचदैवतोत्पातचिंतकाः
प्रब्रूयुस्तान्याद्रियेत। तदधीनमपित्वेकेयोगक्षेमंप्रतिजानत इतिशांतिकपौष्टादिश्चनुष्ठानहेतुमभिधायशांतिकपुण्य
ह्स्वस्त्ययनाभ्युष्यमंगलसंयुक्तास्युदपिकानिविद्विषणसंवननातिचारद्विषद्वृद्धियुक्तानिवशालामोक्षर्यादिति शांति
कानिदर्शितानि   इतिग्रहशांतिप्रकरणम्। साधारणागृहस्थधर्माउक्ताइदानीराज्ञोभिषेकादिगुणयुक्तस्यगृहस्थ
स्यधर्मानाह। महोत्साहः स्थूललक्षः कृतज्ञोवृद्धसेवकः। विनीतः सत्वसंपन्नः कुलीनः सत्यवाक्शुचिः। अदीर्घसूत्रः स्मृ
तिमानक्षुद्रोऽपरुषस्तथा। धार्मिकोऽव्यसनश्चैवप्राज्ञः शूरोरहस्यवित्। स्वरंध्रगोप्तान्वीक्षिक्यांदंडनीत्यांतथैवच। विनीतस्त्व
थवार्त्तायांत्रय्यांचैवनराधिपः ८। पुरुषार्थसाधनकर्मारंभाध्यवसायउत्साहः। महानुत्साहोयस्यासौमहोत्साहः। बहुदेयार्थ
दर्शीस्थूललक्षः परकृतोपकारायकारोनविस्मरतीतिकृतज्ञः। तपोज्ञानादिवृद्धानांसेवकोवृद्धसेवकः। नयेनयुक्तोविनी
तः। विनयशब्देनाविरुद्धः पूर्वोक्तस्मार्तकधर्मकलापउच्यते। तत्संश्रयंप्रपद्येतनाकस्माद्विप्रियेवदेदित्यासोक्षुः। सत्वसं
पन्नः संपदापदोर्हर्षविषादरहितः। मातृतः पितृतश्चाभिजनवान्कुलीनः। सत्यवाक्सत्यवदनशीलः। शुचिर्बाह्याभ्यंतरः

मि॰आ॰
७०

शौचयुक्तः।अवश्यकार्याणांकर्म्मणामारंभेआरब्धानांचसमापनेयोनोविलंबतेसोदीर्घसूत्रः।अवगतार्थाविस्मरणशीलः
स्मृतिमान्।अक्षुद्रः सद्गुणांद्वेषी।अपरुषः परदोषासंकीर्त्तनशीलः।धार्म्मिकोवर्णाश्रमधर्मान्वितः।नविद्यन्तेव्यसनानियस्य
सोव्यसनः।व्यसनानिचाष्टादश यथाहमनुः मृगयाक्षादिवास्वप्नः परिवादः स्त्रियोमदः।तौर्यत्रिकंवृथाट्याचकामजो
दशकोगुणः।पैशून्यंसाहसंद्रोहईर्ष्यासूयार्थदूषणं।वाग्दंडजंचपारुष्यंक्रोधजोपिगुणोष्टकइति।अत्रसप्तकष्टतमानि॥
यथाह पानमक्षाःस्त्रियश्चैवमृगयाचयथाक्रमं।एतत्कष्टतमंविद्याच्चतुष्कंकामजेगुणे।दंडस्यपातनंचैववाक्पारुष्यार्थ
दूषणे।क्रोधजेपिगणेविद्यात्कष्टमेतत्त्रयंसदेति।प्राज्ञोगंभीरार्थावधारणक्षमः।शूरोनिर्भयः।रहस्यविद्गोपनीयार्थगोप
नकुशलः।स्वरंध्रगोप्तास्वस्यसप्तसुराज्यांगेषुयत्परप्रवेशद्वारंशैथिल्यंतत्स्वरंध्रंतस्यगोप्ताआच्छादयिता।आन्वीक्षिक्यामात्मवि
द्यायांदंडनीत्यामर्थयोगक्षेमोपयोगिन्यां।वार्त्तायांकृषिवाणिज्यपशुपालनरूपायांधनोपचयहेतुभूतायांधनोपचयहेतुभू
तायां।त्रय्यांचऋग्यजुःसामाख्यायांचात्मविज्ञोवार्तीरंत्यैश्चलोकतइति।नराधिपोराज्याभिषिक्तःस्यादितिसर्वत्रसंबंधः।एवम
तिविक्रमादिगुणस्यांतरंगान्धर्म्मानभिधायेदानींबहिरंगानाह।समंत्रिणःप्रकुर्वीतप्राज्ञान्मौलान्स्थिरान्शुचीन्।तैःसा

राम
७०

136

द्वैविभूषोद्राज्यं विषेणाय ततः स्वयं। स महोत्साहादिगुणयुक्तो राजा मंत्रिणः प्रकुर्वीत कथंभूतान् प्राज्ञान् हिताहितविवेकक्ष
लान्वंशपरंपरायातान्। स्थिरान्महत्यपि हर्षविषादस्थाने विकाररहितान् शुचीन् धर्मार्थकामोपधाशुद्धान् तैश्च संप्राप्तो
वा कार्याः। यथाह मनुः। मौलान्शास्त्रविदः शूरान्लब्धलक्षान्कुलोद्भवान्। सचिवान्सप्त चाष्टौ वा प्रकुर्वीत सुपरीक्षिता
निति। एवं मंत्रिणः पूर्वं कृत्वा तैः सार्द्धं राज्यं संधिविग्रहादिकार्यं चिंतयेत्। समस्तैर्व्यस्तैर्वा। अनंतरं तेषामभिप्रायं ज्ञात्वा स
कलशास्त्रार्थविचारकुशलेन पुरोहितेनात्मकार्यं विचिंत्य ततः स्वबुद्ध्या कार्यं चिंतयेत्। कीदृशं पुरोहितं कुर्यादित्याह। पु
रोहितं प्रकुर्वीत दैवज्ञमुदितोदितं। दंडनीत्यां च कुशलमथर्वांगिरसे तथा। पुरोहितं च कुर्यादित्याह। पुरोहितं प्रकुर्वी
त दैवज्ञमुदितोदितं। दंडनीत्यां च कुशलमथर्वांगिरसे तथा। पुरोहितं च सर्वेषु दृष्टादृष्टार्थेषु कर्मसु। पुरतो निहितं दान
मानसत्कारैरात्मसंवर्धकं कुर्यात्। कथंभूतं दैवज्ञं ग्रहोत्पाततत्त्वमनादेर्वेदितारं। उदितोदितं विद्याभिजनानुष्ठानादिभिरु
दितैः शास्त्रोक्तैः। उदितं समृद्धं। दंडनीत्यामर्थशास्त्रे च कुशलं। अथर्वांगिरसे च शांत्यादिकर्मणि कुशलं। श्रौतस्मार्तक्रिया
हेतोर्वृणुयादेवर्त्विजः। यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणा ३। श्रौताग्निहोत्रादि स्मार्तोपासनादिक्रियानुष्ठानसिद्ध्य

137

मि॰ आ॰
७२

र्थमृत्विजो वृणुयात्। यज्ञांश्च राजसूयादीन्विविधान्भूरिदक्षिणान्बहुदक्षिणांश्च कुर्यात्। किंच। भोगांश्च दत्वा विप्रेभ्यो वसूनि
विविधानि च। अक्षयोयं निधी राज्ञां यद्विप्रेषूपपादितं। ब्राह्मणेभ्यो भोगान्सुखानि च तत्साधनद्वारेण दद्यात्। वसूनि वसुवर्ण
प्रभृतीनि विविधानि नानाप्रकाराणि दद्यात्। यस्मादेष राज्ञामक्षयो निधिः शेवधिर्यद्ब्राह्मणेभ्यो दीयते। साधारणधर्म
त्वेन दानप्राप्तौ सत्यां राज्ञां दानप्राधान्यप्रतिपादनार्थं पुनर्वचनम्। किंच। अस्कन्नमव्ययं चैव प्रायश्चित्तैरदूषितं। अग्नेः स-
काशाद्विप्राग्नौ हुतं श्रेष्ठमिहोच्यते। अग्नेः सकाशादग्निसाध्याद्भूरिदक्षिणाराजसूयादेरपि विप्राग्नौ हुतं श्रेष्ठमुच्यते।
यत एतदस्कन्नं क्षरणरहितं। अव्ययं पशुहिंसारहितं। प्रायश्चित्तैश्चादूषितं प्रायश्चित्तायासरहितं। वसूनि विप्रेभ्यो दद्यादि-
त्युक्तं। कथा परिपाल्याद्यद्यादित्याह। अलब्धमीहेद्धर्मेण लब्धं यत्नेन पालयेत्। पालितं वर्द्धयेन्नीत्या वृद्धं पात्रेषु निःक्षि-
पेत्। अलब्धलाभार्थं धर्मशास्त्रानुसारेण यतेत। लब्धं तत्परतया रक्षेत्। रक्षितं नीत्या वाणिज्यक्रियया वृद्धिं नयेत्। वृद्धं च पा-
त्रेषु विविधेषु धर्मार्थकामपात्रेषु निःक्षिपेत् दद्यात्। पात्रे निःक्षिप्य किं कुर्यादित्यत आह। दत्वा भूमिं निबंधं वा कृत्वा ले-
ख्यंतु कारयेत्। आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः। यथोक्तविधिना भूमिं दत्वा भुवः सत्वनिवृत्तिं कृत्वा निबंधं वा एकस्य

राम
७२

तांडवंसरकस्यैतावंतोरूपकाएकस्यपर्णभरकस्यैतानिपर्णानीतिवानिबंधंकृत्वालेख्यंतुकारयेत्। किमर्थं। आगामिनः। एष्यं
तोयेभद्राःसाधयोनृपतयोभूपतयस्तेषामनेनदत्तमनेनचप्रतिगृहीतमितिपरिज्ञानायपार्थिवोभूपतिः। अनेननृपतेरेवभू
मिदानेनिबंधदानेवाधिकारोनभगवतेरितिदर्शितं। लेख्यंकारयेदित्युक्तंकथंकारयेदित्याह। पटेवाताम्रपट्टेवास्वमु
द्रोपरिचिह्नितं। अभिलेख्यात्मनोवंश्यानात्मानंचमहीपतिः। प्रतिग्रहपरिमाणंदानच्छेदोपवर्णनं। स्वहस्तकालसंपन्नं
शासनंकारयेत्स्थिरं। कार्पासिकेपटेताम्रफलकेवाआत्मनोवंश्यान्प्रपितामहपितामहपितॄन्। बहुवचनस्यार्थवत्त्वाद्वं
शवीर्यश्रुतादिगुणोपवर्णनपूर्वकमभिलेख्यात्मानंच। चशब्दात्प्रतिग्रहीतारंप्रतिग्रहपरिमाणंदानच्छेदोपवर्णनं
चाभिलिख्यप्रतिगृह्यतेइतिप्रतिग्रहोनिबंधःक्षेत्रंवातस्यरूपकादिपरिमाणंदीयतइतिदानंक्षेत्रादितस्यच्छेदःछिद्यतेऽनेनेति
छेदः। नद्याघाटादोनिवर्तनपरिमाणंचतस्योपवर्णनं। अमुकनद्यादक्षिणतोयंग्रामःक्षेत्रंवापूर्वतोऽमुकग्रामस्यैता
वन्निवर्तनपरिमाणंतल्लेख्यमेव। आघाटस्यनदीनगरवत्मदिरसंचारित्वेनभूमेन्यूनाधिकतावसंभवात्।। तन्निहस्तार्थं।
स्वहस्तेनस्वहस्तलिखितेनमतंमेऽमुकपुत्रस्यदत्तोरिलोखितमित्यनेनसंलवायुक्तंकालेनचद्विविधेनशकनृपातीतसं

वं ५

मि॰आ॰ वत्सररूपेण दानकालेन च चंद्रसूर्योपरागादिना संपन्नं स्वमुद्रया गरुडवाराहादिरूपयोपरिष्टाद्बहिश्चिह्नितमंकितं
७२ स्थिरं दृढं शासनं शिष्यंते भविष्यंतो नृपतयोनेन दानाच्छेदोनुपालनमिति शासनं कारयेन्महीपतिः॥ न भोगप
तिः। संधिविग्रहादिकारिणा केन विलेखनीयं। संधिविग्रहकारी तु भवेद्यस्तस्य लेखकः। स्वयं राज्ञा समादिष्टः स
लिखेद्राजशासनमिति स्मरणात्। दानमात्रे नैव मात्रे दानफलसिद्धेः शासनकारणं तत्रैव भोगाभिवृद्ध्या फलातिश
यार्थं। इदानीं राज्ञो निवासस्थानमाह॥ रम्यं पशव्यमाजीव्यं जांगलं देशमावसेत्। तत्र दुर्गाणि कुर्वीत जनकोशात्मगु
प्तये। रम्यं रमणीयमशोकपंकादिभिः। पशव्यं पशुभ्यो हितं पशुवृद्धिकरं। आजीव्यं कंदमूलफलादि। जांगलं यद्यल्पो
दकतरुपर्वतो देशो जांगलस्तथाप्यत्र संभृतजलतरुपर्वतो देशो जांगलशब्दोभिधीयते। तं देशमावसेदधितिष्ठेत्। तत्र एवंवि
धदेशे जनानां कोशस्य सुवर्णादेरात्मनश्च रक्षार्थं दुर्गं कुर्वीत। यथाह मनुः॥ धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च। नृदुर्गं गि राम
रिदुर्गं वा समाश्रित्य वसेत्पुरमिति॥ किंच तत्र तत्र च निष्णातानध्यक्षान्कुशलाञ्शुचीन्। प्रकुर्यादायकर्मान्तव्ययकर्मसु चोद्य ७२
तान्। तत्र तत्र दुर्गादिषु अध्यक्षान्गोपानधिकारिणः प्रकुर्वीत नियुंजीत। यथाह॥ धर्मकृत्येषु धर्मज्ञानर्थकृत्येषु पंडितान्।

140



स्त्रीषुक्लीबान्नियुंजीतनीचान्नीचेषुकर्मसु। इति किंदृशाःनियामाःअनन्यव्यापाराः। कुशलाः इतस्तच्छ्या। पारवतराश्चत
र्विधोपधाशुद्धाः। आयकर्मसुसुवर्णाद्युत्पत्तिस्थानेषुव्ययकर्मसुसुवर्णादिदानस्थानेषुचोद्यताः। अनलसाःइचशब्दात्मात्
त्वादिगुणयुक्ताः॥ उक्तंच। प्रागल्भ्यमुपधाशुद्धिरप्रमादोऽतिशुक्लता। कार्येषुव्यसनाभावःस्वामिभक्तिश्चयोग्यतेति। नोगां
श्वदद्याद्विशेषोवसूनिविधानिचेतिसामान्येनसुप्रदानमुक्तंमिदानींनृपाणांविक्रमार्जितस्यदानेफलातिशयमाह। नातः
परतरोधर्मोनृपाणांयद्रणार्जितं। विप्रेभ्योदीयतेद्रव्यंप्रजाभ्यश्चाभयंतथा। नास्मादुत्कृष्टतमोधर्मोनृपाणांविद्यतेयद्र
णार्जितं। विप्रेभ्योदीयतेद्रव्यंप्रजाभ्यश्चाभयंतथा। नास्मादुत्कृष्टतमोधर्मोनृपाणांयत्रप्रजाभ्योऽभयदानंरणार्जितंदेयमि
त्युक्तंदृष्ट्वाजनायरणेप्रवृत्तस्यविपत्तिरपिसंभवतीतिचधर्मोनाप्यर्थइतितत्रोपिहन्तिरेवश्रेयसीत्यतआह। यश्चाहवेषुवध्य
तेभूम्यर्थमपराङ्मुखाः। अकूटैरायुधैर्यान्तितेस्वर्गंयोगिनोयथा। येभूम्यर्थमाहवेषुप्रवृत्ताअपराङ्मुखाअतिमुखावध्यंतेमा
र्यंतितेस्वर्गंयांति। योगाभ्यासरतायथा। अकूटैर्यद्यविषदिग्धादितिरायुधैर्येद्वारेभवन्ति। किंच पदातिकेववल्पातिसमे
षुविनिवर्त्तिनां। राजासुकृतमादत्तेहतानांविफलायिनां। सुबलेषुकरितुरगरथपदातिषुभग्नेषुविनिवर्त्तिनां। राजासुकृतमाद

·आ·
७३

न्ते हन्नानां विफलायिनां। ध्वबलेषु करितुरगरथपदातिषु नयेषु विनिवर्त्तिनां परबलातिसुखव्यापिनां यदा निक्षेवठल्यानि श्वश्वमे
धवल्यानि। विपर्यये दोषमाह। विपलायिनां पराङ्मुखानां राजासुतान्मापद्वे। अपिच। तवाहंवादिनं क्लीबं निर्हेतिं परसंगतं। नहन्या
द्विनिवृत्तंच युद्धप्रेक्षणकादिकं। तवाहमितियोवदति तं क्लीबं नपुंसकं निर्हेति निरायुधं परसंगमन्येन सहयुध्यमानं विनिवृत्तं नयु
द्धप्रेक्षणकादिकं। तवाहमिति कृ योवदति तं क्लीबं नपुंसकं निर्हेति निरायुधं परसंगमन्येन सहयुध्यमानं विनिवृत्तं युद्धाभिवृत्तं। युद्ध
प्रेक्षणको युद्धदर्शी। तं न हन्यादिति सर्वत्र संबंधः। आदिग्रहणाद्धस्त्यश्वसारथ्यादीनां ग्रहणं। यथा गौतमः॥ नदोषो हिंसायामाह॥
वे अन्यत्रव्यश्वसारथ्यनायुधकृतांजलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षारूढदूतगोब्राह्मणवादिभ्य इति। तथा शंखोप्याह॥ न
पानीयं पिबंतं न भुंजानं नोपानहौ मुंचंतं नावर्माणं नस्त्रियं न करेणुं न वाजिनं। न सारथिं न सूतं न दूतं न ब्राह्मणं न राजानं। अराजाह
न्यादिति। कृतरक्षः समुत्थाय पश्येदायव्ययौ स्वयं। व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुंजीत कामतः। कृतरक्षः पुरस्तात्मनश्च रक्षां विधाय
प्रतिदिनं प्रातःकाले उत्थाय आयव्ययमेवायव्ययौ पश्येत्ततो व्यवहारा३। दृष्ट्वा मध्याह्नकाले स्नात्वा कामतो यथारुचि भुंजीत। हिरण्यं व्या
पत्नानीतं भांडागारादिषु गारेषु निःक्षिपेत्। पश्येच्चारं स्ततो दूतान्प्रेषयेन्मंत्रिसंयुतः। तदनंतरं हिरण्यादिकं व्याप्तैर्हिरण्याद्यान

राम
७३

142

यन नियुक्तैरानीतं स्वयमेव निरीक्ष्य भांडागारे निःक्षिपेत्। ततश्चारांश्च कालस्वभ्यागतान् पश्येत्। ये परराज्येष्वज्ञातान्यरिस्तानाय परिज्ञा
जकतापसादिरूपेणापूर्ष्यचारिणः। शेषितांस्तांश्च रहस्यामेकांते निवेशयेत्। तदनंतरं दूतांश्च पश्येत्। दूताश्च पेषकस्मैव राज्यांतरं प्रतिग
तागतमाचरन्ति। ते च त्रिविधाः। निसृष्टार्थाः संदिष्टार्थाः शासनहस्ताश्चेति। तत्र निसृष्टार्था राजकार्याणि देशकालोचितानि स्वयमे
व कल्पयितुं क्षमाः। उक्तमात्रं परस्मै निवेदयन्ति ते संदिष्टार्थाः। शासनहस्तास्तु राजलेखहारिणः। तान्पूर्वप्रेषितानागतानन्मे
त्रिसंगतः पश्येत्। श्रुत्वा तद्वार्तामाकल्प्य पुनः प्रेषयेत्। ततः स्वैरविहारी स्यान्मंत्रिभिर्विसमागतः। बलानां दर्शनं कृत्वा सेना
न्या सह चिंतयेत्। तदनंतरं ततः पराह्णे स्वैरं यथेष्टमेवैकांतः सुरविहारी स्यान्मंत्रिभिर्विसमागतविश्वासिभिः कलाकुशलैः परिहास
वेदिभिः परिवृतः स्त्रीभिश्च रूपयौवनवैदग्ध्यशालिनीभिः। सूक्तिमाधु विहरेच्चैव स्त्रीभिरंतःपुरे सह। विहृत्य च यथाकामं पुनः का
र्याणि चिंतयेदिति मन्वनुस्मरणात्। ततो विशिष्टैर्वस्त्रालंकारैर्विलेपनकुसुमाद्यैरलंकृतो हस्त्यश्वरथपदातिबलानि दृष्ट्वा सेना
न्या सेनापतिना सह तद्रक्षणादेशकालोचितं चिंतयेत्। संध्यामुपास्य शृणुयाच्चाराणां गूढचेष्टितं। गीतनृत्यैश्च भुंजीत पठेत्स्वाध्या
यमेव च। ततः सायंकाले संध्यामुपास्य सामान्येन प्राप्तस्यापि पुनर्वचनं कार्यगौरवत्वाद्विस्मरणार्थमनंतरं च पेसूर्व दृष्टाः का

143

मि॰श्रा॰
७४

चित्स्थाने निवेशितास्तेषां चाराणां गूढनाषितमंतर्वेश्म निराश्रपाणिः श्रृणुयात्। उत्थाय। संध्यां चोपास्य श्रृणुयादंतर्वेश्मनि
शस्त्रभृत्। रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितमिति। ततोन्त्यगीवादित्रैः किंचित्कालं क्रीडित्वा कक्षांतरं प्रविश्य संजी
त। गत्वा कक्षांतरं स्वप्यात् समनुज्ञाप्य तं जनं। प्रविशेद्भोजनार्थं तु स्त्रीभिरंतःपुरं सहेति। ततो विस्मरणार्थं यथाशक्ति स्वाध्यायं प
ठेत्। संविशेत्तूर्यघोषेण प्रतिबुध्येत तथैव च। शास्त्राणि चिंतयेद्बुद्ध्या सर्वकर्तव्यतां तथा। तदनंतरं तूर्य शंखादि शब्दैः संविशेत्
प्यात्। तथैव तूर्यघोषेण प्रतिबुध्येत प्रतिबुध्य च शास्त्रविद्भिर्विश्वासितैः सह एकाकी वा पश्चिमे यामे शास्त्राणि चिंतयेत्। स
र्वकर्तव्यतां च सर्वकार्याणि च। एतत्स्वस्थं प्रत्युच्यते। अस्वस्थः पुनः सर्वकार्येषु अन्यं नियोजयेत्। यथाह एतद्वृत्तं समा
तिष्ठेदरोगः पृथिवीपतिः। अस्वस्थः पुनः सर्वकार्येषु अन्यं नियोजयेत् मंत्रं तु मंत्रिमुख्ये नियोजयेदिति। प्रेषयेच्च ततश्चारा
न्स्वेषु चान्येषु चादरात्। ऋत्विक्पुरोहिताचार्यैराशीर्भिरभिनंदितः। दृष्ट्वा ज्योतिर्विदो वैद्यान् दद्याद्गां कांचनं महीं। नैवे
शिकानि च तथा श्रोत्रियाणां गृहाणि च। अनंतरं च तत्रस्थ एव विश्वासिनश्चारान् दानमानसत्कारैः पूजितान् स्वेषु सामंता
टविकादिषु अन्येषु च महीपतिषु प्रेषयेत् तत्रत्यचिकीर्षितज्ञानाय। ततः प्रातः संध्यामुपास्याग्निहोत्रं हुत्वा पुरोहितर्त्वि

७४

चार्यादिभिराशीर्भिरभिनंदितो ज्योतिर्विदो दृष्ट्वा तेभ्यश्च ग्रहादिस्थितिं विदित्वा शांतिकादीनि च पुरोहितायादिश्येवं वैद्यांश्च दृष्ट्वा तेभ्यश्च स्वशरीरस्थितिं निवेद्य प्रतिविधानं चादिश्य गां दोग्ध्रीं कांचनं महीं निवेशिकानि विवाहोपयोगीनि कन्यालंकारादीनि गृहाणि च सुधाधवलितादीनि श्रोत्रियेभ्यो ब्राह्मणेभ्यः अधीतवेदेभ्यो दद्यादिति प्रत्येकं संबध्यते॥ किंच। ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनोऽरिषु। स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता। ब्राह्मणेष्वधिक्षिपत्स्वपि क्षमी क्षमावान्। स्निग्धेषु स्नेहवत्सु मित्रादिष्वजिह्मः अवक्रः। अरिषु क्रोधनः। भृत्यवर्गेषु प्रजासु च हिताचरणेनाहितनिवर्तनेन च पितेव दयावान्। स्यादिति प्रत्येकं संबध्यते। पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन्। सर्वदानाधिकं यस्मात्प्रजानां परिपालनं। यस्मान्न्यायेन धर्मशास्त्रोक्तेन मार्गेण प्रजाः परिपालयन् परिपालितप्रजोपचितपुण्यात् षड्भागं षष्ठं भागमादत्ते। यस्माच्च सर्वेभ्यो भूम्यादिभ्यो दानेभ्यः प्रजानां पालनमधिकफलं। तस्मात्प्रजासु च यथा पिता तथैव स्यादिति गतेन संबंधः॥

॥चाटतस्करदुर्वृत्तमहासाहसिकादिभिः। पीड्यमानाः प्रजा रक्षेत्कायस्थैश्च विशेषतः। चाटाः प्रतारकाः विश्वास्य ये परधनमपहरंति। प्रच्छन्नापहारिणस्तस्कराः। दुर्वृत्ता ऐंद्रजालिककितवादयः। सहो बलेन सहसा बलेन कृतं साहसं महच्च तत्साहसं च महासाहसं तेन वर्तंत इति महासाहसिकाः। प्रस

मि०आ०
७५

स्वापहारिणः।आदिशब्दान्मौलिककुहकप्रभृतयः।एतैःपीड्यमानाःप्रजारक्षेत्॥कायस्थालेखकागणकाश्चतैःपीड्यमानावि
शेषतोरक्षेत्तेषांराजवल्लभतयाऽतिमायावितयाचदुर्निवारत्वात्॥अरक्ष्यमाणाःकुर्वंतियत्किंचित्किल्बिषंप्रजाः॥तस्मात्तु
नृपतेरर्द्धंयस्माद्गृह्णात्यसौकरान्॥अरक्ष्यमाणाःप्रजाःयत्किंचित्किल्बिषंचौर्यपरदारगमनादिकंकुर्वंति।तस्मात्पापा
८ दर्द्धंनृपतेर्भवति।यस्मासौराजारक्षणार्थंप्रजाभ्यःकरान्गृह्णाति।येराष्ट्राधिकृतास्तेषांचारैर्ज्ञात्वाविचेष्टितं।साधून्
संमानयेद्राजाविपरीतांश्चघातयेत्।उत्कोचजीविनोद्रव्यहीनान्कृत्वाविवासयेत्।सद्दानमानसत्कारान्श्रोत्रि
यान्वासयेत्सदा।राष्ट्रेराज्ञाअधिकारेषुयेनियुक्तास्तेषांविचेष्टितंचरितंचारैरुक्तलक्षणैःसम्यग्ज्ञात्वासाधून्सच्च
रितान्संमानयेत्।दानमानसत्कारैःपूजयेत्।विपरीतान्दुश्चरित्रान्सम्यग्विदित्वाघातयेत्।अपराधानुसारे रा ७
ण।येपुनरुत्कोचजीविनस्तान्द्रव्यरहितान्कृत्वास्वराष्ट्रात्निःप्रवासयेत्।श्रोत्रियान्दानमानसत्कारैःस
हितान्कृत्वास्वराष्ट्रेसदैववासयेत्॥अन्यायेननृपोराष्ट्रात्स्वकोशंयोभिवर्द्धयेत्।सोऽचिराद्विगतश्रीकोनाशमे
तिसबांधवः।योसौराजास्वराष्ट्रादन्यायेनधनमादायस्वकोशंवर्द्धयति।सोऽचिराच्छीघ्रमेवविगतश्रीकोविगतलक्ष्मी
कोबंधुभिःसहविनाशंप्राप्नोति॥प्रजापीडनसंतापात्समुद्भूतोहुताशनः।राज्ञःश्रियंकुलंप्राणान्नादग्ध्वाविनिवर्त्तते।
प्रजानांतस्करादिपीडातोयःसंतापःतस्मात्समुद्भूतोहुताशनइवसंतापकारित्वादपुण्यराशिर्हुताशनशब्देनोच्यते।

सराज्ञःश्रियंकुलंप्राणांश्चारंधानाशमनीत्वाननिवर्त्ततेनोपशाम्यति॥ यएवंनृपतेर्द्धर्मःस्वराष्ट्रपरिपालने। तमेवकृत्स्नमाप्नो
तिपरराष्ट्रंवशंनयन्। न्यायतःस्वराष्ट्रस्यपरिपालनेराज्ञोयोधर्मस्तंसकलंवक्ष्यमाणेन्यायेनपरराष्ट्रंवशंनयन्नात्मसात्कु
र्वन्नाप्नोति। धर्मषड्भागंच॥ किंतु। यस्मिन्देशेयआचारोव्यवहारःकुलस्थितिः। तथैवपरिपाल्योसौपदावशमुपागतः। यदा
परदेशोवशमुपागतस्तदानस्वदेशधर्मसंकरःकार्यः। किंतु। यस्मिन्देशेयआचारःकुलस्थितिर्व्यवहारोवायथैवप्रागासी
त्तथैवासौपरिपालनीयोयदिशास्त्राविरुद्धोनभवति॥ यदावशमुपगतइत्यनेनवशोपगमनात्प्रागनियमइतिदर्शितं॥ य
थोक्तं॥ उपरुध्यारिमासीतराष्ट्रंचास्योपपीडयेत्॥ दूषयेच्चास्यसततंयवसान्नोदकेंधनमिति॥ मंत्रमूलंयतोराज्यमतोमंत्रं
सुरक्षितं॥ कुर्याद्यथास्यनविदुःकर्मणामाफलोदयात्॥ यस्मात्तैर्मंत्रिभिःसार्द्धंचिंतयेद्राज्यमित्याद्युक्तंमंत्रमूलंराज्यंत
स्मान्मंत्रंयत्नेनतथासुरक्षितंकुर्याद्यथास्यराज्ञःकर्मणांसंधिविग्रहादीनामाफलोदयात्फलनिष्पत्तेःप्रागन्येमंत्रंनजानं
ति॥ किंच॥ अरिर्मित्रमुदासीनोनंतरस्तत्परःपरः॥ क्रमशोमंडलंचिंत्यंसामादिभिरुपक्रमैः॥ अरिः। शत्रुः मित्रं। सुहृत्।
उभयविलक्षणउदासीनस्तेवृत्त्रयःत्रिविधाः। सहजाःकृत्रिमाःप्राकृताश्चेति। तत्रासहजोऽरिःसापत्नपितृव्यस्तत्पुत्रा
दिः। कृत्रिमोऽरिर्यस्यापकृतं। येनवापकृतं। प्राकृतस्त्वनंतरदेशाधिपतिः। सहजंमित्रंभागिनेयपैतृष्वस्रेयमातृष्वस्रे
यादि। कृत्रिमंमित्रंयेनोपकृतंयस्यवोपकृतंवा। प्राकृतंमित्रमेकांतरितदेशाधिपतिः। सहजकृत्रिमशत्रुमित्रलक्षण

मि॰आ॰
७६

राहितोसहजकृत्रिमोदासीनौंप्राकृतोदासीनोऽनंतरदेशाधिपतिः।अरिःपुनश्चतुर्विधःयातव्योछेत्तव्यपीडनीयकर्श
नीयभेदेन।तत्रयातव्योऽनंतरभूमिपतिःव्यसनीहीनबलोविरक्तप्रकृतिः॥विदुर्गोमित्रहीनोदुर्बलश्चोछेत्तव्यः।पीड
नीयः।मंत्रबलविहीनः।प्रबलःमंत्रबलयुक्तःकर्शनीयः।निर्मूलनाशमुच्छेदंपीडनंबलनिग्रहः।कर्शनंतुपुनःप्राऊःको
शादुपकर्षणादिति।मित्रंचद्विविधं।बृंहणीयांकर्शनीयमिति।कोशबलविहीनंबृंहणीयं।कोशबलाधिकंकर्शनीयं।अ
नंतरस्तत्परःपरइति।प्राकृतारिमित्रोदासीनानाह।अनंतरःप्राकृतोरिस्तत्परःप्राकृतंमित्रं।तस्मात्परःप्राकृतउदा
सीनः।शेषाःपुनःप्रसिद्धत्वान्नोक्ताः।एतद्राजमंडलंक्रमतःपूर्वादिक्रमेणचिंत्यं।तेषांचेष्टितंज्ञातव्यं।ज्ञात्वाचसामादि
भिरुपायैर्वक्ष्यमाणैरनुसंधेयं।एवंपुरतःपृष्ठतःपार्श्वेलक्ष्येत्रयस्त्रयआत्मान्चैकइतित्रयोदशराजकमिदंराजमंड
लंप्रप्राकारं।पार्ष्णिग्राहाक्रंदासारादयस्त्वरिमित्रोदासीनेष्वेवांतर्भवंतीतिसंज्ञाभेदमात्रंग्रंथांतरेदर्शितमितियो
गीश्वरेणनपृथगुक्ताः।सामादिभिरुपक्रमेरित्युक्तमिदानींतानुपायानाह।उपायाःसामदानंचभेदोदंडस्त
थैवच।सम्यक्प्रयुक्ताःसिद्ध्येयुर्दंडस्त्वगतिकागतिः।सामप्रियभाषणं।दानंस्वर्णादेः।भेदोभेदनंतत्सामंतादीनां
परस्परतोवैरस्योत्पादनेन।दंडउपांशुप्रकाशाभ्यांधनापहारादिर्वधपर्यंतोऽपकारः।एतेसामादयःपरिपंथ्यादिसा
धनोपायाः।एतेचदेशकालाद्यनुसारेणसम्यक्प्रयुक्ताःसिध्येयुस्तेषांमध्येदंडस्त्वगतिकागतिः।उपायांतरसंभवेन

रा ७

147

प्रयोक्तव्यः॥एतच्चपीडनायकर्षणीयामित्राभिप्रायेणयतव्योच्छेत्तव्ययोस्तुदंडमुख्यः॥एतेचसामाद्योनकेव
लंराजव्यवहारविषयाः॥अपितुसकललोकविषयाः॥यथाअधीशपुत्रकाअधीशदास्यामितत्वमादकान्
यद्वाअन्यस्मैप्रदास्याकर्णमुत्पाटयामितइति॥किंच॥संधिंचविग्रहंयानमासनंसंश्रयंतथा॥द्वैधीभावंगु
णानेतान्यथावत्परिपालयेत्॥संधिर्व्यवस्थाकरणं॥विग्रहोपकारः॥यानंपरंप्रतियात्रा॥आसनमुपेक्षा॥
संश्रयोबलवदाश्रयणं॥द्वैधीभावःस्वबलस्यद्विधाकरणं॥एतान्संधिप्रभृतीन्गुणान्यथावद्देशाकालज्ञा
त्वाक्तिमित्रादिविशेनकल्पयेत्॥यानकालमाह॥यदासस्वगुणोपेतंपरराष्ट्रंतदाव्रजेत्॥परश्चहीनआत्मा
चदुष्टवाहनपूरुषः॥यदापरराष्ट्रंसस्यैर्व्रीस्यादितिर्गुणैश्चसमजनैरिंधनतृणादितिरुपेतंसंपन्नं॥श
त्रुश्चहीनोबलादितिरात्माचदूष्टवान्पुरुषःवाहनानिहस्त्यश्वादीनिपुरुषाश्चवाहनपूरुषादुष्टावाहन
पुरुषायस्यसतथोक्तः॥तदापरराष्ट्रमात्मसात्कर्तुंव्रजेत्॥प्राणिनामभ्युदयाविनिपातानांदैवायत्त
त्वाद्यदिदैवमस्तितदास्वयमेवपरराष्ट्रादिवशीभविष्यत्यथनास्तितर्हितेनापिपौरुषेनभविष्यसतोव्य

मि॰आ॰

७७ थएवायंयात्राप्रयासइत्यतआह॥दैवेपुरुषकारेच्चकर्मसिद्धिर्व्यवस्थिता॥तत्रदैवमलिव्यक्तंपौरुषंपौर्ध
देहिकं॥कर्मसिद्धिःफलप्राप्तिरिष्टानिष्टलक्षणा॥सानकेवलंदैव्येवैवस्थिताअपितुपुरुषकारेपि॥लोके
वैय तथादर्शनात्॥चिकित्सादिशास्त्रसामर्थ्याच्च॥अपिच॥पुरुकाराभावेदैवमपिनास्तित्याह॥तत्रदैवमिति॥यतः
पूर्वदेहोपार्जितंपौरुषमेवदैवमुच्यते॥अल्पपुरुषकारानन्तरंमहाफलोदयातिचेत्॥तस्मात्पुरुषकारा
भावेनदैवमस्तीतिपुरुषकारेयत्नोविधातव्यः॥इदानींमतान्तराण्याह॥केचिद्दैवात्स्वभावाच्चकालात्पुरु
षकारतः॥केचिदिष्टानिष्टलक्षणंफलंदैवादेवेच्छन्ति॥केचित्स्वभावात्स्वयमेवभवति॥नकारणमपेक्ष ७८
तइति॥केचित्कालात्केचित्पुरुषकारतएवेति॥स्वमतमाह॥संयोगेकेचिदिच्छन्तिफलंकुशलबुद्धयः॥
दैवादीनांसंयोगेसमुच्चयेफलंभवतीति॥कुशलबुद्धयोमन्वादयोमन्यन्ते॥एकस्मात्फलंनभवतीत्य
त्रदृष्टान्तमाह॥यथाह्येकेनचक्रेणरथस्यनगतिर्भवेत्॥एवंपुरुषकारेणविनादैवंनसिध्यति॥नात्राति
रोहितमस्ति॥लाभायपरराष्ट्रंगन्तव्यमित्युक्तं॥लाभस्त्रिविधः॥हिरण्यलाभोभूमिलाभोमित्रलाभश्चेति॥

तेषुमित्रलाभोज्यायाननतरत्तस्माद्युपायेयत्नोविधातव्यः॥तस्माद्युपायश्चसत्यवचामित्याह॥हिर
ण्यभूमिलाभेभ्योमित्रलाभोवरोयतः॥अतोयतेततत्प्राप्त्यैरक्षेत्सत्यंसमाहितः॥यस्माद्धिरण्यभू
म्यादिलाभेभ्योमित्रलब्धिर्वराउत्तमातस्मात्तत्प्राप्त्यैयतेतयत्नंकुर्यात्तुसमाहितिः॥यस्माद्धिसत्यं
रक्षेत्समाहितःसावधानः॥सत्यमूलत्वान्मित्रलाभस्य॥इदानींराज्यांगान्याह॥स्वाम्यमात्या
जनोदुर्गंकोशोदंडस्तथैवच॥मित्राण्येताःप्रकृतयोराज्यंसमांगमुच्यते॥महोत्साहइत्यादिकृत्स्नलक्ष
णोमहीपतिःस्वामी॥अमात्यामंत्रिपुरोहितादयः॥जनोब्राह्मणादिप्रजाः॥दुर्गंधन्वदुर्गादि॥को
शःसुवर्णादिद्रव्यराशिः॥दंडोहस्त्यश्वपत्तिलक्षणंचतुरंगंबलं॥मित्राणिसहजाकृत्रिमप्राकृता
नि॥एताःस्वाम्याद्याराज्यस्यप्रकृतयोमूलकारणानि॥एवंराज्यंसप्तांगमुच्यते॥तदवाप्यनृपो
दंडंदुर्वृत्तेषुनिपातयेत्॥धर्मोहिदंडोनृपेणब्रह्मणानिर्मितःपुरातदेवंविविधंराज्यंप्राप्यदुर्वृत्तेषुवं
चकशठधूर्तपरदारपरद्रव्यापहारिहिंसकादिषुनृपोदंडंपातयेत्॥हियस्माद्धर्मएवदंडोनृपेण
पूर्वंब्रह्मणानिर्मितोऽस्यचदंडइतियौगिकीसंज्ञा॥दंडोदमनादित्याहुस्तेनादांतान्दमयेत्यादिगो

150

मि०आ० तमवचनात्॥सनेतुंन्यायतोशक्योलुब्धेनाकृतबुद्धिना॥सपूर्वोक्तोदंडोलुब्धेनकृपणेनअकृतबु
७८ नांचचलबुद्धिनान्यायतोन्यायानुसारेणनेतुंप्रयोक्तुंशक्योनभवति॥कीदृशेनतर्हिशक्यइत्याह॥
सत्यसंधेनशुचिनासुसहायेनधीमता॥सत्यसंधेनाप्रहारकेणशुचिनाजितारिषड्वर्गेणसुसहाये
नपूर्वोक्तसाहायसहितेनधीमज्ञानयापनपकुशलेनसदंडोन्यायतोधर्मानुसारेणनेतुंशक्यः॥य
यथाच्छास्त्रंप्रयुक्तःससदेवासुरमानवंजगदानंदयेत्सर्वमन्यथातत्प्रकोपयेत्॥सदंडःशास्त्रो
क्तमार्गेणप्रयुज्यमानःसन्देवासुरमानवैःसहितमिदंसर्वंजगदानंदयेत्हर्षयेत्॥अन्यथा ७०
शास्त्रातिक्रमेणप्रयुक्तश्चेज्जगत्प्रकोपयेत्॥नकेवलमधर्मदंडोनेजगत्प्रकोपयेपितुप्रयोक्तुर्दृश
दृष्टहानिरपिस्यात्॥अधर्मदंडेनस्वर्गकीर्त्तिलोकविनाशनं॥सम्यक्तुदंडेनराज्ञांस्वर्गकीर्त्ति
जयावहं॥यःपुनःशास्त्रातिक्रमेणलोभादिनादंडःकृतसपापहेतुस्यात्स्वर्गकीर्त्तिलोकंश्च
विनाशयति॥शास्त्रोक्तमार्गेणतुकृतःस्वर्गकीर्त्तिजयानांहेतुर्भवति॥अपिभ्रातासुतोऽ

र्घ्यो वा श्वशुरो मातुलोऽपि वा ॥ नादंड्यो नाम राज्ञोऽस्ति धर्माद्विचलितः स्वकात् ॥ अर्घ्योऽर्घार्ह आचार्यादिः ॥ शेषं प्रसिद्धं ॥ एते भ्रातृसुतप्रभृतयोऽपि स्वधर्माच्चलिताद्दंड्याः ॥ किमुतान्ये ॥ यतः स्वधर्माच्चलितोऽदंड्यो नाम राज्ञः कोऽपि नास्ति ॥ एतच्च मातापित्रादिव्यतिरेकेण ॥ तथा वक्ष्यत्यनंतरं ॥ अदंड्या मातापितरौ स्नातकपुरोहितपरिव्राजकवानप्रस्थाः श्रुतशीलशौचाचारवंतस्ते हि धर्माधिकारिण इति ॥ किंच ॥ योऽदंड्यान्दंडयेद्राजा सम्यग्वध्यांश्च घातयेत् ॥ इष्टं स्यात्क्रतुभिस्तेन समाप्तवरदक्षिणैः ॥ यस्तु राजा दंड्यान् स्वधर्माच्चलनादिना दंडयोग्यांस्तान् सम्यक् शास्त्रदृष्टमार्गेण धिग्वचनदंडादिना दंडयति ॥ वध्यान् वधार्हान् घातयति ॥ तेन राज्ञा भूरिदक्षिणैः क्रतुभिरिष्टं भवति ॥ बहुदक्षिणक्रतुफलं प्राप्नोतीत्यर्थः ॥ न च प्र[illegible]लोभवशाद्दंडप्रणयनं काम्यमिति मंतव्यं अन्यकरणे प्रायश्चित्तस्मरणात् ॥ यथाह वसिष्ठः ॥ दंड्योत्सर्गेण राजैकरात्रमुपवसेत् त्रिरात्रं पुरोहितः ॥ कृच्छ्रमदंड्यदंडने पुरोहितस्त्रिरात्रं राजेति ॥ दुष्टे सम्यग्दंडः प्रयोक्तव्य इत्युक्तं दुष्टपरिज्ञानं च व्यवहारदर्शनमंतरेण न भवतीति तत्परिज्ञानाय व्यवहारदर्शनमहरहः स्वयमेव कर्तव्यमित्याह ॥ इति संचिंत्य नृपतिः क्रतुतुल्यफलं पृथक् ॥ व्यवहारान्स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहं ॥ एवमुक्तेन प्रकारेण क्रतुतुल्यफलं दंड्यदंडेन स्वर्गादिनाशं चादंड्यदंडेन सम्यग्विविच्य स पृथक् पृ

आ।०

थरूवर्णादिक्रमेण सभ्यैर्वक्ष्यमाणलक्षणैः परिवृत्तः प्रतिदिनं व्यवहारानुवक्ष्यमाणमार्गेण दुष्टादुष्टपरि
७१ ज्ञानार्थं राजा स्वयं पश्येत्॥ कुलानि जातीः श्रेणीश्च गणान् जानपदानपि॥ स्वधर्माच्चलितान् राजावि
नीय स्थापयेत्पथि॥ कुलानि ब्राह्मणादीनां जातयो मूर्द्धावसिक्तप्रभृतयः श्रेणयस्ताम्बूलिकादीनां॥
गणाहेडाबुकादीनां जानपदाः कारुकादयः॥ एतान् स्वधर्माच्चलितान् सच्छलान् राजा विनीय यथापराध
दण्डयित्वा पथि स्वधर्मे स्थापयेत्॥ दण्डं दुर्वृत्तेषु निपातयेदित्युक्तं॥ स च दण्डो द्विविधः शारीरोऽर्थदण्डश्चेति॥
थोयेह नारदः॥ शारीरश्चार्थदण्डश्च दण्डस्तु द्विविधः स्मृतः॥ शारीरस्ताडनादिस्तु मरणान्तः प्रकीर्तितः॥ का ७१
किन्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव नीति॥ द्विविधोऽप्यपराधानुसारेणानेकधा भवति॥ आह स च शारीरो दशधा
प्रोक्तो ह्यर्थदण्डस्त्वनेकधा इति॥ तत्र स्थूलमाषसुवर्णपलादिद्रव्यैरर्थदण्डो वक्तव्यस्तच्च प्रतिदिशति तत्र परिमाणार्था
उस्यैकस्मिन्नेवापराधेऽपि देशभेदेन न्यूनाधिकदण्डो मा भूदिति ताम्ररूप्यादिशब्दानां नियतपरिमाणविषयत्वे दण्डव्यव
हारं दर्शयितुमाह॥ जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतं॥ तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते॥ गौर
स्तु ते त्रयः॥ षट् ते यवो मध्यस्तु ते त्रयः॥ कृष्णलः पञ्च ते माषस्ते सुवर्णस्तु षोडश॥ पलं सुवर्णाश्चत्वारः पञ्च वापि
प्रकीर्तितं जालकान्तरप्रविष्टादित्यरश्मिभासितं यद्रजस्तत्र सरेणुरित्युक्तं योगीश्वरादिभिस्तच्च दर्शितः॥ ते त्रस

रेणवोऽष्टौ लिक्षाद्जयूकाउं। तिस्रो लिक्ष्या राजसर्षपो राजिते राजसर्षपास्त्रयो गौरसर्षपः सिद्धार्थ इति गौरसर्षपाः षट् यवो मध्यमो मध्यमो न स्थूलो न सूक्ष्मः। एतेन गौरसर्षपा अपि मध्यमा इति गम्यते। तथा राजसर्षपा अपि मध्यशब्दादेव सर्षपादिशब्दा न केवलमुन्मानवचनाः किं तु तदुन्मितद्रव्यवचना इति गम्यते। यथा प्रस्थपरिमिता यवाः प्रस्था उच्यन्ते।। एवं सर्षपाद्युन्मितं द्रव्यं सर्षपादिशब्दैरिति सर्षपादिशब्दानां केवलोन्मानवचने चेत्त्रसरेणुपसदृशोन्मानात्तु मशक्यमभूतद्वारेण स्थूलत्वादिव्यवहारो न स्यात् त्रसरेणुस्थूलस्थूलतरस्थूलतमसूक्ष्मसूक्ष्मतरसूक्ष्मतममध्यमसर्षपाद्युन्मानत्वेन प्रतिदेशं व्यवहारस्थले देशस्थितं द्रव्यं व्यवहारमध्यम इति नियम्यते। ते च मध्यमा यवास्त्रय एकः कृष्णलस्ते कृष्णलाः पंचैको माषस्ते माषाः षोडशैकः सुवर्णः सुवर्णाश्चत्वारः पलं। पंच वापि पलं प्रकल्पितं नारदादिभिः। तत्र स्थूलैस्त्रिभिर्यवैः कृष्णलपरिकल्पनायां व्यावहारिकनिष्कस्य षोडशांशः कृष्णलो भवति। तैः पंचभिर्माषो माषैः षोडशभिः सुवर्णः।। स च व्यावहारिकैः पंचभिर्निष्कैरेकः सुवर्णो भवति। ते च चत्वारः पलमिति।। निष्काणां विंशतिः पलं।। यदा तु सूक्ष्मैर्यवैस्त्रिभिः कृष्णलः परिकल्प्यते। तदा व्यावहारिकनिष्कस्य द्वात्रिंशत्तमो भागः कृष्णलपरिकल्पनायां तदा निष्कस्य विंशतितमो भागः कृष्णलः।। सुवर्णश्चतुर्भिर्निष्कैः षोडशभिर्निष्कैः पलं।। पंचसुवर्णं वै पलमिति पक्षे विंशतिनिष्कं पलं।। एवमन्यदपि निष्कस्य

०अ।०

० चत्वारिंशो भागः कलुलो द्विनिष्कः सुवर्णोश्च निष्कं पलमित्यादि लोकव्यवहारानुसारेणास्मादेव सूत्रादूहनीयं॥ ॥एवं सु
वर्णस्योन्मानं प्रतिपाद्येदानीं रजतस्याह॥ द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते। शतमानं तु दशभिर्धरणैः पलमेव च।
निष्कः सुवर्णाश्चत्वारः॥ द्वे कृष्णले पूर्वोक्ते रूप्यमाषो रूप्यसंबन्धी माषः ते रूप्यमाषाः षोडश धरणं पुराणं च तस्यैव सं
ज्ञान्तरं ते षोडश स्याद्धरणं पुराणश्चापि राजत इति मनुस्मरणात्॥ दशभिर्धरणैः शतमानं पलमिति चाभिधीयते॥
पूर्वोक्तश्च भारः सुवर्णः एको राजतो निष्को भवति॥ इदानीं ताम्रस्योन्मानमाह॥ कार्षिकस्ताम्रिकः पणः॥ ८०
पलस्य चतुर्थो भागः भागः कर्ष इति लोकप्रसिद्धः। कर्षेणोन्मितः कार्षिकः॥ ताम्रस्य विकारस्ताम्रिकः॥ कर्षसंमि
तस्ताम्रस्य विकारः पणसंज्ञो भवति॥ कार्षापणसंज्ञश्च। कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पण इति मनुवचनात्॥
पंचसुवर्णपल पक्षे विंशति माषः पणो भवति॥ तथा सति माषो विंशतितमो भागः पणस्य परिकीर्तितः॥ इत्यादिव्य
वहारः सिद्धो भवति॥ चतुःसुवर्णपलपक्षे तु॥ षोडश माषः पणो भवति॥ अस्मिंश्च पक्षे सुवर्णपणकार्षापणश
दानां समानार्थत्वेपि पणकार्षापणशब्दौ ताम्रविषयावेव॥ एवं तावद्धेमरूप्यताम्राणामुन्मानमुक्तं दउ व्यवहारोप

योगिलास्कांस्यरीतिकादीनामपिलोकव्यवहारांगभूतातामेवोन्मानं द्रष्टव्यं ।। स्वाशास्त्रपरिभाषामाह ।। साशीतिः पुण
साहस्रो दंडउत्तमसाहसः ।। तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृतः पणानां सहस्रं पुणसहस्रं तत्परिमाणम
स्येति पणसाहस्रः ।। अशीत्या सह वर्त्तत इति साशीतिः अशीत्यधिकपुणसहस्रपरिमितो यो दंडः स उत्तमसाह
ससंज्ञो वेदितव्यः ।। तदर्द्धं मध्यमस्तस्य साशीतिपुणसाहस्रस्यार्द्धं चत्वारिंशदधिकपणपंचशतपरिमितो म
ध्यमसाहससंज्ञितस्तदर्द्धं मध्यमस्तस्य चत्वारिंशदधिकपणपंचशतस्यार्द्धं सत्याधिकपणशतद्वयपरिमि
तो दंडोऽधमसाहससंज्ञः स्मृत उक्तो मन्वादिभिः ।। यत्तु ।। पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः ।। मध्यमः
पंचविज्ञेयः साहस्रं त्वेव चोत्तमः इति मनुनोक्तं तत्सक्षालरममतिपूर्वापराधविषयं द्रष्टव्यं ।। दंडभेदानाह ।। धि
ग्दंडस्त्वथ वाग्दंडो धनदंडो वधस्तथा ।। योज्या व्यस्ताः समस्ता वाप्यपराधवशादिमे ।। धिग्दंडो धिग्धिगिति कुत्स
नं ।। वाग्दंडस्तु परुषशापवचनात्मः ।। धनदंडो धनापहारात्मकः ।। वधदंडः शारीरो बंधघरो घादिर्जीवितांतः ।। ए
ते चतुर्विधा दंडाः व्यस्ता एकैकशः समस्ता वा द्वित्रास्त्रिचतुरा वा अपराधानुसारेण योक्तव्याः ।। उत्क्रमेण पू
र्वपूर्वासाध्य उत्तराउत्तरः प्रयोक्तव्यः ।। यथाह मनुः ।। धिग्दंडं प्रथमं कुर्याद्वाग्दंडं तदनंतरं ।। तृतीयं धनदंडं तु वे

आ०
३

घदंडमतः परमिति ॥ दंडव्यवस्थानिमित्तान्याह ॥ ज्ञात्वापराधं देशं च कालं बलमथापि वा ॥ वयः कर्म च वित्तं च दंडं द
ण्ड्येषु पातयेत् ॥ यथावदपराधं ज्ञात्वा तदनुसारेण ॥ दंडप्रणयनं दंडन ॥ मेवं देशकालबलवयःकर्मवित्तानि ज्ञा
त्वा तदनुसारेण दंड्येषु दंडार्हेषु दंडप्रणयनं कुर्यात् ॥ तथा बुद्धिपूर्वाबुद्धिपूर्वसकृदावृत्त्यनुसारेण च यद्यपि राज्ञा
नमाधिकृतस्यायं राजधर्मकलापः उक्तस्तथापि वर्णांतरस्यापि विषयमंडलादिपरिपालनाधिकृतस्यायं धर्मो वि ८
दितव्यः ॥ राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृप इति ॥ पृथक्नृपग्रहणात् करग्रहणस्य रक्षार्थत्वाद्धि रक्ष
णस्य च दंडप्रणयनायत्तत्वादिति ॥ ॥ इति श्रीमत्पद्मनाभभट्टोपाध्यायात्मजस्य श्रीमत्परमहंसपरिव्राज
कविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षरायां याज्ञवल्क्यमुनिप्रणीतधर्मशास्त्रविवृतौ प्रथमो आचा
राध्यायः समाप्तः ॥ ॥ शुभमस्तु ॥ अस्मिन्नध्याये उपोद्घातप्रकरणं ॥ १ ब्रह्मचारिप्रकरणं ॥ २ विवाह
प्रकरणं ॥ ३ जातिवर्णविवेकप्रकरणं ॥ ४ गृहस्थधर्मप्रकरणं ॥ ५ स्नातकव्रतप्रकरणं ॥ ६ ॥ भक्ष्या
भक्ष्यप्रकरणं ॥ ७ द्रव्यशुद्धिप्रकरणं ॥ ८ दानधर्मप्रकरणं ॥ ९ श्राद्धप्रकरणं ॥ १० विनायकशांतिप्रकरणं ॥ ११

शांतिप्रकरणं॥१२ राजधर्मप्रकरणमिति॥१३ त्रयोदशं प्रकरणी रत्ना। उत्तमोदयस्येयं शिष्यस्यकृति
रात्मनः॥ धर्मशास्त्रस्य विद्वद्भिर्विज्ञानेश्वरयोगिनः॥ ॥ इतियाज्ञवल्क्यमुनिशास्त्रगता विवृत्ति
र्न कस्य विहिता विदुषः॥ प्रमिताक्षरापि विपुलार्थवती॥ परिषिंचयश्रवणयोरमृतं॥ ॥श्रीर
स्तु॥ ॥६९॥ ॥ग्रंथसंख्या॥ २६०० ॥ राम॥ ॥राम॥ ॥

संमुखेकमुहूर्तापित्रियामांतेतिथिर्भवेत्॥ तदहर्नपठेद्ब्रह्म पठनाद्ब्रह्महा भवेत्। इत्यनध्यायनिर्णयः।

KKSU LIBRARY
RAMTEK
441 106
M-1669
Dist. Nagpur

```
[OrderDescription]
,CREATED=22.09.20 15:53
,TRANSFERRED=2020/09/22 at 16:16:35
,PAGES=159
,TYPE=STD
,NAME=S0003649
,Book Name=M-1669-YAGVALAKAY SMRITI TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

```
FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
```

```
FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
```

```
FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
```